अथ द्वितीयः पटलः

पादोनत्रिकरादिपञ्चदशहस्ताशाङ्गुलान्तोत्तरे-
ष्वष्टाष्टाङ्गुलवृद्धितोऽन्तरभवद्योनिप्रभेदेष्वथ।
प्रत्यक्प्राग्वदनक्रमेण विहितेष्वल्पेषु वान्येषु वा
प्रासादेषु विशिष्टजातिषु निजेष्टं कारयेत् कारुभिः।।१।।

विमर्शिनी

'प्रासादमारचयतां सहमन्त्रबिम्बम्' इति पूर्वपटलेन प्रस्तुतानां प्रासादादीनां लक्षणं वदन् प्रथमं सामान्येन प्रासादानुद्दिशति - पादोनत्रिकरेति। अथाल्पेष्वन्येषु[1] वा प्रासादेषु निजेष्टं कारुभिः कारयेदिति सम्बन्धः। तत्राल्पप्रासादान् विशिनष्टि पादोनेत्यादिविशेषणैः। अथ गर्भाधानान्ते कर्मणि कृते। पादोनत्रिकरादिपञ्चदशहस्ताशाङ्गुलान्तोत्तरेषु पादोनत्रिकरादीनि पञ्चदशहस्ताशाङ्गुलान्तान्युत्तराणि येषां प्रासादानां ते तथोक्ताः। आशाशब्देन दशसङ्ख्या लक्ष्यते। अष्टाष्टाङ्गुलवृद्धितः पादोनत्रिकरादष्टाष्टाङ्गुलवर्धनेन। अन्तरभवद्योनिप्रभेदेषु अन्तरे मध्ये भवन्तो योनिप्रभेदाश्च येषां ते तथोक्ताः। प्रत्यक्प्राग्वदनक्रमेण विहितेषु क्रमात् पश्चिममुखत्वेन प्राङ्मुखत्वेन च कल्पितेषु।

---

१. 'योक्तेष्व' क. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

पादोनत्रिकरः प्रासादः प्रत्यग्वदनो ध्वजयोनिश्च, सद्व्यङ्गुलस्त्रिकरः प्राग्वदनो वृषयोनिश्च, सदशाङ्गुलस्त्रिकरः प्रत्यग्वदनो ध्वजयोनिश्च, पादोनचतुष्करः प्राग्वदनो वृषयोनिश्चेत्यादिक्रमेण सदशाङ्गुलः पञ्चदशहस्तः प्रासादः प्रत्यग्वदनो ध्वजयोनिरित्यन्तं विहितेष्वि[1]त्यर्थः। अन्येषु विशिष्टजातिषु वा। जातिच्छन्दविकल्पाभाससंज्ञेष्वित्यर्थः। यथा प्रयोगमञ्जर्याम्-

"आरभ्य त्रिकराच्च पञ्चदशकाद्धस्तादधस्तात् क्रमात्।
प्रत्येकं प्रवदामि लक्षणमहं संक्षेपतो वेश्मनाम्।।"

इति। भास्करीये च -

"त्रिचतुः पञ्चहस्तं तु षट्सप्ताष्टनवा दश।
एकादश द्वादश च त्रयोदश चतुर्दश।
पञ्चदशान्तविस्तारमेतेन विधिना विदुः।।"

इति।।१।।

विवरणम्

एवं तावद्यागभूमेः शिलायाश्च प्रासादप्रतिमायोग्यतासम्पादनं प्रतिपादितम्। सम्प्रति तन्निष्पादनप्रकारः। तत्र प्रथमं प्रासादलक्षणप्रतिपादनायारभते - पादोनत्रिकरेति। अथ अल्पेषु वान्येषु विशिष्टजातिषु च प्रासादेषु निजष्टे कारुभिः कारयेदित्यन्वयः। यतश्च निर्धारणमित्यत्र सप्तमी। अत्राल्पप्रासादेषु योज्यानि विशेषणानि पादोनत्रिकरमारभ्य पञ्चदशहस्ताङ्गुलमवसानानि येषामुत्तराणां ते तथोक्ताः। आशाशब्दो दशसङ्ख्यावाची। अष्टाष्टाङ्गुलवृद्धितः अन्तरे अन्तराले भवन्तो वक्ष्यमाणा योनिप्रभेदा येषां ते तथोक्ताः। प्रत्यक्प्राग्वदनक्रमेण विहितेष्विति। पादोनत्रिकरः प्रासादः प्रत्यग्वदनः, व्यङ्गुलसहितस्त्रिकरः प्राग्वदनः, तथा दशाङ्गुलसहितस्त्रिकरः प्रत्यग्वदनः, पादोनचतुष्करः प्रा[2]ग्वदनः, एतत् क्रमेण पञ्चदशहस्ताशाङ्गुलान्तं योजनीयमित्यभिप्रायः। विशिष्टजातिष्विति जातिच्छन्दविकल्पाभासादयो गृह्यन्ते। निजेष्टमिति। स्वाभीष्टदेवतास्थापनयोग्यमित्यर्थः।।१।।

ईशादिप्रेतेशपर्यन्तदिक्स्थाः
प्रासादा ग्रामादिकेषु ध्वजोत्थाः।

१. 'ष्वपीत्य' ख. पाठः, २. 'प्रत्यग्व' क. पाठ

Shripuram Publications
www.shripuram.org

गोयोन्युत्थाः शेषदिक्संस्थिताः स्यु-
स्तत्स्थाप्यार्चा चेष्यते तत्सयोनिः ।।२ ।।

विमर्शिनी

उक्तानां प्रासादानां प्रत्यक्प्राग्वदनक्रमेण कल्पनीयत्वे विषयविभागमाह - ईशादीति। ग्रामादिकेषु ग्रामपुरनगरादिषु। ईशादिप्रेतेशपर्यन्तदिक्स्थाः ईशकोणमारभ्य यमपर्यन्तदिक्षु स्थिताः प्रासादाः। ध्वजोत्थाः ध्वजयोनिसंभूताः शेषदिक्संस्थिताः निर्ऋत्यादिसोमान्तदिक्स्थिताः। गोयोन्युत्थाः वृषयोनिसंभूताः स्युः। तत्स्थाप्या तत्र तत्र स्थाप्या अर्चा प्रतिमा। तत्सयोनिः तत्समानयोनिरिष्यते। प्रासादो ध्वजयोनिश्चेत् प्रतिमापि ध्वजयोनिः, वृषयोनिश्चेद् वृषयोनिरित्यर्थः। तथा पाशुपते -

"ईशपूर्वाग्नियाम्यस्थ पश्चिमाभिमुखं शुभम्।
उत्तरानिलवारीशराक्षसस्थं पुरोमुखम्।।"

इति। तथाच मञ्जर्यां-

"लिङ्गध्वजस्थमृ[१]षभाश्रितमेव शस्तं
तत्रापि मुख्यमनुरूपतया गृहस्य।"

इति।।२ ।।

विवरणम्

तत्र तत्साधनभूतानेकविधप्रमाणप्रकृत्यात्मकपरिधिमानमूलभूतयोनिमुपदिदिक्षुर्योनीनां हेयोपादेयभेदेनावस्थानादुपादेयां योनिं प्राचि प्रतीचि च हराविति पुरोदीरितग्रामादिदिग्विशेषवशाद् दर्शयति - ईशादीति। ध्वजोत्थाः गोयोन्युत्था इति। तत्कारणभूततत्तत्परिधिमानजन्यानेकविधप्रमाणसाध्यतया तत्कार्यभूता इत्यर्थः। तत्सयोनिः तेन प्रासादेन समानयोनिः। तत्तत्परिधिमानावच्छिन्नद्रव्योचितानेकविधप्रमाणसाध्येत्यर्थः। प्रासादप्रतिमयोः परस्परसमयोनित्वं चैवं प्रतिपादितमवगन्तव्यम्। तेन प्रासादस्य प्रतिमाजन्यत्वेऽपि योनिसिद्धिर्भवति।।२ ।।

इष्टातानवितानमाननिचये त्रिघ्नेऽष्टभिर्भाजिते
शेषो योनिरिह व्ययो मुनियुजाथायोऽष्टनिघ्नेऽरुणैः।

---

१. 'वृ' ख. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

ऋक्षैर्ऋक्षमवाप्तिरत्र तु वयो ज्ञेयं तिथिस्त्रिंशता
वारो भूमिधरैर्निधिप्रगुणिते धर्माहृते वा व्ययः।।३।।

विमर्शिनी

कीदृशी योनिरित्याकाङ्क्षायां योन्यादिकमाह - इष्टातानेति। इष्टातानवितानमाननिचये इष्टस्य प्रासादादेरातानवितानयोर्दैर्घ्यविस्तारयोर्माननिचये प्रमाणसमूहे। त्रिघ्ने त्रिभिर्गुणिते। अष्टभिर्भाजिते हृते सति। यः शेषः स योनिरित्युच्यते। इहेत्यनेन इष्टातानवितानमाननिचये त्रिघ्ने इत्यनुवादः क्रियते। मुनियुजा चतुर्दशभिर्भाजिते सति शेषो व्यय इत्युच्यते। अथेत्यारम्भभेदे। इष्टातानवितानमाननिचये अष्टनिघ्नेऽष्टभिर्गुणिते। अरुणैर्द्वादशभिर्भाजिते शेष आय इत्युच्यते। इहेति अत्राप्याकृष्यते। इहाष्टनिघ्ने ऋक्षैः सप्तविंशत्या भाजिते शेष ऋक्षं नक्षत्रम्। अत्र त्विति तुशब्दो विशेषद्योतकः। अत्र ऋक्षैर्भाजिते। अवाप्तिः आवृत्तिः फलमिति यावत्। तद् वयो ज्ञेयम्। इहाष्टनिघ्ने त्रिंशता भाजिते शेषस्तिथिरित्युच्यते। इहैव भूमिधरैः सप्तभिर्भाजिते शेषो वारः। व्ययस्य पक्षान्तरमाह - निधीति। इष्टातानवितानमाननिचये निधिप्रगुणिते नवभिर्गुणिते धर्माहृते दशभिर्हृते शेषो वा व्ययः। तथाहुः-

"विस्तारायामराशौ वसुगुणित इनैर्भाजिते शेष आयो
रामघ्ने मन्ववाप्ते व्यय इह वसुभिर्भक्तशेषस्तु योनिः।
अष्टाभिर्वर्धितेऽस्मिंस्त्रिनवहृतफलं तद्वयः शेष ऋक्षं
पर्यन्ते त्रिंशदाप्ते तिथिऋषिभजिते वार आदित्यपूर्वः।।"

इति। मयमते च-

"व्यासायामसमूहे वसुनिधिगुणिते दिनेशधर्महृते।
आयव्ययमपि शिष्टं रामघ्नेऽष्टाहृते योनिः।।"

इति।।३।।

विवरणम्

एवमुपादेयाया योनेः कार्यभूतं तत्तत् परिधिमानमुपायविशेषेणोपदिशति - इष्टातानवितानेति। प्रासादो बिम्बमन्यद्वा निर्मित्सितं सामान्येन इष्टशब्देन गृह्यते।

Shripuram Publications
www.shripuram.org

आतान आयामः, वितानो विस्तारः, मानं प्रमाणविशेषसाध्यं सङ्ख्यालक्षणं मानं, निचयशब्दः समूहपर्यायः। तेनातानवितानयोरभितो वर्तमानयोः परिग्रहोऽपि द्योतितः। भाव्युपचारेण वायमातानवितानव्यपदेशः। येन मानेन प्रासादस्य प्रतिमाया वातानवितानौ यथालक्षणं परिकल्पनीयौ तादृशं मानमित्यर्थः। ननु यद्येवं परिधिमानमित्येव साक्षाद् ग्रहीतव्यमिति चेत्। नैष दोषः, प्रतिमार्थत्वात्। तत्र हि परिधिमानग्रहणे विवक्षितं परिधिमानं न प्रतीयेत। वृत्तषट्कूटादिप्रासादानां तु चतुरश्रप्रासादप्रकृतित्वादेव तत्परिधिमानग्रहणं भवतीत्यर्थः। त्रिघ्नेऽष्टभिर्भाजिते शेषो योनिरिति त्रिगुणितं कृत्वा अष्टावष्टौ यथायोगमपनयेत्। तदा शेषोऽष्टभेदा योनिः स्यात्। तस्य परिधिमानस्य योनिस्तत्रावगन्तव्या। यावत् तत्रावशिष्यते तावती योनिरित्यर्थः। नक्षत्रतिथिवारेष्वपि समानमेतदिति द्रष्टव्यम्। किं पुनः प्रमाणसाधनमिति चेत् प्रासादे हस्तः प्रतिमायामङ्गुलम्। प्रमाणसाधनव्यवस्थापनाच्च परिधिमानसङ्करो न शङ्कनीयः। योनिवशादुपजायमानं परिधिमानमेवमुपदिष्टम्। तस्यैव परिधिमानस्य गुणविज्ञानार्थमायव्ययादिविज्ञानोपायमाह - इह व्यय इत्यादिना। इहेति त्रिघ्न इष्टातानवितानमाननिचय एवेत्यर्थः। मुनियुक् चतुर्दश। अथाष्टनिघ्नेऽरुणैर्द्वादशभिरायः। अवाप्तिरत्र तु वय इति। सप्तविंशत्या ह्रियमाणे यो भागोऽवाप्यते तद् वयः स्यात्। वसुप्रगुणिते धर्माहृते वा व्यय इति। विकल्पान्तरप्रदर्शनार्थमेतत्। धर्मा दश।।३।।

ध्वजधूमसिंहकुक्कुरवृषखरगजवायसाः क्रमेण स्युः।
***प्रागादियोनयोऽष्टौ तेष्वयुजः सम्पदे युजो विपदे।।४।।**

विमर्शिनी

अष्टानां योनीनां नामानि कथयति - ध्वजेति। प्रागादिक्रमेण ध्वजधूमसिंहकुक्कुरवृषखरगजवायसाः ध्वजधूमेत्यादिसंज्ञाः। तेषु ध्वजादिषु अयुजः दिग्भवाः सम्पदेऽभ्युदयाय, युजः कोणभवा नाशाय। तथा पाशुपते-

"तत्रैकाद्यष्टपर्यन्ता ध्वजधूमादयः क्रमात्।
ध्वजो धूमश्च सिंहश्च शुनको वृषभस्तथा।।
खरश्चैव गजश्चैव वायसो वास्तुयोनयः।
आदिप्रभृतिचत्वार एकैकान्तरिताः शुभाः।।

* 'पूर्वादियोनयो' इति विवरणरीत्या पाठः

Shripuram Publications
www.shripuram.org

द्वितीयाद्यास्तथैवान्ये चत्वारस्त्वशुभाः स्मृताः।”

इति।।४।।

विवरणम्

नक्षत्रादीनां प्रसिद्धत्वादप्रसिद्धा योनिर्गणयति - ध्वजेति। पूर्वादियोनयः पूर्वाद्यष्टदिक्षु वर्तमाना योनयः। परिमण्डपादीनां दिग्योनिपरिग्रहपक्षे दिग्विशेषाभिधानस्योपयोगः। तेष्वयुजः सम्पदे युजो विपद इति। ध्वजसिंहवृषगजा अभ्युदयहेतवः, शेषा विनाशहेतवश्च विज्ञेयाः। ननु किमर्थोऽयं फलोपन्यासः यावता प्रासादप्रतिमानां ध्वजवृषमात्रपरिग्रहात् परिमण्डपादीनां च पक्षे दिग्योनिनियमाच्च धूमादिपरिग्रहप्रसङ्गो न भवतीति चेत्। अथवा युज्यन्तेऽवयवैरिति युजः। अवयवभूताभिः सङ्ख्याभिः सहिता ध्वजादयः, ते न ग्राह्याः। ये त्वयुजः निरवयवाः पूर्णा एव, त एव ध्वजादयो ग्राह्याः स्युः। परिधिमानस्य सर्वसङ्ख्यास्वनियमात् कदाचिदेकैकयोनिः पूर्णो भवति। कदाचित् कतिपयावयवात्मकस्सन्न-पूर्णश्च। तथा च तिथिनक्षत्रेष्विवापूर्णतायामपि ग्रहणप्रसङ्गः स्यात्। तन्निवृत्त्यर्थमेत-दुक्तम्।।४।।

आयाधिक्यं व्ययतः सम्पाद्यं सर्वथान्यथापत्तिः।
नक्षत्रादिशुभत्वं ज्योतिः शास्त्रादि[1]भिः सुविज्ञेयम्।।५।।

विमर्शिनी

व्ययतः व्ययात्। आयाधिक्यम् आयस्याधिकत्वम्। सर्वथा सर्वप्रकारेण सम्पाद्यं ग्राह्यम्। अन्यथा चेदापत्तिः नाशः स्यात्। नक्षत्रादिशुभत्वं नक्षत्रतिथ्यादीनां शुभत्वं ज्योतिः शास्त्रादिभिर्लोकत एव सुविज्ञेयत्। तथा मयमते -

“आयाधिकमथ वसुदं व्य[2]याधिकं सर्वनाशः स्यात्।”

इति।।५।।

विवरणम्

आयव्यययोरितरेतरापेक्षं शुभाशुभत्वमाह - आयाधिक्यमिति। सर्वथेति। यद्यपि तिथिनक्षत्रादिषु किञ्चिदशुभमुपेक्ष्यते, तथापि व्ययाधिक्यमनुपेक्ष्यमित्यभिप्रायः। इत्थं प्रासादप्रतिमयोः परिधिमानमशुभं प्रतिपादितम्।।५।।

---

१. ‘तः’ क. पाठ, २. ‘यमधि’ ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

बालत्वं कौमारं यौवनमथ वार्धकं च निधनं च।
पञ्च वयांस्येष्वन्त्यं नेष्टं शिष्टानि वास्तुनीष्टानि॥६॥

विमर्शिनी

वयांसि कथयति - बालत्वमिति। अथ बालत्वं कौमारं यौवनं वार्धकं निधनं मरणं चेति पञ्च वयांसि। एषु वयस्सु। अन्त्यं मरणमेव नेष्टम्। वास्तुनि शिष्टानीष्टान्येव॥६॥

धाम्नो व्यासे शक्वरीद्वन्द्वभक्ते
मित्रेन्द्रेध्मांशैः समस्तांशतश्च।
विस्तृत्या संयुक्तया पादुकादि-
स्तूप्यग्रान्तोऽभ्युच्छ्रयः स्याच्चतुर्धा॥७॥

विमर्शिनी

प्रासादस्योन्नतोर्नियममाह - धाम्न इति। धाम्नः प्रासादस्य। व्यासे विस्तारे। शक्वरीद्वन्द्वभक्ते अष्टाविंशतिधा कृते सति। मित्रेन्द्रेध्मांशैः मित्रा द्वादश इन्द्राश्चतुर्दश इध्मा एकविंशतिः तत्सङ्ख्यैरंशैः समस्तांशतः समस्तेन च विस्तारेण संयुक्तया विस्तृत्या मानेन प्रासादस्य। पादुकादिस्तूप्यग्रान्तः पादुकमारभ्य स्थूप्यग्रमवधीकृत्य योऽभ्युच्छ्रय उत्सेधः स चतुर्धा स्यात्। तथा निबन्धने -

"सप्तांशत्र्यर्धिको[१]ऽध्यर्धः पादोनद्विगुणोऽपि वा।
द्विगुणो वोच्छ्रयः प्रोक्तो विस्तारात् सर्ववेश्मनाम्॥"

इति॥७॥

विवरणम्

अथ प्रासादस्य भूयस्तरकालसाध्यत्वेन प्रागेव प्रक्रमणीयत्वात् प्रथमं प्रासादप्रकारमभिदधानः समचतुरश्रं प्रासादं प्रकृतित्वेन च मन्यमानः तस्य प्रतिदिशं वितानस्य परिधिमानस्य चतुर्थांशलक्षणस्य स्पष्टतरत्वात् प्रथममुन्मानं जनयितुमाह - धान्मो व्यास इति। यद्यपि समचतुरश्रे विस्तारो नाम न कश्चित् सम्भाव्यते, तथापि

---

१. 'न्तितो ह्यर्धः' ख. पाठः

Shripuram Publications
www.shripuram.org

व्यासग्रहणमायतचतुरश्रसमवृत्तादीनामपि विस्तारादेवोन्मानं जनयितव्यमिति ज्ञापनार्थम्। शक्वरीद्वन्द्वमष्टाविंशतिः। विस्तारप्रमाणमष्टाविंशतिधा भङ्क्त्वा तेषु भागेषु मित्रांशाद् विस्तारप्रमाणे योजयेत्, तदेकमुन्मानम्। एवमितरत्रयं द्रष्टव्यम्। मित्रा द्वादश, इन्द्राश्चतुर्दश, इध्मा एकविंशतिः, समस्तांशा अष्टाविंशतिः। ननु उन्मानेन अवच्छेद्यः कस्मिन् प्रदेशे प्रासाद इत्याह - पादुकादिस्तूप्यग्रान्त इति। पादुकादीत्युपलक्षणम्। पादुकाभावे जगत्याद्यपि ग्राह्यम्। समस्तोन्मानमेवमुक्तम्।।७।।

गेहे त्रिदोर्वर्गभवे द्विदोर्मितान्
***स्तम्भांस्ततोऽब्ध्यङ्गुलवर्धितान् क्रमात्।**
चतुष्कराद्युत्तरवर्गजेषु तान्
¶करोत्वधिष्ठानमतोऽर्धसंमितम्।।८।।

विमर्शिनी

एवं समस्ताया उन्नतेः प्रमाणमुक्त्वा स्तम्भाधिष्ठानयोरुन्नतेर्नियममाह - गेह इति। त्रिदोर्वर्गभवे पादहीनः त्रिकरः सव्यङ्गुलः त्रिकरः सदशाङ्गुलः त्रिकरश्च त्रिदोर्वर्गः तद्भवे गेहे। द्विदोर्मितान् द्विकरसम्मितान् स्तम्भान् करोतु। चतुष्कराद्युत्तरवर्गजेषु पादोनचतुष्करादिश्चतुष्करवर्गः पादोनपञ्चकरादिः पञ्चकरवर्गः एवं षट्करादावप्यूह्यम्। तेषु चतुष्करादिवर्गजेषु गेहेषु। क्रमेण ततः द्विकरात्। अब्ध्यङ्गुलवर्धितान् चतुश्चतुरङ्गुलवर्धितान् स्तम्भान् करोतु। अतः स्तम्भाद् अर्धसम्मितमधिष्ठानं करोतु। तथा निबन्धने-

"त्रिहस्ते द्विकराः स्तम्भा गोलकद्वयवर्धिताः।
हस्ते हस्ते स्थिता गेहादापञ्चदशहस्तकात्।।"

इति।।८।।

विवरणम्

अथाधिष्ठानस्यापि जनकं स्तम्भोन्मानं विस्तारादेव जनयति - गेह इति। त्रिदोर्वर्गभवे गेहे द्विदोर्मितान् स्तम्भान् कुर्यादित्यन्वयः। दोश्शब्दो हस्तपर्यायः। त्रिहस्तस्य वर्गः त्रिहस्तवर्गः तत्र भवम्। त्रिवर्गशब्दोऽयं पारिभाषिकोऽभिप्रेतः। पादोनत्रिकरो

* 'स्तम्भान् युगाश्न्यङ्गुलवर्धितान्' इति, ¶ 'कुर्यात्' इति च विवरणरीत्या पाठः

Shripuram Download
www.shripuram.org
www.shripuram.org

द्व्यङ्गुलाधिकत्रिकरो दशाङ्गुलधिकत्रिकरश्च। सोऽयं त्रिकरशिशिल्पिभिः परिभाषितः। एवं चतुष्करादयो विज्ञेयाः। परिधिमानस्य चतुर्थो भागस्समचतुरश्रः प्रासाद इति पूर्वमेवोक्तम्। द्विदोर्मितान् द्विहस्तोन्मितान्। अधिष्ठानमतोऽर्धसम्मितमिति। तदर्धमधिष्ठानोन्मानमित्यर्थः। चतुष्कराद्युत्तरवर्गके गेह इत्यनुषज्यते। युगाश्व्यङ्गुलवर्धिता-निति यथासङ्ख्यं सम्बन्धः। चतुष्करवर्गप्रासादे द्वीद्यंगुलाधिकद्विहस्ताः स्तम्भाः पञ्चकरवर्गप्रासादे चतुरङ्गुलाधिकाः। एवमन्यत्रापि द्रष्टव्यम्। चतुष्करवर्गप्रासादे एकाङ्गुलाधिकहस्तमानमधिष्ठानं स्यात्। शेषमप्[१]येवं नेयम्।।८।।

अङ्गाद्यैरुदयोत्तरान्तरगतोन्मानं विभज्य क्रमात्
सङ्ख्यानैः शिवपश्चिमैर्निगदिते स्तम्भोच्छ्रये खेच्छया।
अंशं योजयतु क्वचित् त्यजतु वा मासूरके स्वोच्छ्रयं
भङ्क्त्वाङ्गादिनवान्तिमैर्विरहयेद् वांशं यथोक्तोच्छ्रयात्।।९।।

विमर्शिनी

'स्तम्भार्धोच्चमधिष्ठानं पादबन्धं प्रतिक्रममि'ति च प्रोक्तयोः स्तम्भाधिष्ठान-योरौचित्यवशान्न्यूनाधिकत्वमप्याह - अङ्गाद्यैरिति। उदयोत्तरगतोन्मानम्, उदयो भित्तेर्मूलप्रदेशः पादुकस्य मूलप्रदेशो वा, उदयोत्तरयोरन्तरगतमुन्मानम्। अङ्गाद्यैः षडाद्यैः। शिवपश्चिमैरेकादशान्तिमैः। सङ्ख्यानैर्विभज्य पूर्वनिगदिते स्तम्भोच्छ्रये एकमंशं योजयतु क्वचित् पक्षे। क्वचित् पक्षे त्यजतु च। तथैव मासूरके अधिष्ठाने। स्वोच्छ्रयमङ्गादिन-वान्तिमैः षडादिनवपर्यन्तैः। सङ्ख्यानैः क्रमाद् भङ्क्त्वा यथोक्तोच्छ्रयादेकमंशं विरहयेत् त्यजेद्वा। तथामयमते-

"जन्मोत्तरान्तरगतं गृहपादमानं षट्सप्तनागनवपङ्क्तिहरांशमेकम्।
न्यूनं करोतु गृहसंधृतिपादतोऽथ यद्वाधिकं निखिलसालगतेषु चैवम्।।
स्तम्भार्धोच्चं वा मसूरोच्चमानं षट्सप्ताष्टाङ्गेषु वा भागहीनः।
वास्त्वाधारोच्चं भवेत् सर्ववास्तुष्वेवं पूर्वं शम्भुना सम्यगुक्तः।।"

इति।।९।।

---

१. 'स्योन्नेयम्' ग. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

अथ स्तम्भाधिष्ठानयोरुन्मानपरिसमाप्त्याद्यपेक्षया क्वचिदुन्मानप्रक्षेपशोधने दर्शयति - अङ्गाद्यैरिति। उदय उपपीठं, अङ्गाद्यैश्शिवपश्चिमैः सङ्ख्यानैरित्यन्वयः। निगदिते प्राग् द्विदोर्मितानित्यादिना अभिहिते। अंशमेकं भागम्। मासूरकशब्दोऽधिष्ठान-पर्यायः।।९।।

भक्ते प्रत्युत्तरान्तर्गतचरणसमुन्मानकेऽष्टाङ्कदिग्भि
स्तेष्वेकांशात्तमूलप्रतितितदुरगांशादिहीनाग्रतानान्।
दारुस्तम्भांस्तदर्हे विहिततदतिदलाग्न्यब्धिभागोनतानान्
कुड्यस्तम्भांश्च कुड्ये रचयतु चरणाग्रप्रतानोऽत्र दण्डः।।१०।।

विमर्शिनी

स्तम्भानां विस्तारमाह - भक्त इति। प्रत्युत्तरान्तर्गतचरणसमुन्मानके, प्रतिरधिष्ठानाग्रे कल्पितोऽवयवः, प्रतेरुत्तरस्य चान्तर्गतः स्तम्भोच्चोयस्तस्मिन् अष्टाङ्कदिग्भिरष्टभिर्वा नवभिर्वा दशभिर्वा भक्ते। तेष्वंशेषु एकांशात्तमूलप्रतितितदुरगांशादिहीनाग्रतानान् एकांशेनात्ता परिगृहीता मूलप्रततिर्मूलविस्तृतिः तदुरगांशो मूलविस्तृतेरष्टांशः, आदिशब्देन नवांशो दशांशो वा विवक्षितः, तद्रहिताग्रविस्तारान् दारुस्तम्भांस्तदर्हे करोतु। तथैव कुड्यस्तम्भान् विहिततदतिदलाग्न्यब्धिभागोनतानान् विहितस्य दारुस्तम्भस्य ततेर्विस्ताराद् दलेनार्धेनाग्निभागेन त्रिभागेनाब्धिभागेन चतुर्भागेन विहीनविस्तारान् कुड्ये रचयतु। अत्र दारुस्तम्भे। चरणाग्रप्रतानः स्तम्भाग्रविस्तारो दण्ड इत्युच्यते। तथा मयमते-

"पादोच्चपङ्क्तिनन्दाष्टभागैकं वाङ्घ्रिविस्तरम्।
दारुस्तम्भगतं ह्येतत् कुड्यपादमथोच्यते।।
तदर्धं वा त्रिभागोनं चतुर्भागोनमेव वा।
कुड्यस्तम्भविशालं स्यादेतत् सर्वेषु धामसु।।
तन्मूलतारमाख्यातं तत्तारं तु तथा भजेत्।
एकभागविहीनं तु शेषमग्रविशालकम्।।"

इति। मञ्जर्यां च "स्तम्भाग्रविष्कम्भमुशन्ति दण्डम्" इति।।१०।।

Shripuram Publications
www.shripuram.org

विवरणम्

इदानीं जनितानां स्तम्भानां द्रव्यभेदापेक्षया विस्तारमाह - भक्त इति। प्रतिः पटी अन्तर्गतं मध्यगतम्। एकेनांशेन मूलविस्तारः मूलविस्तारादष्टमांशेन हीनः स एवाग्रे विस्तारः। आदिशब्देन...। तदर्हे दारुमये प्रासादे मण्डपगोपुरादिषु च। अत्र प्रासादद्रव्यभेदः अधिष्ठानस्य शोधनमेव। विहिततितिदलाग्न्यब्धिभागोनतानानिति। ततिस्तानश्च विस्तार एव। दारुस्तम्भविस्तारादर्धेन तृतीयांशेन चतुर्थभागेन वा यथायोगं कुड्यस्तम्भविस्तारः कार्यः। मूलविस्तार एवायम्। अग्रविस्तारस्तु पूर्वोक्तनयेन कार्यः। चरणाग्रप्रतानोऽत्र दण्ड इति संज्ञा विधीयते। अत्रेति प्रासादप्रकरण इत्यर्थः। स्तम्भपरिमाणमेवं निर्दिष्टम्।।१०।।

*स्तम्भ एव निधिकलशादीनां प्रकृतिः। अत इदानीं निधिघटादीनां प्रमाणमाह - स्तम्भोच्चस्येति। तदङ्कांशः विस्तारादेव नवमो भागः तस्य मुखोदरादिकमुपपत्त्या योज्यम्। पद्म इति कूर्मास्पदं पद्मं गृह्यते। स्तम्भोच्चस्येत्यनुवर्तनीयम्। तस्याष्टमभागेनोच्छ्रयः उच्छ्रयात् षष्ठमंशमपनीय शेषः पद्मस्य समवृत्ताकारस्य व्यासः। तदवयवक्लृप्तिश्च प्रतिमापद्मनयेन साधनीया। अर्धोच्छ्रयः प्रथाशब्दोऽपि विस्तारवाचकः। प्रथमेष्टकामाह - अत्रेति। आरिप्सितं वक्ष्यमाणेन चिकीर्षितम्। तैव्र्यमपि पिण्डं विस्पष्टपृष्ठाग्रका इति। तदुत्पादनसमय एव न्यासे पृष्ठाग्रयोः परिज्ञानार्थं लक्षणं कार्यमिति भावः। पुटपाकः। शैल्यः शिलामय्यः। चतुरूनिताश्चतस्र एव। चतुरुपेता द्वादश। गृहौचित्यत इति। स्वतन्त्रमिष्टकामानमाह - क्वापीति। क्वापि स्मृता इत्यन्वयः। क्वचनमित्राशागजैः क्लृप्तायामाः तदर्धविस्तृताः तदर्धोच्चाश्चेत्येवं योजनीयम्। क्वचिदा भूमभूमेर्द्विधा एकभूमित आरभ्य नवभूमिप्रासादपर्यन्तं द्विधा इष्टका उक्ताः। कथमित्याह-नागाङ्काङ्गुलतोऽङ्गुलद्वयविवृद्ध्येति। अत्रापि क्लृप्तायामेत्यादि सम्बध्यते। अष्टाङ्गुलायामा नवाङ्गुलायामा वा तदर्धविस्तृताः तदर्धोत्सेधा एकभूमेः स्युः। दशाङ्गुला एकादशाङ्गुला वा द्विभूमेरित्यादि द्रष्टव्यम्। इदानीमिष्टकानामपि निदानं गर्भपात्रप्रमाणमाह-भङ्क्त्वेति। इह स्तम्भस्य मूलविस्तारमानं चतुर्विंशत्या विभज्य समस्तेन एकविंशत्यंशैरष्टादशभिष्षोडशभिर्द्वादशभिर्वांशैः समचतुरश्रस्य गर्भपात्रस्य विस्तारः। विस्तारेण सम उत्सेधः। अथवाष्टमांशेन षष्ठेन पञ्चमेनांशेन हीनः स एवं विस्तारार्धं वेत्यर्थः। स्वोत्सेधानलसागरांशरहितोत्सेधोज्ज्वलोर्ध्वच्छदमिति। ऊर्ध्वच्छदमुपरिगतं पिधानपात्रं

* अस्या व्याख्याया मूलश्लोका न दृश्यन्ते।

Shripuram Publications
www.shripuram.org

तद्गर्भपात्रोन्मानतृतीयांशेन तुरीयांशेन वोन्मितं समचतुरश्रं स्यात्। अखिलेष्विति। सर्वेषां साधारणमेतदित्यर्थः। गोभिरजिते षट् द्वाविति। गोभिर्विभज्य षड् बाह्येऽशकानन्तर्द्वौ च विहायेति[1] सर्वमनुषञ्जनीयम्। भूतैस्त्रीनपि चैककमित्यत्रापि तद्वद् योज्यम्। परांशस्थितं गर्भं वितनुयादिति सर्वशेषः। परस्मिन्नवशेषितेंऽश इत्यर्थः।।

मासूरोच्चे विभक्ते शिखिविशिखकरैः क्ष्मेक्षणेन्द्वंशतोऽर्धां-
शोर्ध्वं पादांशवृद्ध्या द्विगुणितचरमं योजयेद् वोपपीठम्।
दिग्भक्तेंऽशैः शशाङ्कादिभिरिषुचरमैरेकसार्धाद्विलोकै-
र्दण्डैर्वा निर्गतं चारचयतु विलसत्स्वाङ्गभङ्ग्याभिरामम्।।११।।

विमर्शिनी

अथाधिष्ठानादिप्रासादावयवान् वदन्नधिष्ठानादप्यधोदेशे पक्षान्तरेण कल्पनीयस्योपपीठस्य क्लृप्तिमाह - मासूरोच्च इति। (मासूरोच्चे) अधिष्ठानोच्छ्रये। शिखिविशिखकरैः त्रिभिः पञ्चभिर्द्वाभ्यां वा विभक्ते। क्रमेण क्ष्मेक्षणेन्द्वंशतः एकद्व्येकांशकैः। अर्धांशोर्ध्वम् अर्धांशादुपरि। पादांशवृद्ध्या पादांशवर्धनेन। द्विगुणितचरमं द्विगुणान्तमुपपीठं योजयेद्वा। तस्य निर्गममाह - दिग्भक्त इति। अधिष्ठाने दिग्भक्ते दशधा कृते। शशाङ्कादिभिः एकादिभिः। इषुचरमैः पञ्चपर्यन्तैरंशैर्वा। एकसार्धद्विलोकैः एकेन सार्धेन द्वाभ्यां त्रिभिर्वा दण्डैश्चरणाग्रप्रतान इत्युक्तैः निर्गतमधिष्ठानाद् बहिर्गतम्। विलसत्स्वाङ्गभङ्ग्याभिरामं विलसन्त्या स्वाङ्गभङ्ग्या मनोहरं चारचयतु। तथा मयमते-

"आत्ताधिष्ठानतुङ्गाद् द्विगुणमथ समं सार्धमर्धं त्रिपादं
पञ्चांशद्व्यंशकं वानलसमभजिते द्व्येकमत्रोपपीठम्।"

इति। काश्यपीये च-

"स्वाधिष्ठानसमोच्चं वा त्रिपादं वार्धमेव वा।
पञ्चभागेऽग्निभागं वा सपादं सार्धमेव वा।।
पादोनद्विगुणं वाथ द्विगुणं वा विशेषतः।
एवमष्टविधं ख्यातमुपपीठोच्छ्रयं द्विज!।।
दशधाभज्याधिष्ठानमेकद्वित्रिचतुष्टयम्।

१. 'धा' घ. पाठः

Shripuram Publications
www.shripuram.org

पञ्चांशं वाथ निष्काममधिष्ठानस्य पादुकात्।।
दण्डं वा सार्धदण्डं वा द्विगुणं वा त्रिदण्डकम्।
अधिष्ठानाज्जगत्या वा समन्तात् पादबाह्यतः।।"

इति।।११।।

विवरणम्

प्रासङ्गिकं समाप्य प्रकृतमनुसरन् अधिष्ठानस्याप्यधः प्रासादोन्नत्यादिसिद्धये कर्तव्यमुपपीठमाह - मासूरोच्च इति। वाशब्दो भिन्नक्रमः। द्विगुणितचरमं वेत्यन्वयः। अर्धांशेन त्रिपदांशेनेत्यारभ्य पादोनद्विगुणेन वेति यावद् इत्यर्थः। शशाङ्कादिभिरिषुचरमैरिति। एकेन द्वाभ्यां त्रिभिश्चतुर्भिः पञ्चभिर्वांशैः। दण्डैरिति। चरणाग्रप्रतानोऽत्र दण्ड इति ह्युक्तम्। स्थलशैथिल्याद्यपेक्षया विकल्पानामुपयोगो द्रष्टव्यः। विलसत्स्वांशभङ्ग्याभिराममिति।।११।।

इष्टाधिष्ठानोच्छ्रयं संविभज्य
सङ्ख्याभिः श्रुत्यादिनन्दान्तिमाभिः।
कुर्यादेकांशेन तूपान(ड?द)न्ते
पद्मं धामोत्सेधतोऽदोऽधिकं स्यात्।।१२।।

विमर्शिनी

अधिष्ठानात् पृथक्कल्पनीयस्य पद्मनाम्नोऽवयवस्य क्लृप्तिं चाह - इष्टेति। इष्टाधिष्ठानोच्छ्रयम् इष्टस्य कल्पितस्याधिष्ठानस्योच्छ्रयम्। श्रुत्यादिनन्दान्तिमाभिः चतुरादिनवान्तिमाभिः सङ्ख्याभिः, संविभज्यांशीकृत्य। तेष्वेकांशेन उपान(ड?द)न्ते पादुकादधोभागे। पद्मं पद्मलाकारमवयवं कुर्यात्। अदः एतत्तु। धामोत्सेधतो गृहोच्चादधिकं स्यात्। तथाहुः-

"अधिष्ठानसमुत्सेधाद् वेदांशं दर्शनाष्टकम्।
नन्दपातालभूतांशमेकांशं पद्मायतम्।।
पूर्वभूमिगतं पद्मं प्रासादानां प्रशस्यते।।

इति।।१२।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

उपान(ड?द)न्ते उपानद्... धामोत्सेधतोऽदोधिकं स्यात्। अदः पद्मं पद्मस्योन्मानमिति यावत्। तत्कृत्स्नोन्मानांशेन न कार्यम्। किं तर्हि, बहिरेव योज्यमित्यर्थः।।१२।।

मासूरे मिहिरद्वयांशिनि ततोंऽशैः पादुकं पावकै-
रष्टाभिर्जगतीं स्वरैः कुमुदकं शेषे दशांशेंऽशकैः।
त्रिद्व्यग्न्यश्विमितैर्गलं विरचयेत् कम्पान् गलं पट्टिकां
प्रत्युद्यन्मकरास्यकादिरुचिरां सिंहादिभिश्चोज्ज्वलाम्।।१३।।

विमर्शिनी

अधिष्ठानक्लृप्तिमाह - मासूर इति। मासूरे अधिष्ठाने। मिहिरद्वयांशिनि चतुर्विंशतिधा कृते। तस्मात्। पावकैस्त्रिभिरंशैः। पादुकं पादुकाख्यमवयवं विरचयेत्। अष्टाभिर्जगतीं च। स्वरैः सप्तभिः कुमुदकं च। शेषे दशांशे शेषैः षड्भिरंशैर्दशांशीकृते सति। त्रिद्व्यग्न्यश्विमितैः त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यां चांशकैः। क्रमेण गलं कम्पान् पुनर्गलं पट्टिकां च विरचयेत्। तत्र प्रत्युद्यन्मकरास्यकादिरुचिरां प्रतेरुद्यद्भिर्मकरास्यादिभिर्मनोहरां सिंहादिभिश्चोज्ज्वलां च विरचयेत्। तथा काश्यपीये-

"अधिष्ठानोत्सेधमत्र चतुर्विंशतिभागतः।
त्रियंशं पादुकं विद्यादष्टांशं जगती भवेत्।।
कुमुदं सप्तभिः कुर्यात् षड्भागं प्रति चोच्छ्रयम्।
प्रतेरुच्छ्रयमेवं तु दशभागे कृते पुनः।।
त्रिभागं कुमुदं पट्टं स्याद् द्व्यंशे कण्ठपट्टिका।
त्रियंशेऽन्तरितं तस्या वाजनं च द्वियंशकम्।।
सिंहव्यालगजेन्द्रैः स्यात् प्रतिभूषणसंयुतम्।
प्रतिक्रममिदं चैव अधिष्ठानोत्तमं विदुः।।"

इति।।१३।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

वास्त्वाधारसमुच्छ्रये प्रकृतिभक्ते वा त्रिभिः पादुकं
छन्दोभिर्जगतीं रसैः कुमुदकं चैकेन तत्पट्टिकाम्।
भागाभ्यां गलपादकान् विरचयेदर्धांशतः पट्टिकां
क्षुद्रां सार्धधरांशकेन महतीं स्वांशोल्लसद्वाजनाम्।।

विमर्शिनी

पक्षान्तरेणाप्यधिष्ठानविभागमाह - वास्त्वाधारेति। वास्त्वाधारसमुच्छ्रये अधिष्ठानोच्चे। प्रकृतिभक्ते एकविंशतिधा कृते सति। त्रिभिः पादुकं विरचयेत्। वेति पक्षान्तरद्योतकः। छन्दोभिः सप्तभिर्जगतीम्। रसैः षड्भिः कुमुदकम्। एकेन तत्पट्टिकां[१] कुमुदपट्टिकाम्। भागाभ्यां गलपादकान् गलकान् पादान्। अर्धांशतः क्षुद्रामल्पां पट्टिकाम्। सार्धधरांशकेन अर्धसहितैकेन। महतीं स्वांशोल्लसद्वाजनां स्वार्धांशादिना कृतवाजनां महत्पट्टिकां च। तथा मञ्जर्यां-

"कुर्यादधिष्ठानमथैकविंशै(रंशै)र्विभक्तं तिथिहस्तगेहे।
अंशत्रिकैः कल्पितपादुकं च सप्तांशक्लृप्तां जगतीं विदध्यात्।।
षड्भिर्विदध्यात् कुमुदं तथैकभागेन कुर्यादथ पट्टिकां च।
आलिङ्गरूपां गलपादमांशद्वयेन सम्यग् विदधीत भूयः।।
सार्धांशक्लृप्तामथ पट्टिकां च क्षुद्राभिधानां च महाख्यपट्टीम्।
अध्यर्धक्लृप्तां विदधीत सम्यक् कर्तव्यमेवं विधिवत् क्रमेण।।

इति।।१४।।

विवरणम्

*सम्प्रत्यधिष्ठानालङ्कारान् दर्शयति - वास्त्वाधारसमुच्छ्रय इति। जगती नामोन्नतचतुरश्राकारा। कुमुदकं कुम्भवद् वृत्तं, तत्पट्टिका कुमुदकाङ्गभूता पटी। शेषेषु अंशेषु एकैकशोऽन्तरिवाजनप्रतिमुखानीत्यन्वयः। वेति। अथवा शेषेष्वंशेषु एवं कुर्यादित्यर्थः। सार्धधरांशतः खण्डान् त्रयो ह्यंशा अर्थादवशिष्टाः। तेष्वेकेन मध्यमांशदलमिश्रितेन खण्डान् विदध्यात्। तावता सार्धांशेनेत्यर्थः। अथवा तस्मिन्नुच्छ्रयणे प्रकृतिसम्भक्त इत्यन्वयः। प्रकृतिरेकविंशतिः छन्दोभिः सप्तभिः। भागाभ्यां गलपादुकानिति।

---

१. 'कां भा' ख. पाठः

* समनन्तरश्लोकव्याख्यापि पाठभेदेनात्रैव सङ्घटिता प्रतिभाति।

www.shripuram.org
Shripuram Publications
www.shripuram.org

अष्टादशेन गलं एकोनविंशेन अर्धांशतः क्षुद्रां पट्टिकामित्यन्वयः। सार्धधरांशकेन महतीमिति। महापट्टिकामित्यर्थः। स्वांशोल्लसद्वाजनामिति। स्वोचितेनांशेन वाजनामपि तस्या विरचयेदित्यर्थः।।१४।।

मासूरें[१]ऽशैर्दिनेशांशिनि सति जगतीकैरवे श्रुत्युपायै-
स्त्छिष्टैः पट्टिकामन्तरिमपि रचयेद् वाजनं च प्रतिं च।
प्रत्युत्पन्नक्रमाख्ये क्रम इति कथितः पट्टिकान्तं तथातः
खण्डान् सार्धैकतो वाजनमपि सदलैकांशतः पादबन्धे।।

विमर्शिनी

पुनरप्यधिष्ठानान्तरयोर्विशेषमाह - मासूर इति। मासूरे दिनेशांशिनि द्वादशधा कृते सति। श्रुत्युपायैश्चतुर्भिरंशैः। जगतीकैरवे जगतीं कुमुदकं च रचयेत्। तच्छिष्टै-श्चतुर्भिरंशैः। क्रमेण पट्टिकामन्तरिं वाजनं प्रतिं च प्रत्युत्पन्नक्रमाख्ये प्रतिक्रमाख्ये अधिष्ठाने। क्रमः अवयवक्रमः। इति उक्तविधिना[२] कथितः[३]। पादबन्धे अधिष्ठाने। पट्टिकां तथा कृत्वा तत ऊर्ध्वं सार्धैकतः खण्डान्, सदलैकांशतः अर्धसहितैकांशतो[४] वाजनं च। तथाच मञ्जर्याम्-

"उत्सेधं विभजेत् त्रिधान्तिममथो भङ्क्त्वा चतुर्धा क्रमा-
देकांशे जगतीं परे कुमुदकं भागे विदध्यात् ततः।
भागौ द्वावथ पट्टिकान्तरिगतावन्त्यौ प्रतेः स्यान्मुखं
कर्तव्यं विधिवत्प्रतिक्रममिदं वृद्धिप्रदं वेश्मनः।।
एकेन कुर्यादथ पट्टिकां च सार्धेन खण्डान् विदधीत सम्यक्।
शिष्टेन कुर्यादथ वाजनं च कर्तव्यमेवं खलु पादबन्धे।।

इति।।१५।।

यावत् *स्वायोच्चमानं गमयतु जगतीं बाह्यतो मानसूत्रात्
तत्तुल्यं कैरवं चोच्छ्रयसमचरणोनार्धपादांशकं च।
शिष्टं तत्पट्टिकाब्जादिकमपि ¶गमयेन्मानसूत्रात् समन्तात्
तत्तच्छोभानुरूपं गमयतु जगतीसूत्रतः पादुकं च।।१६।।

---

१. 'रां' इति मूलकोशपाठः, २. 'धानक' क.पाठः, ३. 'त' ख.पाठः, ४. 'र्धसिंहस' क.पाठः
* 'स्वोत्सेधमानं' इति, ¶ 'गमयेदन्तरावेशयेद् वा' इति च विवरणरीत्या पाठः।

Shripuram Publications www.shripuram.org

विमर्शिनी

अधिष्ठानावयवानां निर्गममाह - यावदिति। मानसूत्रात् प्रमाणसूत्रादुत्तरबाह्यादिति यावत्। यावत् स्वायोच्चमानं यावत् स्वायमानं यावत् स्वोच्चमानं वा। अत्रायशब्देन योनिरुच्यते। यावत्प्रमाणे स्वस्योपरिगता योनिर्भवति तत्स्वायमानं यावत् पुनर्जगत्या उच्चं त(द्याव?)त् स्वोच्चमानमित्युभयथा जगतीं बाह्यतो गमयतु। तत्तुल्यं जगतीतुल्यम्। कैरवं कुमुदं च पट्टिकाब्जादिकं तच्छिष्टमपि उच्छ्रयसमचरणोनार्धपादांशकम् उच्छ्रयसमं वा पादोनं वा अर्धांशकं वा पादांशकं वा। तत्तच्छोभानुरूपं तस्य तस्यावयवस्य शोभाय आनुरूप्यं यथा भवति तथा। मानसूत्रात् समन्ताच्चतुर्दिशं बहिर्गमयेत्। पादुकं च जगतीसूत्रतो यथायोगं गमयतु। तथाहुः-

"यावत्स्वयोनिरूर्ध्वस्था भवेत् तावद्धि निष्क्रमः"

इति। तथाच-

"तत्समं निष्क्रमं चैव अर्धं पादोनमेव च"

इति। मयमते च-

"यावज्जगति सूत्रान्तस्तावत् कुमुदनिर्गमः।
अम्बुजानां तु सर्वेषामुत्सेधसमनिर्गमः।।
वेत्राणां चैव सर्वेषां चतुर्भागैकनिर्गमः।
एवं नीप्रक्रमं शोभावशात् प्रोक्तं स्वयंभुवा।।
प्रवेशं निर्गमं कुर्यात् सर्वाङ्गानां मसूरके।"

इति।।१६।।

विवरणम्

पादुकाद्यवयवान्तरावयवानामुन्मानमुक्तं, तेषां निष्क्रममाह - यावत् स्वोत्सेधमान[१]मिति। मानसूत्राद् बाह्यतो जगतीं गमयतु। परिधिमानजनितायामविस्तारप्रमाणस्थैर्याय दिक्कोणेषु शङ्कून्मित्वा चतुर्दिशं सूत्राणि प्रसारणीयानि स्युः। तदिह मानसूत्रं गृह्यते। यावत् स्वोत्सेधमानमिति प्रमाणकथनम्। स्वस्या जगत्या उत्सेधमानं यावद्भवति तावद् गमयत्विवित्यर्थः। तत्तुल्यमिति। यावज्जगतीनिर्गमनं तावदित्यर्थः। कैरवं कुमुदकम्।

---

१. 'स्वायोच्चमानम्' इति ख. पाठः

Shripuram Publications
www.shripuram.org

शिष्टं गमयेदन्तरावेशयेद् वेति। पादुके विशेषमाह - गमयतु जगतीसूत्रतः पादुकं चेति।।१६।।

चित्वेत्यधिष्ठानमिहानुरूपं
समं तलीकृत्य शिलाप्रतानैः।
विभज्य गर्भान्तरबाह्यभित्ति-
तन्मध्यनाडी रचयेद् यथार्हम्।।१७।।

विमर्शिनी

अधिष्ठानविधिमुक्त्वा गर्भभित्त्यादिकमाह - चित्वेति। इह इति उक्तप्रकाराणामन्यतमेनापि विधिना। अनुरूपं योग्यमधिष्ठानम्। चित्वा चयनं कृत्वा। शिलाप्रतानैः शिलाप्रस्तरैः समं यथा भवति तथा तलीकृत्य। गर्भान्तरबाह्यभित्तितन्मध्यनाडीः गर्भगृहमान्तरभित्तिं बाह्यभित्तिं तन्मध्यगतां नाडीं च यथार्हं विभज्य रचयेत्।।१७।।

विवरणम्

गर्भ आन्तरबाह्यभित्ती तयोर्भित्त्योर्मध्यनाडी च गर्भान्तरबाह्यभित्तितन्मध्यनाड्यः।।१७।।

वह्न्यादितिथ्यवधिकौजविभागभक्ते
व्यासे गृहस्य नयनाद्युरगान्तिमांशैः।
पञ्चांशकैश्च वसुभागयुतेऽर्धतश्च
गर्भालयस्य विततिर्नवधोदितेति।।१८।।

विमर्शिनी

तत्र गर्भगृहस्य विभागमाह - वह्न्यादीति। गृहस्य मूलगृहस्य। व्यासे वह्न्यादितिथ्यवधिकौजविभागभक्ते त्र्यादिपञ्चदशान्तिमैस्त्रिपञ्चसप्तादिविषमविभागैर्भक्तेंऽशिते सति। नयनाद्युरगान्तिमांशैः क्रमेण द्व्याद्यष्टान्तिमैरंशैः। तथा वसुभागयुतेऽष्टधा विभक्ते। पञ्चांशकैश्च अर्धतः गृहस्यार्धतश्च। इति गर्भालयस्य विततिर्विस्तृतिर्नवधा उदिता। तथा निबन्धने-

www.shripuram.org
Shripuram Publications
www.shripuram.org

"त्र्याद्या पञ्जदशौजांशे[1] व्यासे द्व्याद्यैर्यथाक्रमम्।
पञ्चाष्टांशेऽखिलार्धं वा गर्भंतु नवधा स्मृतम्।।"

इति।।१८।।

विवरणम्

विभागप्रकारं दर्शयति - वह्न्यादीति। वसुभागयुते पञ्चांशकैरित्यन्वयः। अर्धतश्चेति नवमः प्रकारः।।१८।।

*अथ गर्भगृहस्य स्तम्भप्रमाणं प्रथमस्तम्भेभ्यो जनयितुमाह - ब्राह्यस्तम्भसमुच्छ्रय इति। गर्भाधिष्ठानार्थमाह - गर्भेति।।

बाह्या गृहव्यासगजांशतः स्याद्
भित्तिः परा गर्भगजांशतश्च।
नाडी समन्तादुभयान्तराले
संमेल्य वा भित्तियुगं गृहेऽल्पे।।१९।।

विमर्शिनी

भित्तिलक्षणमाह - बाह्येति। गृहव्यासगजांशतः मूलगृहव्यासस्याष्टांशतो बाह्या[2] भित्तिः स्यात्। परा अन्तर्गता भित्तिः। गर्भगजांशतः गर्भगृहस्याष्टांशेन स्यात्। उभयान्तराले भित्तिद्वयस्यान्तराले। समन्तात् परितो नाडी स्यात्। अल्पे गृहे भित्तियुगं भित्तिद्वयम्। सम्मेल्यैकीकृत्य वा स्यात्। तथा मञ्जर्याम्-

"आरूढभित्तिर्विहिता[3]ष्टमांशरेषां बहिः शि[4]ष्टमलिन्दमस्य।
अष्टांशमानादथ बाह्यभित्ति[5]र्भित्तिर्घना स्यादथवाल्पगेहे।।"

इति।।१९।।

---

१. 'शैर्व्यांसे' ख. पाठः, २. 'ह्य', ३. 'ह', ४. 'श्लि', ५. 'त्तिभित्ति', ख. पाठः

* बाह्यस्तम्भसमुच्छ्रये विदलिते भूतादिवस्वन्तिमै-
रेकांशाभ्यधिकोच्छ्रयान् विरचयेत् स्तम्भांस्ततो गर्भगान्।
गर्भस्तम्भसमुच्छ्रये विदलिते भूतादिवस्वन्तिमै-
र्गर्भागारमसूरकं विरचयेदेकांशतः सम्मितम्।।

इत्यधिकपाठमनुसृत्य प्रवृत्तेयं व्याख्या।

Shripuram Publications
www.shripuram.org

विवरणम्

सम्प्रति बाह्यान्तरभित्त्योर्वितानमाह - बाह्येति। बाह्या भित्तिः स्याद् इति सम्बन्धः। आयतिरायामः। गर्भगजांशतः परा चेति। भित्तिरित्यनुषङ्गः। गर्भगृहवितानमष्टधा विभज्यैकं भागं गर्भभित्तेर्वितानं कल्पयेत्। परिशेषो नाडीगृहवितानस्सम्पद्यते। अल्पगृहे भित्तियुगं सम्मेल्य वा कार्यमिति शेषः। द्वयोर्भित्त्योरेकीकरणेन घनभित्तिर्वा स्याद् इत्यर्थः।।१९।।

विस्तारेऽल्पगृहे क्वचिद् विशिखभक्तेऽन्तः पदे पीठिकां
पङ्क्त्या गर्भगृहं करोतु परितः पङ्क्त्या च भित्तिं घनाम्।
तस्मिन् नन्दविभाजिते सति विधायैवं ततो वीथिकां
भित्तिं चोभयपङ्क्तितो विरचयेद् द्वारं च कोष्ठेऽग्रतः।।२०।।

विमर्शिनी

पक्षान्तरेण तेषां विभागमाह - विस्तार इति। क्वचिदल्पगृहे विस्तारे विशिखभक्ते आयामतो विस्तारतश्च पञ्चविभक्ते। तत्रान्तःपदे पीठिकां देवस्य पीठं करोतु। पङ्क्त्या तदावरणपङ्क्त्या गर्भगृहं च। परितस्तदावरणे पङ्क्त्या घनां भित्तिं च। तत्रापि प्रकारान्तरमाह - तस्मिन्निति। तस्मिन् गृहे। नन्दविभाजिते आयामतो विस्तारतश्च नवधा कृते सति। एवमुक्तक्रमेण पीठिकां गर्भगृहमान्तरभित्तिं च विधाय। तत उभयपङ्क्तित आवरणपङ्क्तिद्वयेन। क्रमाद् वीथिकां नाडीं बाह्य[1]भित्तिं च विरचयेत्। बाह्यभित्तावन्तर्भित्तौ च अग्रतः कोष्ठे अग्रकोष्ठप्रमाणेन द्वारं च विरचयेत्। तथाहुः-

"व्यासेऽभिकृतिकोष्ठो स्यात् पीठं कोष्ठेन मध्यतः।
तद्बहिर्वसुकोष्ठानां पङ्क्त्या गर्भगृहं भवेत्।।
कोष्ठपङ्क्त्या बहिर्भित्तिस्तत्र द्वारं तु कोष्ठतः।
एकभित्त्येकतलकं दैवं धामेदमीरितम्।।
तद्वत् प्रासादविस्तारस्यैकाशीतिपदस्य तु।
मध्यस्थनवकोष्ठैः स्यात् सपीठं गर्भमन्दिरम्।।
तद्बाह्ये कोष्ठपङ्क्त्या तु भित्तिं द्वारं च कल्पयेत्।

---

१. 'ह्ये'

Shripuram Publications
www.shripuram.org

तद्बाह्यपङ्क्त्याः परितः कल्पयेन्मध्यनाडिकाम्[१]।।
प्रासादभित्तिस्तद्बाह्ये पङ्क्त्या द्वारं च कल्पयेत्।
त्रिहस्ते तु घना भित्तिः पञ्चहस्तेऽपि वा तथा।।”
इति।।२०।।

विवरणम्

अथापरं विभागप्रकारमाह - विस्तार इति। द्वारं च कोष्ठेऽग्रत इत्युभयपक्षसाधारण-मेतत्।।२०।।

इदानीं तलीकृते गर्भगृहे प्रतिष्ठास्थानजिज्ञासायामाह - *कृत्वा[२] गर्भगृहमिति। गर्भगृहप्रस्तारे प्रागग्राण्युदगग्राणि चाष्टाष्ट सूत्राण्यास्फाल्य सप्तवर्गपदोपेतं सम्पादयेत्। तत्र मध्यमं पदं ब्राह्मं ततोऽनन्तरा परितः पङ्क्तिर्दैविकपदानि ततोऽपि परितो मानुषपदानि ततः परितस्त्वासुरपदानि च विज्ञेयानि। ब्राह्मे पदे पञ्चदशांशकान् विरचयेत्। मध्यगतं पदं दक्षिणोत्तरसूत्रैः त्रयोदशभिः पञ्चदशायतभागान् विदध्यात्। सौम्याग्रसूत्रैरिति सर्वत्र सम्बध्यते। तद्बाह्यस्थितेति। प्राग्द्वारप्रासादे पश्चिमतः पश्चिमद्वारे तु पूर्वत इत्यर्थः। आवारकान्यावराणानि। पङ्क्त्य इति यावत्। विश्वे त्रयोदश। उमेशा एकादश।।

महत्यल्पे चेशलिङ्गे ब्राह्मे अन्तः अनन्तरे चांशे प्रतिष्ठितपदं प्रोक्तमित्येवं सर्वत्र सम्बन्धनीयम्। अन्तरिति। मध्ये पञ्चदशसु भागेषु अष्टमे भागे। अनन्तरे ततो बहिर्द्वितीयभागे इत्यर्थः।

पृष्ठगमनमुक्तं तत्र उदग्गमनमाह - कृत्वेति। अत्रोदङ्मुखं सूत्रं कृत्वेत्यन्वयः। यत्र भागविशेषे प्रतिष्ठापदं मध्येऽङ्कितं तत्र तस्मिन्नङ्क उदगग्रमपरमृजुसूत्रं सूत्रयेदित्यर्थः। द्वारस्य विस्तारमानं षड्विंशत्यधिकशतांशितं कल्पयित्वा तदेकांशमात्रं तस्मादङ्कादुत्तरतो

---

१. ‘काः’, २. पङ्क्त्या इति, ख. पाठः

* कृत्वा गर्भगृहं कुलाद्रिकृतिकोष्ठाढ्यं समन्तात् पदे
ब्राह्मे पञ्चदशांशकान् विरचयेत् सौम्याग्रसूत्रैः समम्।
तद्पृष्ठस्थितदेवमानुषपिशाचावारकेषु क्रमाद्
विश्वोमेशनवांशकानपि ततः स्वं स्वं पदं कल्पयेत्।।
ब्राह्मेंऽशेऽन्तरनन्तरे महति चाल्पे चेशलिङ्गे हरौ
तार्तीये द्रुहिणांशमध्यपदतस्तुर्ये गुहेशाच्युते।
षष्ठे सुम्भजिति प्रतिष्ठितिपदं शाङ्गींश्वरे वाष्टमे
प्रोक्तं शास्तरि षोडशे गणपतौ विंशे तथैकोत्तरे।।

Shripuram Publications
www.shripuram.org

नमयित्वात्र प्रागग्रं सूत्रमापातयेत्। सर्वत्रेति पूर्वत्रान्वयः। ईशहरीशयोः पुनरिदं वार्चांशत इति। ईशे तावल्लिङ्गविष्कम्भप्रमाणं सप्तधा भङ्क्त्वा सप्तमं भागं पञ्चधा भजेत्। स यावान् भागः तावन्तमुत्तरेण नयेद्वा। हरीश्वरेऽपि बिम्बमध्यपरिधिमानं चतुर्विंशतिधा भङ्क्त्वा एकांशमुत्तरेण गमयेदित्यभिप्रायः। अथाखिले दिश्यैश्यां गमयेदिति प्रागुदग्गमन-मुक्तम्। कियदित्याह - सन्धितोऽर्चोद्भवं यवं यवयुगं वेति। ननु किमिदं अर्चोद्भवत्वं नाम यवस्येति चेद् उच्यते। ... ...।।

*एवं प्रतिष्ठास्थानं प्रतिपादितम्। अथ गोमुखस्थानं प्रतिपादयति - सर्वत्रेति। उदीच्यसूत्रेऽम्बुसूत्रं कल्पयित्वा विवरं सूत्रं रचयत्वित्यन्वयः। उदीच्यसूत्रं नाम समदक्षिणोत्तरसूत्रं विवक्षितम्। विवरकल्पनं भित्तिनिर्माणसमये द्रष्टव्यम्।।

***प्रत्यन्ते वा गलान्ते रचयतु तदुदङ्मध्यसूत्रेऽम्बुमार्गं**
सोमेशानान्तरोद्यद्वसुनवदशभागादिकं वा व्यतीत्य।
मासूरोत्सेधमात्रं चरणविरहितं वार्धवृद्धं प्रणालं
निर्यातं बाह्यतोऽन्तर्विनिहितमधिकुड्यं तदर्धांशमात्रम्।।२१।।

विमर्शिनी

ततः प्रणाललक्षणमाह - प्रत्यन्त इति। प्रत्यन्तेऽधिष्ठानस्य प्रतेरन्ते गलान्ते वा। तदुदङ्मध्यसूत्रे गर्भगृहस्योदग्गतमध्यसूत्रे। सोमेशानान्तरोद्यद्वसुनवदशभागादिकं सोमेशानयोरन्तरगतदैर्घ्यस्याष्टभागं वा नवभागं वा दशभागं वा, आदिशब्देन शिवादिमूर्ति-वशाद् विहितं प्रमाणं वा। व्यतीत्य मध्यसूत्रात् पूर्वतोऽतिक्रमय्य। अम्बुमार्गं जलयात्रामार्गयुक्तं प्रणालं रचयतु। तत्तु प्रणालं मासूरोत्सेधमात्रम् अधिष्ठानोच्चमानम्। तस्माच्चरणविरहितं वा तथार्धवृद्धमर्धाधिकं वा। बाह्यतो निर्यातं निर्गतम्। तदर्धांशमात्रमन्तरधिकुड्यं कुड्ये विनिहितं स्थितं च रचयतु। तथा तन्त्रान्तरे-

---

कृत्वोदङ्मुखमत्र सूत्रमथ मध्याद् द्वारविस्तारत-
स्तूलकृत्याढ्यशतांशकान् प्रतिगमय्योदीचि चैन्द्राग्रकम्।
सर्वेष्वीशहरीशयोः पुनरिदं वार्चांशतोऽथाखिले
दिश्यैश्यां गमयेद् यवं यवयुगं वार्चोद्भवं सन्धितः।।

इत्यधिकपाठमनुसृत्य प्रवृत्तेयं व्याख्या।

* अस्या व्याख्याया आधारभूतं पद्यं न दृश्यते।,

* विवरणरीत्यात्र पाठभेदोऽस्तीति प्रतीयते।

www.shripuram.org
Shripuram Publications

“धाम्नः प्रतिग्रीवगसोमसूत्रात् प्राग्दन्तभागं प्रविधाय तेषु।
द्व्येकं शिवे द्वित्रिहरौ त्रिपञ्च शेषेष्वतीत्योदकमार्गसूत्रम्।।
प्रतेः पुरोऽर्धं वसुनन्ददिग्भिर्विभज्य भागेष्वखिलामराणाम्।
एकैकभागं समतीत्य कुर्याद् विचक्षणो गोमुखमध्यमत्र।।
स्यात् कुट्टिमं गोमुखदीर्घमानं पादोनितं वा तदथार्धयुक्तम्।
व्यालाननं स्यादिह शुण्डुभेदो[१] मणिश्च वल्लीपरिशोभितं च।।”

काश्यपीये च-

“भान्वङ्गुलं समारभ्य गुणाङ्गुलविवर्धनात्।
चतुर्विंशाङ्गुलं यावत् तावत् पञ्चविधायतम्।।
भित्तिबाह्यगतं ह्येतत् तस्यार्धं गर्भगेहके।
वेशयित्वाथवा भित्तेरभ्यन्तरगतं तु वा।।”

इति।।२१।।

विवरणम्

अम्बुसूत्रं गर्भगृहभाविजलस्यन्दनसूत्रम्। प्रत्यन्ते गळान्ते वा इति सर्वशेषो योज्यः। गळान्ते पट्टिकान्ते वेत्यर्थः। शिवशशधरसूत्रान्तराळेऽष्टाङ्काशाभिर्विभक्तेंऽशम- तीत्य वा रचयत्वित्यन्वयः। उदग्दिक्सूत्रस्य सोमेशयोरन्तरमष्टधा नवधा दशधा वा भङ्क्त्वा सोमसूत्रादेकांशेन प्रागगमयित्वा तत्राम्बुसूत्रं कार्यमित्यर्थः। अथवा एकं अंशमिति गिरिश एवैतत्। त्रिशरपरिमितान् त्रीन् वा पञ्च वांशानित्यर्थः। गोमुखमानं स्वतन्त्रमाह - आरभ्येति। बहिर्निर्यातं गळात् प्रतेर्वा बहिर्निर्गतम्। अतोऽर्धमिति। द्वावंशौ बहिरेकस्त्व- न्तरित्यर्थः।।२१।।

***स्वायामाग्न्यंशकादिप्रविततनिजमूलानलांशादिविस्ती-**
र्णाग्रं विस्तारतुल्यत्रिपददलघनं त्र्यंशक्लृप्ताम्बुमार्गम्।
व्यात्तव्यालास्यमध्यप्रसृमरनिजमूलोज्ज्वलं गोमुखं त-
न्मुक्तादामादिवल्लीवलयपरिगतं शुण्डुभिर्मण्डितं च।।२२।।

१. ‘भोक्तो म’ ख. पाठः
* विवरणरीत्यात्रापि पाटभेदोऽस्तीति प्रतीयते।

Shripuram Publications
www.shripuram.org

विमर्शिनी

स्वायामाग्न्यंशकादिप्रविततनिजमूलानलांशादिविस्तीर्णाग्रं स्वायामात् स्वदीर्घात् त्र्यंशकादिना विस्तीर्णस्य निजमूलस्य त्र्यंशादिना विस्तीर्णमग्रं यस्य तत्। तथा विस्तारतुल्यत्रिपददलघनं विस्तारतुल्यं[१] त्रिपदमर्धं वा घनं यस्य तत्। तथा त्र्यंशक्लृप्ताम्बुमार्गं विस्तारस्य त्र्यंशेन क्लृप्तमम्बुनो मार्गं यस्य तत्। तथा व्यात्तव्यालास्यमध्यप्रसृमरनिज-मूलोज्ज्वलं व्यात्ताद् विशेषेण विवृताद् व्यालाननमध्यात् प्रसरणशीलेन निजमूलेनोज्ज्वलं यत् तत्। तथा मुक्तादामादिवल्लीवलयपरिगतं मुक्तादामादिरूपाभिर्वल्लीभिर्वलयैश्च परिगतं व्याप्तं यत् तत्। तथा शुण्डुभिरलङ्कारविशेषैश्च मण्डितं च गोमुखापराख्यं प्रणालं रचयतु। तथा काश्यपीये-

"वस्वङ्गुलं समारभ्य द्विव्यङ्गुलविवर्धनात्।
कलाङ्गुलावसानं तु विस्तारं पञ्चधा क्रमात्।।
तन्मूलतारपञ्चांशत्रिभागं चा[२]ग्रविस्तृतम्।
तद्विस्तारसमं वाथ त्रिभागं वार्धकं घनम्।।
विस्तारस्य त्रिभागै[३]कच्छिद्रतारं नतं यथा।
ना[४]लं मध्ये तु कर्तव्यं निम्नोन्नतविवर्जितम्।।
मूलादग्रं नतं किञ्चिन्मूलं सिंहास्यबन्धितम्।"

इति।।२२।।

विवरणम्

तत्समाङ्घ्र्यूनदलघना ततित्र्यंशक्लृप्ताम्बुकुल्या चेति विग्रहः।।२२।।

स्तम्भाः कोणचतुष्कमध्यविनिवेश्याः स्युः प्रतेरूर्ध्वतः
सामान्येन समान्तराः सुरविमानेषूदिता द्वादश।
एते विंशतिरीशदोः प्रभृतिकेष्वेतेषु ते नैकधा
चोक्ताः स्वाकृतिभूषणक्रमवशादेष्वर्पयेच्चोत्तरम्।।२३।।

विमर्शिनी

कुड्यस्तम्भस्थापने नियममाह - स्तम्भा इति। सुरविमानेषु देवालयेषु। प्रतेरूर्ध्वतः

---

१. 'ल्यत्रि' क. ख. पाठः, २. 'त्च', ३. 'गे कं छिद्र', ४. 'लम' क. पाठः

Shripuram Publications
www.shripuram.org

प्रतेरुपरिभागे। सामान्येन त्रिकरादिषु कोणचतुष्कमध्यविनिवेश्याः कोणानां चतुष्के तन्मध्ये द्वौ द्वौ च निवेश्याः स्थाप्याः। समान्तराः समभक्तेनान्तरेण युक्ताः द्वादश स्तम्भा उदिताः स्युः। ईशदोः प्रभृतिकेषु एकादशकरादिषु। एतेषु सुरविमानेषु। एते स्तम्भा विंशतिरुदिताः। ते स्तम्भाः। स्वाकृतिभूषणक्रमवशात् स्वाकृतिवशात् स्वभूषणवशाच्च। नैकधा अनेकधा चोक्ताः। एषु स्तम्भेषूत्तरमर्पयेच्च। तथा निबन्धने-

"द्वादशैव चतुष्कोणमध्यस्थाः कुड्यपादकाः।
एकादशकरे स्तम्भा विंशतिर्मण्डनान्विताः।।
समाः स्तम्भान्तराः सर्वे प्रासादे[१] सार्वदेशिके।
विषमस्तम्भभागं तु वास्तु वस्तुविनाशनम्।।"

इति।।२३।।

विवरणम्

*इदानीं स्तम्भानां स्थानानि सङ्ख्याश्च दर्शयति - स्तम्भा इति। चतुर्षु कोणेष्वेकैकमन्तरा द्वौ द्वाविति द्वादश स्तम्भाः स्युः। यद्वा कोणचतुष्कमन्तरा त्रयस्त्रयः स्तम्भाः स्युः। तत्र पक्षे मध्यमस्तम्भं द्विधा कल्पयित्वा घनद्वारमभितो द्वौ द्वावर्धस्तम्भौ भवतः। ईशदोःप्रभृतिकेष्वेतेषु एते विंशतिरित्यन्वयः। एकादशकरप्रभृतिप्रासादेषु स्वाकृतिभूषणक्रमवशात् ते नैकधेत्यन्वयः।।२३।।

कार्याः स्युश्चरणा युगाष्टनृपकोणाः सर्वतो वर्तुला
विस्तारत्रिगुणोपरित्रिगुणविस्तारोन्मिताष्टाश्रकाः।
मूलोद्भावितकर्णसूत्रचतुरश्रोर्ध्वांशवृत्ताः पुनः
शुण्डोद्भेदविचित्रवृत्तरुचिरा वारब्धगेहोचिताः।।२४।।

विमर्शिनी

स्तम्भानामाकृतिभेदमाह - कार्याः स्युरिति। चरणाः स्तम्भाः। सर्वतो युगाष्टनृपकोणा वा सर्वतश्चतुष्कोणाः तथाष्टकोणाः षोडशकोणाश्च। सर्वतो वर्तुला वा वृत्ताकाराः। विस्तारत्रिगुणोपरित्रिगुणविस्तारोन्मिताष्टाश्रका वा विस्तारेण त्रिगुणितोपरिभागे त्रिगुणितेन

---

१. 'प्रसारे सा' क. पाठः
* २३, २४, २५ श्लोकव्याख्याः विवरणरीत्या ३४ श्लोकानन्तरं पठिताः।

Shripuram Publications
www.shripuram.org

विस्तारमानेनोन्मितेनाष्टाश्रेण युक्ताः। मूलोद्भावितकर्णसूत्रचतुरश्रोर्ध्वांशवृत्ता वा मूलगतचतुरश्रस्य कर्णसूत्रमानं चतुरश्रं कृत्वा तदूर्ध्वतो वृत्तेनाकारेण[1] युक्ताः। पुनः शुण्डोद्भेदविचित्रवृत्तरुचिरा वा शुण्डोद्भेदैर्भिन्नवेत्राकारैरलङ्कारविशेषैर्विचित्रेण वृत्तेन सुन्दराः। आरब्धगेहोचिताः आरब्धस्य गृहस्य योग्याः स्युः। तथा निबन्धने-

पञ्चाश्रिजास्त्रयो वृत्तास्तुर्यश्रः पोतिकान्वितः।
स्तम्भः साधारणो धाम्नां कुम्भमण्ड्यादिमण्डितः।।
विस्तारत्रिगुणादूर्ध्वमष्टाश्रस्तावता कृतः।
स्तम्भः सपोतिकाकुम्भस्तथा मध्याश्रकः स्मृतः।।
आमूलतः कृतोऽष्टाश्रः सर्वाष्टाश्रः सपोतिकः।
षोडशाश्रिकृत[2]श्चैव वीरकाण्डसमुज्ज्वलः[3]।।
कुम्भतन्मण्डनैर्युक्तः षोडशाश्रः सपोतिकः।
मूले कर्णस्थमानेन चतुरश्रोऽथ वर्तुलः।।
कुम्भमण्डनसंयुक्तो मूलाश्रश्च सपोतिकः।
सर्वत्र वर्तुलो युक्तः कलशेन च मण्डनैः।।
पोतिकासहितो मूर्ध्नि वृत्तपादस्तु कीर्तितः।।
कुम्भमण्डनसंयुक्तो[4] वीरकाण्डस्थपोतिकः।।
शुण्डभेद[5]समो वृत्तः शुण्डपाद इति स्मृतः।"

इति।।२४।।

विवरणम्

तदीयं दिङ्मात्रं दर्शयति - कार्याः स्युरिति। शुण्डोद्भेदविचित्रवृत्तरुचिरा वेति।।२४।।

ओमां कुर्वीत दण्डद्वयततचरणोच्चां घटं दण्डयुग्म-
व्यासं साङ्घ्र्यादिदण्डोच्छ्रयमुदधिततां दण्डतोऽङ्घ्र्यूनतीव्राम्
मण्डिं दण्डप्रथाङ्घ्र्यंशकरहितघनोवीरकाण्डं त्रिसार्धे-
षूदन्वद्दण्डदीर्घां चरणततदर्धोच्छ्रयां पोतिकां च।।२५।।

---

१. 'त्ताका', २. 'श्रकृतं चैव', ३. 'लाः' क. पाठः, ४. 'क्ते' ख. पाठः, ५. 'दे' क. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

स्तम्भावयवभूतानामोमादीनां लक्षणमाह - ओमामिति। दण्डद्वयततचरणोच्चां दण्डद्वयविस्तारां दण्डपादेनोच्चामोमां[1] स्तम्भपीठत्वेन कुर्वीत। घटं घटाकारेण कल्पनीयमवयवम्। दण्डयुग्मव्यासं दण्डद्वयविस्तारं साङ्घ्र्यादिदण्डोच्छ्रयं सपादादिदण्डोत्सेधं च। मण्डिं घटस्योपरि स्थाप्यां फलकाम्। दण्डतः उदधिततां चतुर्दण्डसमविस्ताराम्। अङ्घ्र्यूनतीव्राम्। अङ्घ्र्यूनेन दण्डेन घनां च। वीरकाण्डं मण्ड्या उपरि कल्पनीयमवयवम्। दण्डप्रथाङ्घ्र्यंशकरहितघनं दण्डविस्तारं तत्पादांशहीनतीव्रं च। पोतिकां वीरकाण्डोपरि उत्तरस्याधः कल्पनीयाम्। त्रिसार्धेषूदन्वद्दण्डदीर्घां त्रिदण्डेन वा सार्धपञ्चदण्डेन वा चतुर्दण्डेन वा दीर्घाम्। चरणततदर्धोच्छ्रयां स्तम्भमूलविस्तारेण विस्तीर्णां तदर्धोत्सेधयुक्तां च। तथाहुः-

"स्तम्भमूलघनाः शैला ओमा द्विगुणविस्तराः।
तुर्यश्चा मध्यतोगर्ता दण्डपादेन चोद्गताः।।
दण्डपादेन तीव्रा च तच्चतुर्गुणाविस्तारा।
मण्डिः पद्मविचित्रा च माल्यनागफणाकृतिः[2]।।
पादोनतीव्रं तुर्यश्रं वीरकाण्डं च दण्डतः।
पोतिकास्त्वायता दण्डैः सार्धपञ्चचतुस्त्रिभिः।।
अर्धत्रिभागपादस्था तलिः स्याद् दण्डविस्तरा।"

तथाच काश्यपीये-

विस्तारसदृशोत्सेधाः पञ्चदण्डायतान्विताः।।
उत्तमाः पोतिकाः ख्यातास्तारद्वित्र्यंशमुन्नताः।
चतुर्दण्डायतोपेता मध्यमा सा प्रकीर्तिता।।
विस्तारस्यार्धतुङ्गा तु गुणदण्डायतान्विता।
कन्यसा पोतिकाख्याता...................
मूलपादसमव्यासा श्रेष्ठा मध्ये तु मध्यमा।
अग्रपादविशालस्य समा कन्यसपोतिका।।"

इति।।२५।।

---

१. 'कु' ख. पाठः, २. 'ल्या' क. ख. घ. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

ओमा स्तम्भस्य पीठं स्तम्भविस्तारद्विगुणविस्तारं स्तम्भविस्तारार्धघनम्। घटस्तम्भोर्ध्वभागगतः कुम्भः। साङ्घ्र्यादिदण्डोच्छ्रयमिति। पादसहितो दण्डः स्वार्धसहितो दण्डः एवमादि यथाशोभमवगन्तव्यम्। मण्डिः स्तम्भाग्रफलका। उदधिततामिति। फलकोपरि पोतिकाधो वीरकाण्डं नामावयवः। घनमुन्नतिरूपम्। दण्डपञ्चकचतुष्क-त्रिकायामा पोतिका उत्तरसमविताना दलाद्युच्छ्रिता उत्तरदलादिमानेन घना।।२५।।

***भित्तिव्यासमिनैर्विभज्य बहिरन्तः पञ्चसप्तांशकान्**
कृत्वा कल्पितसूत्रसंस्थनिजमध्यद्वारयोगान्यथ।
मध्यान्मध्यमतीत्य दिक्षु रचयेद् द्वाराणि तूर्ध्वं प्रते-
रग्र्यद्वारमृते घनानि कृतशोभान्यूर्ध्वतस्तोरणैः।।२६।।

विमर्शिनी

द्वारकल्पनमाह - भित्तीति। भित्तिव्यासं भित्तेर्विस्तारम्। इनैः द्वादशभिर्विभज्य बहिः पञ्चांशकान् अन्तः सप्तांशकांश्च कृत्वा। कल्पितसूत्रसंस्थनिजमध्यद्वारयोगानि तत्र कल्पिते सूत्रे संस्थितानि निजमध्यानि निजाया द्वारशाखाया मध्यगतसूत्राणि द्वारशाखाभिधानि द्वारयोगानि। तथाविधानि द्वाराणि चतसृषु दिक्षु तु प्रतेरूर्ध्वम्। मध्यान्मध्यमतीत्य प्रासादमध्यसूत्राद् द्वारमध्यसूत्रं किञ्चिदतीत्य नीत्वा रचयेत्। अग्र्यद्वारमृते अग्र्यद्वारं वर्जयित्वा। घनानि बन्धद्वाराणि। ऊर्ध्वतस्तोरणैः कृतशोभानि च रचयेत्।

"योगं तु स्थापयेद् विप्र! शान्तिहोमपुरः सरम्।
भित्तिव्यासे तु भान्वंशे बाह्यात् पञ्चावसानकम्।।
अभ्यन्तरात् तु सप्तांशसमं योगस्य मध्यमम्।"

इति। तन्त्रान्तरे च-

"मुहूर्ते स्थापयेद् विद्वान् मध्यान्मध्यं विमुच्य च'

इति। तथा च गुरुदेवः-

"सर्वत्र प्रत्युपर्येव द्वारं कुर्याद् विचक्षणः"

* 'वास्त्वाधारमिनैः' इति विवरणरीत्या पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

इति[1]। मध्यान्मध्यमतीत्येत्यस्यायमाशयः— वक्ष्यमाणमग्र्यद्वारविस्तारमेकविंशतिभागं कृत्वा एकांशं वामतस्त्यक्त्वा तत्र द्वारमध्यं यथा भवति तथा रचयेत्। अपराण्यपि त्रीणि द्वाराणि प्रदक्षिणक्रमेण षट्त्रिंशद्भागं चतुष्षष्टिभागमेकाशीतिभागं च कृत्वैकैकभागमतीत्य द्वारमध्यानि रचयेत्। अथवा घनद्वारि त्रीण्यपि षट्त्रिंशं भागं वा चतुष्षष्टिभागं वा एकाशीतिभागं वातीत्य द्वारमध्यानि रचयेदिति। तथाहुः-

"स्वव्यासमूर्छाघृतियुग्ददद्वन्द्वेन्दुगजांशकैः।
द्वारं प्रदक्षिणश्चाल्यां स्वेष्वेकेनैव वा घनाः (?)।।२६।।

विवरणम्

*अधिष्ठानजन्यमपि मानमाह - वास्त्विति। वास्त्वाधारोऽधिष्ठानं साधारणमलङ्कारादिकं द्रष्टव्यम्। अथ द्वारस्थानानि कथयति - अतीत्य मध्यमिति।।२६।।

गर्भागारप्रताने शिववसुदिनकृच्छैलतिथ्यंशितेऽशै-
र्बिम्बद्वारोच्छ्रयः स्याद् गिरिशरतुरगाम्नायमातङ्गसङ्ख्यैः।
उत्सेधेऽत्रैकविंशत्यतिधृतितिथिविश्वाङ्कभक्ते प्रक्लृप्ते
व्यासो दिङ्नन्दशैलोर्म्युदधिपरिमितांशैः क्रमात् कल्पनीयः।।२७।।

विमर्शिनी

कीदृशौ द्वारोत्सेधविस्तारावित्याकाङ्क्षायामाह - गर्भागारेति। गर्भागारप्रताने गर्भगृहविस्तारे। शिववसुदिनकृच्छैलतिथ्यंशिते एकादशधाष्टधा द्वादशधा सप्तधा पञ्चदशधा भक्ते। क्रमेण गिरिशरतुरगाम्नायमातङ्गसङ्ख्यैः सप्तभिः पञ्चभिः सप्तभिश्चतुर्भिरष्टभिश्चांशैः। बिम्बद्वारोच्छ्रयः बिम्बे स्थाप्ये द्वारोच्छ्रयः स्यात्। अत्रैवं प्रक्लृप्ते उत्सेधे एव क्रमेण। एकविंशत्यतिधृतितिथिविश्वाङ्कभक्ते एकविंशतिधैकोनविंशतिधा पञ्चदशधा त्रयोदशधा नवधा वा भक्ते। क्रमाद् दिङ्नन्दशैलोर्म्युदधिपरिमितांशैः दशभिर्नवभिः सप्तभिः षड्भिश्चतुर्भिश्चांशैर्व्यासः कल्पनीयः स्यात्। तथाह भास्करः-

"प्रतिमाद्वारमानं तु गर्भागारेण चोच्यते।
एकदशात् सप्तोत्सेधमेकविंशाद् दशविस्तरम्।।
अष्टांशे पञ्चभागोच्चं नवदशे नवविस्तरम्।

---

१. 'ति। कादृशा' क. ख. पाठः
* इतः प्रभृति ३४ पद्यपर्यन्तव्याख्या विवरणे २२ पद्यानन्तरं पठिताः।

Shripuram Publications
www.shripuram.org

द्वादशांशे सप्तोत्सेधं त्रिपञ्चे सप्तविस्तरम्।।
सप्तभागे चतुष्कोच्चं त्रयोदशे षड्विस्तरम्।
तिथिभक्तेऽष्टसङ्ख्योच्चं नवभक्ते चतुर्विस्तरम्।।

इति।।२७।।

विवरणम्

प्रधानद्वारप्रमाणं गर्भगेहाज्जनयितुमाह - गर्भागारप्रतान इति।।२७।।

व्यासे गर्भनिकेतनस्य दहनेषुद्वारनेत्रांशिते
लिङ्गद्वारसमुच्छ्रयं वितनुयाद् द्वित्रीषुचन्द्रांशकैः।
तस्मिन् द्वारसमुच्छ्रयेऽथ नयनात्यष्टीशशैलांशिते
तद्विस्तारमिलामहोरगशराग्न्यंशैः क्रमात् कल्पयेत्।।२८।।

विमर्शिनी

लिङ्गे स्थाप्ये द्वारोत्सेधविस्तारयोर्विशेषमाह - व्यास इति। गर्भनिकेतनस्य गर्भगृहस्य व्यासे। दहनेषुद्वारनेत्रांशिते त्रिभिः पञ्चभिर्नवभिर्द्वाभ्यां वा भक्ते। क्रमाद् द्वित्रीषुचन्द्रांशकैः द्वित्रिपञ्चैकांशकैर्लिङ्गद्वारसमुच्छ्रयं वितनुयात्। तस्मिन्नेव द्वारसमुच्छ्रये। क्रमेण नयनात्यष्टीशशैलांशिते द्विधा सप्तदशधा एकादशधा सप्तधा च भक्ते। क्रमाद् इलामहोरगशराग्न्यंशैः एकेनाष्टभिः पञ्चभिस्त्रिभिर्भागैस्तद्विस्तारं कल्पयेत्। तथाच भास्करः-

"अथ तद् द्वारमानं तु गर्भागारेण चोच्यते।
त्रिभागद्वयमुत्सेधमुत्सेधार्धं तु विस्तरम्।।
पञ्चभागत्रिभागोच्चं सप्तदशाष्टविस्तरम्।
नवांशात् पञ्चोत्सेधं दशैकांशात् पञ्चविस्तरम्।।
विस्तारार्धं कनिष्ठोच्चं सप्तभागं त्रिविस्तरम्।
गर्भागारप्रमाणेन लिङ्गद्वारस्य मानकम्।।

इति।।२८।।

Shripuram Publications
www.shripuram.org

कुर्यात् सर्वसुरेषु शैलवसुनन्दाशांशितेऽङ्घ्र्युच्छ्रये
द्वारोत्सेधमिहैकभागरहितं विस्तीर्णमात्मार्धतः।
योगौ स्तम्भसमाधिपाददलविस्तीर्णौ[1] स्फुरद्वाजनौ
विस्तारार्धघनौ भुवङ्गमपतङ्गाढ्यौ च मूलाग्रयोः।।२९।।

विमर्शिनी

स्तम्भवशादपि द्वारभेदमाह - कुर्यात् सर्वसुरेष्विति। सर्वदेवेषु अङ्घ्र्युच्छ्रये स्तम्भोच्चे। शैलवसुनन्दाशांशिते सप्तधाष्टधा नवधा दशधा वा विभक्ते। इह एकभागरहितम् एकांशहीनं द्वारोत्सेधं कुर्यात्। आत्मार्धतः आयामार्धतो विस्तीर्णं च। द्वारशाखालक्षणमाह- योगाविति। योगौ द्वारशाखाख्यौ। स्तम्भसमाधिपाददलविस्तीर्णौ। स्तम्भविस्तारसमेन वा सपादस्तम्भविस्तारेण वा सार्धस्तम्भविस्तारेण वा विस्तीर्णौ। स्फुरद्वाजनौ वाजनेन स्फुरन्तौ। विस्तारार्धघनौ स्वविस्तारार्धतीव्रौ। मूलाग्रयोर्मूले अग्रे च। क्रमाद् भुवङ्गमपतङ्गाढ्यौ भुवङ्गमेन पतङ्गेन च युक्तौ च कुर्यात्। तथाह गुरुदेवः–

"स्तम्भायामे तु दिङ्नन्दवसुसप्तांशके क्रमात्।
नन्दवस्वृषिषड्भागैर्द्वारोत्सेधं प्रकल्पयेत्।।
तदर्धविस्तृतं च स्याद् द्वारं देवालयेषु वै।
सपादपादविस्तारस्तदर्धबहलो दृढः।।
कवाटयोगस्तत्पार्श्वे वाजनं पूर्ववद् भवेत्।"

इति। तथाच काश्यपः–

"पादविष्कम्भमानं वा सपादं सार्धमेव वा।
द्वारयोगस्य विस्तारं तस्यार्धं घनमुच्यते।।"

इति।।२९।।

विवरणम्

*धरा भूमिः। द्वाराङ्गभूतानां योगादीनां प्रमाणमाह - योगा इति। योगा द्वारपार्श्वयोरध उपरि च स्थाप्याः। दण्डो हि पूर्वमुक्तः। तत्र भुवङ्गमः कार्यः। अयमधस्ताद्योगयोर्मध्ये शाययितव्यः। कराग्नीति। निजविस्तारं दण्डमितं करादिभक्तं

---

१. 'स्तारमा' इति मूलकोशपाठः
* अनयोर्वाख्ययोर्मूलपाठोऽन्य इति प्रतिभाति।

Shripuram Publications
www.shripuram.org

कृत्वा शक्त्यादिभागं गृहीत्वा तेनोच्छ्रयं कल्पयेत्। अथ फलकेति। उत्तरादधोऽयमलङ्कारः। अष्टमङ्गलानि मण्डपसंस्कारे वर्तन्ते।।

बहिर्द्वारप्रमाणमाह - स्तम्भोच्च इति। अत्रेति स्तम्भोच्चग्रहणं तच्छेषितांघ्र्युच्छ्रये दिग्दलिते षड्भिरिनभक्ते सप्तभिश्चांशकैः पतङ्गं तच्छिष्टेन भुवङ्गमं च रचयेदित्यन्वयः। स्तम्भोच्चाज्जनितं यद्द्वारोच्चं तन्मानं स्तम्भोच्चमानं जह्यात्। तत्र यावदवशिष्यते सोऽयं तच्छेषितांघ्र्युच्छ्रय उक्तः। तद्दशधा भङ्क्त्वा षड्भिः पतङ्गमं शिष्टैश्चतुर्भिः भुवङ्गमं चेत्यर्थः।।२९।।

द्वारोत्सेधनियुक्तशेषचरणोत्सेधे शरांशीकृते
द्व्यंशेनाधरपट्टिकां मितघनां सार्धेन वाङ्कांशिते।
हीनां वाजनकेन योगवितितां शिष्टांशतः पट्टिका-
मूर्ध्वस्थामथ मङ्गलाढ्यफलकां युक्त्योर्ध्वपट्ट्यूर्ध्वतः।।३०।।

विमर्शिनी

द्वाराच्छिष्टांशविनियोगमाह - द्वारोत्सेधेति। द्वारोत्सेधनियुक्तशेषचरणोत्सेधे स्तम्भोत्सेधाद् द्वारोत्सेधं त्यक्त्वा शिष्टे। शरांशीकृते पञ्चधा कृते। द्व्यंशेन मितघनां कृततीव्राम्। अधरपट्टिकां भुवङ्गमाख्याम्। वाजनकेन हीनां योगवितितां द्वारशाखासम-विस्तृतां च कुर्यात्। अङ्कांशिते नवधा कृते। सार्धेनार्धसहितेन द्व्यंशेन वा कुर्यात्। शिष्टांशत ऊर्ध्वस्थां पट्टिकां पतङ्गाख्यां च। ऊर्ध्वपट्ट्यूर्ध्वतो युक्त्या मङ्गलाढ्यफलकां मङ्गलया लक्ष्म्या संयुक्तां फलकां च। तथाच गुरुदेवः–

"द्वारोच्चशेषे पञ्चांशे भवेदंशद्वयं त्वधः।
ऊर्ध्वं त्रयोंऽशास्तत्र स्युः फलका चात्र चित्रिता।।"

इति।।३०।।

दण्डाब्ध्यङ्गमतङ्गजांशबहलं तावद्युतद्वार्दल-
व्यासं मूलशिखायुतं दृढतरं कार्यं कवाटद्वयम्।
कार्या वामकवाटरोपितपराग्मागार्धतीव्रा तत-
स्तद्द्विघ्नप्रतता च सूत्रफलका सूद्यत्स्तनाद्युज्ज्वला।।३१।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

कवाटलक्षणमाह - दण्डेति। दण्डाब्ध्यङ्गमतङ्गजांशबहलं दण्डस्य चतुर्भागेन वा षड्भागेन वाष्टभागेन वा घनेन युक्तम्। तावद्युतद्वार्दलव्यासं यावान् बहलस्तावद्युतेन द्वारार्धेन विस्तारयुक्तम्। मूलशिखायुतं मूलगतनालेनाग्रगतया शिखया च युक्तम्। दृढतरं सारदारुनिर्मितं च कवाटद्वयं कार्यं स्यात्। वामकवाटरोपितपराग्भागा वामकवाटाश्लिष्ट-पृष्ठभागा। ततः कवाटात्। अर्धतीव्रा कवाटार्धबहला। तद्द्विघ्नप्रतता कवाटतीव्रद्विगुणित-विस्तारा च। सूद्यत्स्तनाद्युज्ज्वला सुष्ठूद्यद्भिः स्तनाकृतिभिरन्यैश्चालङ्कारविशेषैः उज्ज्वला सूत्रफलका च कार्या स्यात्। तथाच गुरुदेवः–

"दण्डाच्चतुष्षडष्टांशं कवाटफलकाघनम्।
श्रेष्ठमध्याधमं ज्ञेयं क्रमात् सर्वेषु धामसु।।
स्तम्भाष्टांशघनौ रम्यौ कवाटौ विस्तरेऽधिकौ।
तदर्धबहलो दण्डो मध्ये द्विगुणविस्तरः।।" इति।।३१।।

विवरणम्

बहलं घनम्। तावद्युतद्वार्दलव्यासमिति। द्वारविस्तारमानस्यार्धं कवाटघनमानं चैकीकृतं कवाटविस्तारं कल्पयेदित्यर्थः। मूलशिखायुतम्। मूलं च शिखा च मूलशिखे। *तत्सन्धिगुप्तिक्षमामिति तद्विन्यासमानमपि सूचितम्।।३१।।

ऊर्ध्वाधरभ्रमरकार्गलसन्धिपाल-
प्रक्षेपणीयवळयान्यपि पत्रकाणि।
तिर्यञ्च्युदञ्चि पुलकार्तवकुड्मलानि
सश्रीमुखेन्दुशकलानि कवाटयोः स्युः।।३२।।

विमर्शिनी

कवाटभूषणान्याह - ऊर्ध्वाधरेति। कवाटयोर्द्वयोरपि ऊर्ध्वाधरभ्रमरकार्गलसन्धिपाल-प्रक्षेपणीयवलयानि ऊर्ध्वे अधरे च भ्रमरकौ भ्रमणसाधकौ यन्त्रविशेषौ[1] अर्गलं कवाटस्यान्तर्भागस्थः कवाटस्य विवृतिनिरोधको यन्त्रविशेषः सन्धिपालः कवाटयोः सन्धिं पालयतीति[2] सूत्रफलका प्रक्षेपणीयः कवाटस्य बहिर्भागस्थः कवाटविवृतिनिरोधको

१. 'षकौ अ' ख. पाठः, २. 'ति त्सूत्र' ख. घ. पाठः
* विवरणरीत्या पाठभेदाऽस्तीति प्रतीयत।

Shripuram Publications
www.shripuram.org

लोहमयो यन्त्रविशेषः वलयानि कवाटाकर्षणार्थं कल्पितानि वलयाकाराणि लोहविकाराणि। पत्रकाणि च कवाटयोः स्थैर्यसिद्धये बद्धानि लताकारेण निर्मितानि लोहानि भूषणितानि। पुनस्तिर्यञ्चि तिर्यग्गतानि। उदञ्चि ऊर्ध्वगतानि च। पुलकार्तवकुड्मलानि पुष्पाणामवस्था-विशेषद्योतकानि भूषणानि। सश्रीमुखेन्दुशकलानि श्रीमुखाः श्रीदेव्यादीनामाकाराः तैः सहितानीन्दुशकलानि चन्द्रखण्डाकाराणि एतदादीनि भूषणानि स्युः। तथाहुः–

"श्रीमुखं वामदण्डं च पञ्जरी[१] पुलकार्गलौ।
क्षेपणं सन्धिपालं च दण्डकुण्डलकौ तथा।।
अन्तर्गतविषाणौ च फल्गु[२]भ्रमरकौ तथा।
वलाहैः[३] परिधश्चैव भूषणानि कवाटयोः।।"

इति।।३२।।

अग्र्यद्वारभुवङ्गमस्थलसमारब्धान्यधोऽधः क्रमात्
सोपानानि समानि सारशिलया चिन्वीत यावत्तलम्।
अध्यर्धद्विगुणात्तदण्डविपुलानि द्वारशाखाद्वयी-
पार्श्वोद्यन्मकरास्यनिःसृतलतारुद्धोभयान्तानि च।।३३।।

विमर्शिनी

सोपानलक्षणमाह - अग्र्यद्वारेति। अग्र्यद्वारभुवंगमस्थलसमारब्धानि अग्रभवस्य द्वारस्य यो भुवंगमः तत्स्थलात् समारब्धानि। क्रमादधोधोभागस्थितानि। यावत्तलं तलपर्यन्तं यथा तथा। द्वारशाखाद्वयीपार्श्वोद्यन्मकरास्यनिस्सृतलतारुद्धोभयान्तानि द्वारशाखा-द्वय्याः पार्श्वादुद्यतो मकरास्यान्निःसृतया लतया प्रतिरुद्धोभयपार्श्वानि। अध्यर्धद्विगुणात्तदण्ड-विपुलानि अध्यर्धेन द्विगुणेन वा गृहीतेन दण्डेन विस्तृतानि। समानि युग्मानि समविस्ताराणि च सोपानानि सारशिलया चिन्वीत। गुरुदेवः–

"समखण्डानि कुर्वीत सोपानानि यथाक्रमम्
द्विदण्डं वाध्य(र्ध)दण्डं (वा) भवेत्।।"

इति च।।३३।।

---

१. 'पि' ख. पाठः, २. 'गुल्फभ्र' ख. घ. पाठः, ३. 'हापरिधं चैव' ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

तलप्रवेशनिर्गमनार्थं सोपानमाह - अग्र्यद्वारेति। प्रधानद्वारे यो भुवंगमः तत्स्थलात् समारब्धानि। तलं भूतलमेव। असमानि त्रिपञ्चाद्योजसङ्ख्यानि द्वारशाखे योगौ तत्पार्श्वे सोपानहस्तौ स्याताम्।।३३।।

अग्र्यद्वारप्रततिमहिभिः संविभज्याशुगांशैः
क्लृप्तव्यासं रचयतु घनद्वारमन्यत्रिदिक्स्थम्।
द्विघ्नव्यासायतमधिदलद्विघ्नतत्याततं वा
सूद्यद्योगप्रकटितकवाटादिकस्वाङ्गदीप्तम्।।३४।।

विमर्शिनी

अन्यस्य घनद्वारत्रयस्य लक्षणमाह - अग्र्यद्वारेति। अग्र्यद्वारप्रततिम् अग्र्यद्वारस्य विस्तारम्। अहिभिरष्टभिः संविभज्य। आशुगांशैः पञ्चभागैः। क्लृप्तव्यासं क्लृप्तविस्तारम्। द्विघ्नव्यासायतं द्विगुणितेन विस्तारेणायामयुक्तम्। अधिदलद्विघ्नतत्याततं वा अध्यर्धद्विगुणविस्तारं वा। सूद्यद्योगप्रकटितकवाटादिकस्वाङ्गदीप्तं सुतरामुद्यति योगे प्रकाशितेन कवाटादिना स्वाङ्गेन सुन्दरं च। घनद्वारं द्वारप्रतिरूपम्। अन्यत्रिदिक्स्थम् अग्र्यद्वारादन्यत्रिदिक्षु स्थितं रचयतु। तथाहुः–

"पुरोद्वारस्य विस्तारे त्वष्टभक्तेऽत्र पञ्चभिः।
घनद्वारस्य विस्तारं ततो द्विगुणदैर्घ्यकम्।।
द्विगुणार्धं तु वा दैर्घ्यं घनद्वारगतं शुभम्।"

इति।।३४।।

विवरणम्

अथ घनद्वारमाह - अग्र्यद्वारप्रततिमिति। अन्यत्रिदिक्स्थम्। अत्र दिशि हि प्रधानद्वारमुक्तम्। पार्श्वदिशोः पृष्ठदिशि च घनद्वारमित्यर्थः।।३४।।

स्तम्भे दिङ्नन्दनागांशिनि झषमनलांशेन शेषेण पादौ
व्यासं स्तम्भार्धतोऽब्ध्याशुगरसमितदण्डेन वा तत्र कुर्यात्।

Shripuram Publications
www.shripuram.org

पत्रादीद्धार्धचन्द्रात्मकमथ मकरास्यादिमत् पञ्चभुग्नं
कर्तव्यं तोरणं तद् विविधखगलसन्नक्रतुण्डोज्ज्वलं च।।३५।।

विमर्शिनी

तोरणलक्षणमाह - स्तम्भ इति। स्तम्भे स्तम्भोच्चे। दिङ्नन्दनागांशिनि दशधा नवधाष्टधा वांशिते। अनलांशेन त्र्यंशेन। झषं मत्स्यरूपं द्वारोपरिगतावयवं कुर्यात्। शेषेण[1] शिष्टैरंशैः। पादौ तोरणपादौ। स्तम्भार्धतः स्तम्भार्धमानेन वा। अब्ध्याशुगरसमित-दण्डेन वा चतुर्भिः पञ्चभिः षड्भिर्दण्डैर्वा। तत्र तोरणे व्यासं कुर्यात्। अथ पत्रादीद्धार्धचन्द्रा-त्मकमिति पत्रतोरणमुच्यते। पत्रलतादिभिर्दीप्तमर्धचन्द्राकारं च। मकरास्यादितम् पञ्चभुग्नमिति मकरतोरणमुच्यते। मकरास्यादिभिर्युक्तं पञ्चधा वक्रीकृतं च। विविधखगल-सन्नक्रतुण्डोज्ज्वलमिति चित्रतोरणमुच्यते। विविधैः पक्षिभिर्लसद् नक्रतुण्डेन चोज्ज्वलं च। इति तत् प्रशस्तं तोरणं त्रिविधं कर्तव्यं स्यात्। तथाह काश्यपः–

"अथ वक्ष्ये विशेषेण तोरणानां तु लक्षणम्।
पादोदयदशांशेषु सप्तांशं चरणोदयम्।।
शेषांशं गुणमानं तु झषमानमुदाहृतम्।
नवांशे पादतुङ्गे तु षडंशं चरणोदयम्।।
शेषं झषोदयं ख्यातमष्टांशे चाङ्घ्रितुङ्गके।
पञ्चांशं चरणोत्तुङ्गं झषोत्सेधं गुणांशकम्।।
तुङ्गार्धविपुलो वाथ वेदभूतरसाङ्घ्रि वा।
तोरणस्य तु तद्बाह्ये व्यासमेवं चतुर्विधम्।।
प्रासादमण्डपादीनां मध्यभागे तु तोरणम्।
अनेन विधिना विप्र! कर्तव्यं कुड्यबाह्यके।।
पत्राख्यतोरणं चादौ द्वितीयं मकरतोरणम्।
तृतीयं चित्रसंज्ञं च त्रिविधं तोरणाकृति।।
अर्धचन्द्रमिवाकारपत्रराजिविराजितम्।
पत्रतोरणमाख्यातं ततो मकरमुच्यते।।
पञ्चवक्रसमायुक्तं पार्श्वयोर्मकरान्वितम्।

१. '......शि' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

मध्ये पुरिसमायुक्तं नानाविधलतान्वितम्।।
नानालङ्कारसंयुक्तं यत्तन्मकरतोरणम्।
तदेव पार्श्वयोर्मध्ये पुरि मत्स्यद्वयोरपि।।
नक्रतुण्डं प्रकर्तव्यं भूतविद्याधराङ्गकम्।
सिंहेभव्यालहंसाद्यैर्बालस्रङ्मुक्तदामकैः।।
मत्स्यैश्च विविधैश्चित्रै रत्नबन्धैश्च भूषितम्।
चित्रतोरणमेतत् स्यात्।।"

इति।।३५।।

प्रत्युत्तरान्तर्विरचय्य भित्तिं ततः समन्तात् सुदृढैः शिलाद्यैः।
तां भूषयेद् वेदिकयाङ्घ्रिमूले तदूर्ध्वतश्चोज्ज्वलपञ्जराद्यैः।।३६।।

विमर्शिनी

भित्तिलक्षणमाह - प्रत्युत्तरान्तरिति। प्रत्युत्तरान्तः प्रतेरुत्तरस्य चान्तर्मध्यभागे। समन्तात् परितः। सुदृढैः सुतरां सारतरैः। शिलाद्यैः शिलेष्टकादिभिः भित्तिं विरचय्य। तां भित्तिम्। अङ्घ्रिमूले स्तम्भाधोभागे। भित्तेरधोभाग इत्यर्थः। तत्र वेदिकया भूषयेत्। तदूर्ध्वतः वेदेरुपरिभागे। उज्ज्वलपञ्जराद्यैः उज्ज्वलैः पञ्जराद्यलङ्कारविशेषैश्च भूषयेत्। तथाहुः–

"प्रत्युत्तरान्तरे भित्तिर्जालेष्टकशिलामयी।"

इति। तथाच गुरुदेवः–

"कुड्येषु तोरणानि स्युस्तत्कुड्यं पञ्चधा स्मृतम्।
शिलामयं चैष्टकं च (ज?जा)लकामयमित्यपि।।
फलकामयमित्यन्यन्मृण्मयं चापरं क्रमात्।"

इति।।३६।।

विवरणम्

*अन्तः अन्तरा। पञ्जराद्यैरिति कूटशालादिग्रहणम्।।३६।।

---

* इयं व्याख्या २५ पद्यानन्तरं दृश्यते।

Shripuram Publications
www.shripuram.org

प्रत्युत्सेधेन पादायतिवसुमुनिषड्भागतोऽध्यर्धकेन द्वित्रिघ्नेनाङ्घ्रितारेण च भवतु समोऽभ्युच्छ्रयो वेदिकायाः। उत्सेधे द्व्यंशितेऽधोवधि गुणरशनान्तर्यथाष्टाद्रिषड्भा-गेंऽशैः कम्पाब्जकम्पाः शशिकरशशिभिः शेषतोऽधो गलं च।।३७।।

विमर्शिनी

वेदिकालक्षणमाह - प्रत्युत्सेधेनेति। प्रत्युत्सेधेन प्रतेरुत्सेधप्रमाणेन वा। पादायतिवसुमुनिषड्भागतः स्तम्भायामस्याष्टभागेन वा सप्तभागेन वा षड्भागेन वा। अध्यर्धकेनाङ्घ्रितारेण अर्धसहितैकेन स्तम्भविस्तारेण। द्वित्रिघ्नेन च द्विगुणितेन वा त्रिगुणितेनं वा स्तम्भविस्तारेण समो वेदिकाया अभ्युच्छ्रयो भवतु। अथोत्सेधे व्द्यंशिते अधोवधि अधः पर्यन्तम्। गुणरशना तिस्रो मेखला अन्तरी च भवतु। अथवाष्टाद्रिषड्भागे अष्टधा सप्तधा षोढा वा भक्ते। शशिकरशशिभिरेकद्व्येकांशैः। क्रमेण कम्पाब्जंकम्पाः शेषतोऽधोभागे गरूं च। तथाहुः–

"प्रतेरुपरि वेदिः स्यात् प्रत्युत्सेधेन सम्मिता।"

तथाच काश्यपीये –

"स्तम्भोदये तु षट्सप्तवसुभागविभाजिते।
एकांशं वेदिकामानं क्रमाच्छ्रेष्ठान्तराधमम्।।"

मयमते च –

"प्रतेरुपरि वेदिः स्यात् सार्धद्वित्र्यङ्घ्रिणोदिता।"

इति। मुरारिश्च –

"मेखलात्रयसंयुक्ता वेदिकान्तरिभूषिता।"

इति। काश्यपीये च –

"अष्टांशे वेदिकेत्सेधे वेदाङ्गं गलमानकम्।
गलोर्ध्वकम्पमेकांशं व्यंशेनाब्दं प्रकल्पयेत्।।
तदूर्ध्वकम्पमेकांशं कर्तव्यं द्विजसत्तम!।।

Shripuram Publications
www.shripuram.org

स्वरषडंशे वेद्युच्चे त्रिव्यंशे च क्रमात् गलम्।।
कम्पं पद्मं च कम्पं च प्रागिवैवं प्रकल्पयेत्।।”

इति।।३७।।

प्रासादः सकलोऽङ्घ्रितोरणचतुर्द्वारान्वितो मण्डित-
स्तम्भाभ्यन्तरजालपञ्जरयुतो वा पञ्चहस्तादिकः।
युक्तो मूलतले विदिक्स्थितचतुष्कूटैः परस्तत्परः
शालाकूटकनासिकादिविलसज्जालोज्ज्वलत्पञ्जरः।।३८।।

विमर्शिनी

भित्तिभूषणान्याह - प्रासाद इति। सकलः प्रासादोऽङ्घ्रितोरणचतुर्द्वारान्वितः अङ्घ्रिभिस्तोरणैश्चतुर्भिर्द्वारश्चै युक्तः स्यात्। पञ्चहस्तादिकस्तु मण्डितस्तम्भाभ्यन्तरजाल-पञ्जरयुतो वा। मण्डितानां स्तम्भानामन्तराले जालसहितपञ्जरयुतः। परः तत उपरि मूलतले भित्तेर्मूलप्रदेशे विदिक्स्थितचतुष्कूटैः कोणेषु स्थितैश्चतुर्भिः कूटैर्युक्तः। तत्परस्तु शालाकूटकनासिकादिविलसज्जालोज्ज्वलत्पञ्जरः शालाभिः कूटैर्नासिकादिभिश्च शोभमान-जालकैश्च दीप्तिमद्भि पञ्जरैश्च युक्तः। तथाहुः–

“त्रिहस्ते दण्डविस्तीर्णास्तदर्धबहलाः शुभाः।
द्वादशैव चतुष्कोणमध्यस्थाः कुड्यपादकाः।।
पार्श्वयोः पृष्ठतो युक्तास्तोरणैरुज्ज्वलैस्त्रिभिः।
तोरणत्रयसंयुक्ते[१] पञ्चहस्तेऽष्टपञ्जरे।।
जालकानि त्रिभिर्दण्डैर्नन्द्यावर्तादिकानि च।
तुर्याश्राणि गवाक्षाणि गजेन्द्रनयनानि च।।
लताश्च विविधास्तत्र कारयेत् स्वस्तिकानि वा।
कुड्यस्तम्भांस्तथा कुर्यान्मूलाश्रान् कुम्भमण्डितान्।।
सप्तहस्ते च चित्राढ्यं तोरणं मकरोज्ज्वलम्।
पत्रैश्चित्रीकृतं कुर्यान्मध्ये रत्नादिमण्डितम्।।
मण्डितान् कुड्यपादांश्च द्वादशैवात्र पूर्ववत्।
कर्णकूटांश्च[२] परितः शालापञ्जरकाष्टकम्।।

१. ‘क्तैः’ ख. पाठः, २. ‘ठा’ क. पाठः

Shripuram Publications
www.shripuram.org

पूर्ववन्मण्डितान् स्तम्भान्नवहस्ते तु मन्दिरे।
कर्णकूटैश्च संयुक्ते शालापञ्जरतोरणैः।।
एकादशकरे स्तम्भा विंशतिर्मण्डितान्विताः।
दिक्षु चत्वारि चत्वारि पञ्जराणि शुभानि च।।
नास्योऽत्र षोडशोर्ध्वं च शिखरे हारकांस्तथा।
त्रयोदशकरे स्तम्भा विंशतिर्मण्डितास्तथा।।

इत्यादि।।३८।।

विवरणम्

पञ्जराद्यैरिति यदुक्तं तदीषद्विवृणोति–प्रासादः सकल इति। पञ्चहस्तादिकोऽसौ स्तम्भाभ्यन्तरजालपञ्जरयुत इति सम्बन्धः। *अतोऽधिक इति त्रिभूम्यादिको गृह्यते।।३८।।

कुड्ये पङ्क्त्यादिभक्ते विदिशि विरचयेत् कूटमेकांशविस्ता-
रायामं द्व्यंशदीर्घां दिशि दिशि विततामेकभागेन शालाम्।
शालाकूटान्तराले चरणविरहितांशोन्मितां नासिकां त-
त्पार्श्वद्वन्द्वे सजालं चरणविरहितांशादितः पञ्जरं च।।३९।।

विमर्शिनी

भीत्त्यलङ्काराणां विभागमाह - कुड्य इति। कुड्ये पङ्क्त्यादिभक्ते दशधाष्टधा वा भक्ते। विदिशि कोणेषु एकांशविस्तारायामम् एकांशेन विस्तारमायामं च कूटं विरचयेत्। दिशि दिशि चतसृषु दिक्षु। द्व्यंशदीर्घां द्व्यंशाभ्यां दीर्घाम्। एकभागेन विततां विस्तृतां शालां च। शालाकूटान्तराले शालाकूटयोर्मध्ये चरणविरहितांशोन्मितां पादोनांशमितां नासिकां च। तत्पार्श्वद्वन्द्वे नासिकयोः पार्श्वद्वन्द्वे चरणविरहितांशादितः पादोनांशादिनाः। सजालं जालमार्गसहितं पञ्जरं च। तथाच गुरुदेवः–

“कर्णमध्येऽन्तरे भित्तेरथवा मानसूत्रतः।
निर्गतैरुक्तमानेन कूटकोष्ठकपञ्जरैः।।
गजपृष्ठादिभिश्चोक्तैः कुर्यादवयवैर्युतम्।”

---

* मण्डितपदस्थाने ‘तोऽधिक’ इति विवरणरीत्या श्लोकपाठः।

www.shripuram.org
Shripuram Publication
www.shripuram.org

इति।।३९।।

धाम्नोऽष्टांशमितोऽथवा प्रतिमुखैः स्तूप्यन्तिमैः संयुतः
प्रासादाकृतिकश्च कूट उदितो मध्यस्फुरन्नासिकः।
शाला तत्समसूत्रगा मुखपटीशक्तिध्वजाद्युज्ज्वला
स्तूपीत्रय्युपशोभिता परिलसन्नासा च सङ्कीर्तिता।।४०।।

विमर्शिनी

कूटादीनां लक्षणमाह - धाम्न इति। अथवा तत्र धाम्नो गृहस्याष्टांशमितः प्रासादाकृतिकः प्रासादवदाकारेण युक्तः। तत्र प्रतिमुखैः स्तूप्यन्तिमैः प्रतिमारभ्य स्तूपीपर्यन्तैरवयवैः संयुतः। मध्यस्फुरन्नासिकः मध्ये स्फुरन्त्या नास्या युक्तश्च कूट उदितः। तत्समसूत्रगा कूटसूत्रस्था। मुखपटी[१]शक्तिध्वजाद्युज्ज्वला मुखपट्या शक्त्या ध्वजादिभिश्चोज्ज्वला स्तूपीत्रय्युपशोभिता स्तूपिकात्रयेणोज्ज्वला च परिलसन्नासा च परितो लसन्तीभिर्नासीभिश्चोज्ज्वला शाला सङ्कीर्तिता। तथाच गुरुदेवः–

"कूटोऽष्टांशेन सद्मनः।
शाला च तावती रम्या विस्तारद्विगुणायता।
कर्णाश्रितं मध्यमैकनासिकं स्तूपिकान्वितम्।।
प्रासादावयवं प्राज्ञाः कूटं नाम प्रचक्षते।
सायतं समुखपट्टिकमर्धस्पष्टकोटियुतमध्यमनासम्।
शक्तिमद्ध्वजमपि त्रिशिखं तत् पार्श्वयोर्बहुशिखं खलु कोष्ठम्।।"

शिखाशब्देन स्तूपिकोच्यते कोष्ठमिति शाला च।।४०।।

दण्डैर्द्वित्रिचतुर्मितैर्मितवितानातानकं पञ्जरं
नासाद्युज्ज्वलितं च जालकमथो वेद्यूर्ध्वतः संस्थितम्।
दण्डैर्द्व्यादियुगान्तिमैस्ततमतो दण्डर्द्धितश्चायतं
कर्तव्यं द्विगुणान्तिमं सुषुरितं गोमूत्रकादिक्रमात्।।४१।।

विमर्शिनी

पञ्जरजा[२]लकयोर्लक्षणमाह - दण्डैरिति। द्वित्रिचतुर्मितैर्दण्डैर्मितवितानातानकं

१. 'दी' घ. पाठः, २. 'शा' ख. पाठः

Shripuram Publications
www.shripuram.org

द्व्यादिदण्डैर्मितविस्तारदैर्घ्यं नासाद्युज्ज्वलितं नासादिभिरुज्ज्वलितं च पञ्जरं कर्तव्यं स्यात्। अथो जालकं वेद्यूर्ध्वतः वेदेरूर्ध्वभागे संस्थितम्। ततुद्यादियुगान्तिमैः द्व्यादिचतुरन्तैर्दण्डैः ततं विस्तृतम्। अतो विस्ताराद् दण्डर्द्धितो द्विगुणान्तिममायतं गोमूत्रकादिक्रमात् सुषिरितं कृतसुषिरं च कर्तव्यम्। पराशर आह –

"द्वाभ्यां त्रिभिश्चतुर्भिर्वा कुड्यस्तम्भेऽस्तु पञ्जरम्।
मुखे शालामुखे चैकस्तूपिकं हस्तिपृष्ठवत्।।
पञ्जरं नाम तत्प्रोक्तम्"

इति। तथाच काश्यपः–

"द्विदण्डं कन्यसव्यासं त्रिदण्डं मध्यमं भवेत्।
चतुर्दण्डविशालं तु उत्तमं परिकीर्तितम्।
विस्तारसदृशोत्सेधादेकदण्डविवर्धनात्।
विस्तारद्विगुणं यावत् तावत् वै जालकोन्नतम्।।"

इति।।४१।।

स्तम्भान्तरे महित धामनि पादविस्ता-
रोच्चाधिपादततपद्मगकुम्भसंस्थाम्।
पादायतां घटमुखोद्गतपत्रचित्र-
मूलां प्रकल्पयतु कुम्भलतां समन्तात्।।४२।।

विमर्शिनी

कुम्भलताख्यमलङ्कारविशेषमाह - स्तम्भान्तर इति। महति धामनि समन्तात् स्तम्भान्तरे पादविस्तारोच्चाधिपादततपद्मगकुम्भसंस्थां स्तम्भविस्तारोच्चं सपादस्तम्भविस्तारततं च पद्मं कृत्वा तद्गतं कुम्भं तत्सदृशं च कृत्वा तस्मादुद्गतां पादायतां स्तम्भपर्यन्तदीर्घां घटमुखोद्गतपत्रचित्रमूलां घटस्य मुखादुद्गतैः पत्रैर्विचित्रमूलां कुम्भलतां प्रकल्पयतु। तथा काश्यपीये–

"स्तम्भमूले तु वेद्यूर्ध्वे पद्मासनं प्रकल्पयेत्।
पादव्याससमुत्तुङ्गं सपादं पद्मविस्तरम्।।

Shripuram Publications
www.shripuram.org

पद्मोच्चं वसुधाभज्यकम्पमेकांशमुच्यते।
अधः पद्मं गुणांशं तु एकांशं गलमुच्यते।।
ऊर्ध्वपद्मं द्विभागं तु कम्पमेकेन कल्पयेत्।
तदूर्ध्वे कुम्भतुङ्गं तु पद्मस्योच्चसमं भवेत्।।”

इति। मञ्जर्यां च–

“प्रत्युत्तरान्तरसमां विदधीत सम्यक् पादाधिकामपि च कुम्भलतामतोऽपि” इति।।४२।।

भङ्क्त्वा प्रत्युत्तरान्तर्गतचरणमितिं भोगिभिर्भागतोऽधो
वेदिं वेदैश्च पादान् दलरचितवलभ्युत्तरं भागतोऽथ।
***यावत्स्वोत्सेधनीप्रप्रसरवलभितः स्वार्हनीप्रं कपोतं**
गेहेऽल्पे सप्तमेनोज्ज्वलपदगृहपिण्डिं करोत्वष्टमेन।।४३।।

विमर्शिनी

अल्पगेहे विशेषकल्पनमाह - भङ्क्त्वेति। प्रत्युत्तरान्तर्गतचरणमिति प्रतेरुत्तरस्य चान्तर्गतं स्तम्भमानं भोगिभिरष्टधा भङ्क्त्वा अधः एकभागतो वेदिकां वेदैश्चतुर्भागैः पादान् अथैकभागतो दलरचितवलभ्युत्तरम् अर्धेन रचितया वलभ्या सह मृन्मयोत्तरम् अथ सप्तमेन भागेन यावत्स्वोत्सेधनीप्रप्रसरवलभितः यावान् स्वोत्सेधस्तावता नीप्रप्रसरेण युक्तया वलभ्या उपरि स्वार्हनीप्रं स्वयोग्यनीप्रयुक्तं कपोतम् अष्टमेन भागेन उज्ज्वलपदगृह-पिण्डिम् उज्ज्वलैः स्तम्भैर्युक्तां गृहपिण्डिं च करोतु।।४३।।

विवरणम्

भोगिनो नागाः। अथ भागतो दलरचितवळभ्युत्तरमिति। षष्ठं भागमर्धयित्वा अधोदले वलभिमुपरिदले चोत्तरामित्यर्थः। स्वोपानत्तुल्यनीव्रप्रसरयुतकपोतमिति। उपानाहो यावान्निर्गमः कृतः तावान् कपोतनीव्रस्यापि निर्गमः कार्यः।।४३।।**

खण्डोत्तरं चरणविस्तृतितुल्यविस्ता-
रोत्सेधमुत्तममतश्चरणोनतीव्रम्।

---

* स्वोपानत्तुल्यनीव्रप्रसरयुतकपोतमि’ति विवरणरीत्या पाठः

** इत उत्तरं ३८ तमश्लोकव्याख्या दृश्यते

Shripuram Publications
www.shripuram.org

पत्रोत्तरं दलविहीनघनं कनिष्ठं
रूपोत्तरं घनतती विपरीततो वा।।४४।।

विमर्शिनी

उत्तरमाह - खण्डोत्तरमिति। चरणविस्तृतितुल्यविस्तारोत्सेधं स्तम्भविस्तृत्या तुल्याभ्यां विस्तारोत्सेधाभ्यां युक्तं खण्डोत्तरमुत्तमं स्यात्। अतः खण्डोत्तरात् चरणोनतीव्रं पादोनघनं पत्रोत्तरं मध्यमम्। दलविहीनघनम् अर्धेन विहीनघनं रूपोत्तरं कनिष्ठं च। घनतती विपरीततो वेति चूलिकास्थापनमुच्यते। तत्र घनतती तीव्रविस्तारौ विपरीततो व्यत्यासेन स्याताम्। तथाच गुरुदेवः–

"उत्तरं विन्यसेदूर्ध्वं तच्चापि त्रिविधं मतम्।
खण्डोत्तरं पत्रबन्धं ततो रूपोत्तरं भवेत्।।
स्तम्भविस्तारविस्तीर्णमुन्नतं चाङ्घ्रिजातिजम्।
खण्डोत्तरं स्यादेतस्मात् पादोनं पत्रबन्धकम्।।
स्तम्भव्याससमोत्सेधमुत्सेधार्धेन विस्तृतम्।
विपरीतं तु वा नीचं रूपोत्तरमिदं भवेत्।।"

इति।।४४।।

विवरणम्

एष्वर्पयेच्चोत्तरमिति पूर्वमुक्तं तस्योत्तरस्य क्लृप्तिमधुना कथयति - खण्डोत्तरमिति। खण्डोत्तरपत्रोत्तररूपोत्तरभेदेन त्रिविधमुत्तरं भवति। चरणविस्तारेण तुल्या खण्डोत्तरस्य विततिः। तस्येन्नतिरपि तत्समा। अस्माच्चतुर्थभागहीनं पत्रोत्तरघनं खण्डोत्तरदलमात्रघनं रूपोत्तरं तच्च कनिष्ठम्। अर्थात् खण्डोत्तरमुत्तमम्, इतरन्मध्यमं चोक्तम्। घनतती विपरीततो वेति। स्तम्भाग्रमाना स्याद् रूपोत्तरस्योन्नतिः। तदर्धं च तत्र घनमित्यर्थः।।४४।।

उत्सेधे विशिखांशिते द्वितयतो रूपोत्तरे वाजनं
षड्भक्तेऽल्पमिलांशतो द्वितयतो वा स्यान्महावाजनम्।
एतन्निर्गमनं *निजांशविहितं न्यस्येदुपर्युत्तर-
स्यैतत्तीव्रसमुच्छ्रयोच्छ्रयदलांशव्याततां पट्टिकाम्।।४५।।

---

* 'निजांशसुसमम्' इति विवरणरीत्या पाठः

www.shripuram.org

विमर्शिनी

रूपोत्तरे वाजनविन्यासमाह - उत्सेध इति। रूपोत्तरस्योत्सेधे घने विशिखांशिते पञ्चांशिते द्वितयतो द्व्यंशेन वाजनं स्यात्। अथवा षड्भक्ते इळांशत एकांशेनाल्पं वाजनम्। द्वितयतो महावाजनं च। एतन्निर्गमनं वाजननिर्गमनं निजांशविहितं निजांशेन कल्पितं स्यात्। पुनरुत्तरस्योपरि एतत्तीव्रसमुच्छ्रयोच्छ्रयदलांशव्याततां उत्तरतीव्रसमुच्छ्रयाम् उच्छ्रयार्धविस्तीर्णां पट्टिकां न्यसेत्। तथाच गुरुदेवः–

"उत्तरोच्छ्रयषड्भागत्रिभागं घनमानकम्[१]।
एकांशं वाजनोत्सेधं द्व्यंशं चैवार्धवाजनम्।।"।।४५।।

विवरणम्

षड्भक्त इत्यादिप्रकारभेदः। अल्पवाजनं महावाजनं च। निजांशसुसमं स्वोन्नतितुल्यम्।।४५।।

एकाङ्घ्र्यूनादिदण्डोच्छ्रितमुपरि निधायोत्तरे वाजनं प्राक्
तिर्यग्दण्डोच्छ्रिताङ्घ्र्यूनितविततितुलास्तासु वंशानुवृत्त्या।
स्वार्धाक्रान्ता *जयन्तीस्तदुपरि सुसमीकृत्य कृत्वानुमार्गं
निश्छिद्रं छादयेत् स्वोचितघनफलकाप्रस्तरेणोर्ध्वभागम्।।

विमर्शिनी

फलकाप्रस्तरेणाच्छादनक्रममाह - एकाङ्घ्र्यूनेति। एकाङ्घ्र्यूनादिदण्डोच्छ्रितं वाजननामानं प्राक्पूर्वमुत्तरे निधाय पुनर्दण्डोच्छ्रिताङ्घ्र्यूनितविततितुलाः दण्डोच्छ्रितास्त-दङ्घ्र्यूनवितततीस्तुलास्तिर्यग् निधाय तासु तुलासु वंशानुवृत्त्या उत्तरानुसारेण स्वार्धाक्रान्ताः स्वार्धेनाक्रान्ता जयन्तीर्निधाय तदुपरि अनुमार्गं कृत्वा स्थापयित्वा सुसमीकृत्य स्वोचितघन-फलकाप्रस्तरेण स्वयोग्यघनानां फलकानां प्रस्तरेणोर्ध्वभागं निश्छिद्रं छादयेत्। तथाच गुरुदेवः–

"उत्तरोपरि कुर्यात्तु वाजनं तस्य कथ्यते।
त्रिचतुष्पञ्चदण्डानामायामस्तस्य सम्मतः।।

१. 'म्। निबन्धने च ए' क. ख. ग. पाठः
* 'जयन्तीरधितुलमनुमार्गेस्समीकृत्य चैता' इति च विवरणरीत्या पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

स्तम्भविस्तारपादं वा त्रिपादं वोच्छ्रितं भवेत्।
दण्डोच्चं वा त्रिपादं वा वाजनं पूर्ववत् स्मृतम्।।"

इति। निबन्धने च–

"दण्डतीव्राश्च पादोनबहलास्तिर्यगुत्तरे।
न्यसेद् भारतुला रम्या जयन्तीश्चानुवंशतः।।
तत्पार्श्वेष्वनुमार्गाः स्युर्दण्डार्धेनार्धतीव्रकाः।
प्रस्तरस्तेषु दण्डोच्चश्चित्रतोऽधस्तले समः।।"

इति। गुरुदेवश्च–

"वाजनस्योपरिष्टात्तु कुर्याद्भारतुलावलीः।"

इत्यादि।।४६।।

विवरणम्

उत्तरे उपरि। वाजनं प्राङ्निधायेति। उत्तरबहिर्निर्गतं दारु वाजनं प्रागित्युत्तरानुसारित्वमुक्तम्। ऊनत्र्येकाङ्घ्रिदण्डोन्मितमिति तल्लक्षणम्। तृतीयांशेन चतुर्थांशेन हीनं दण्डमानं तदीयमुन्मानं स्यात्। द्वित्रिदण्डमानमातानः। तिर्यक् तुलाः। दक्षिणोदग्गतोत्तरविन्यस्तोभयाग्रपादा इत्यर्थः। बहलशब्दो विस्तारपर्यायः। निधायेति चानुषङ्गः। तास्विति। तुलासु जयन्त्यः खण्डदारुः (?)। वंश उत्तरम् तदनुवृत्त्या तिरश्चीनासु तुलासु प्राचीना इत्यर्थः। अधितुलमनुमार्गैस्समीकृत्य चैता इति। तुलानामुपरि तुलानुसारिणोऽनुमार्गाः ते च जयन्त्यन्तरसाम्यसिद्धये कार्याः।।४६।।

**द्वारार्धतः कदलिकाकरणेन गर्भ-
कुड्यं क्रमान्मुकुलयेदथवा शिलाद्यैः।
द्वारोर्ध्वतोऽष्टपुटचारुलसत्तरङ्ग-
गर्भार्धतुङ्गमपिधानशिलाभिरामम्।।४७।।**

विमर्शिनी

पक्षान्तरेण शिलादिभिराच्छादनक्रममाह - द्वारार्धत इति। द्वारार्धतो द्वारार्धात्

Shripuram Publications
www.shripuram.org

कोणत आरभ्य[1] कदलिकाकरणेन उपर्युपर्यन्तरन्तः[2] प्रवेशनं कदलिकाकरणं, तेन। गर्भकुड्यं गर्भगृहे कुड्यं क्रमाच्छिलाद्यैः शिलादिभिरिष्टकादिभिर्वा मुकुलयेत् मुकुलीकुर्याद्वा। द्वारोर्ध्वतः द्वारोर्ध्वभागे तु अष्टपुटचारुलसत्तरङ्गम् अष्टपुटाश्रितैश्चारुभिः शोभमानैस्तरङ्गैर्युक्तं गर्भार्धतुङ्गं गर्भार्धेन तुङ्गम् अपिधानशिलाभिरामं उपर्याच्छादनशिलया मनोरमं च। तथाहुः[3]–

"द्वारार्धात् कदलीकारं द्वारसीमान्तमर्धपुटम्।
गर्भार्धं कदलिकोत्सेधमथ पूर्णेष्टकं भवेत्।।" इति।।४७।।

विवरणम्

वैमानिकप्रासादसम्भवं प्राकारान्तरमाह - द्वारार्धत इति। पूर्वमभितततो न्यासः ततस्तदुपर्यन्तर्मुखं ततस्तदुपरि ततोऽप्यभ्यन्तरमेवंविधा प्रक्रिया कदळिकेति व्यवह्रियते। अष्टपुटचार्वित्यादिकं विशेषणत्वेन योज्यम्। दिग्विदिग्गता मूर्धशिलान्ता अष्टौ पुटाः स्युः। प्रतिपुटं च तरङ्गैरेकपङ्क्तिभाग्भिर्भाव्यम्।।४७।।

कुर्यादुत्तरपट्टिकोपरि लुपाः कूटप्रविष्टाग्रकाः
स्वस्वांशाहितकर्णसूत्रकमिता मध्यादिकर्णावधि।
स्तम्भोच्चे शरशैलनन्दनयनैर्भक्ते चतुर्धोत्तरात्
तासां स्यादवलम्बनं नयनवह्न्यब्ध्युर्वरांशैः क्रमात्।।४८।।

विमर्शिनी

शिखरनिर्माणविधिमाह - कुर्यादिति। उत्तरपट्टिकोपरि उत्तरस्थितायाः पट्टिकाया उपरि कूटप्रविष्टाग्रकाः कूटे प्रविष्टेनाग्रभागेन युक्ताः स्वस्वांशाहितकर्णसूत्रकमिताः स्वस्वांशतः कूटसूत्रपर्यन्तस्य भुजासूत्रं यावत् तावन्मानेन सूत्रेण चतुरश्रं कृत्वा तत्कर्णसूत्रमिता लुपा मध्यादिकर्णावधि कुर्यात्। निजाङ्कोर्ध्वाङ्कोत्तरमध्यकर्णगतवाहाः (?) कूटकर्णोन्मिता इति पाठेऽप्येवमेवार्थो ग्राह्यः। स्तम्भोच्चे शरशैलनन्दनयनैः पञ्चधा सप्तधा नवधा द्वेधा वा भक्ते क्रमाद् नयनवह्न्यब्ध्युर्वरांशैः द्वित्रिचतुरेकांशैश्चतुर्धा उत्तरात् तासां लुपानामवलम्बनम् अधोगमनं स्यात्। तथा निबन्धने–

"मध्यादारभ्य कर्णान्तमनन्तरलुपाक्रमात्।
स्वैः स्वैः कर्णस्थितैः सूत्रैर्लुपानां मानमादिशेत्।।"

---

१. 'भ्यारभ्य क', २. 'तः', ३. 'ह' क. पाठः

Shripuram Publications
www.shripuram.org

इति। तथाच मञ्जर्यां –

“पञ्च द्विभागमथ सप्तभिदि त्रिभागं पादस्य चार्धमिति (तत्) त्रिविधं लुपान्तम्” इति।।४८।।

विवरणम्

न्यसेदुपर्युत्तरस्येति पूर्वमुक्त्वोत्तरपट्टिकालुपावनतिमाह - स्तम्भोच्च इति।।४८।।

अष्टांशकादिकृशविस्तृतिपावकांश-
तीव्रा च नीप्रफलकोत्तरतो लुपानाम्।
द्वित्राङ्गुलादिविततं चतुरश्ररूपं
कर्तव्यमासु वलयं च निजानुरूपम्।।४९।।

विमर्शिनी

नीप्रफलकादिकमाह - अष्टांशकादीति। उत्तरतः उत्तराद् अष्टांशकादिकृशविस्तृतिपावकांशतीव्रा अष्टांसकादिना कृशविस्तारा त्र्यंशेन घना च नीप्रफलका नीप्रस्थानगता फलका स्यात्। आसु लुपासु द्वित्राङ्गुलादिविततं द्व्यङ्गुलत्र्यङ्गुलादिविस्तृतं चतुरश्ररूपं निजानुरूपं द्वित्र्यादिसंख्यावशाद् यथायोग्यं वलयं कर्तव्यं स्यात्। तथाहुः–

“स्यादङ्गुलत्रयमितं वलयं द्व्यङ्गुलं चाप्यर्धमङ्गुलमिति त्रिविधं लुपायाम्।” इति।।४९।।

विवरणम्

नीव्रफलका लुपामुखलग्ना फलका।।४९।।

शाकाद्युत्तमदारुक्लृप्तफलकैरेताः समन्ताल्लुपाः
सञ्छाद्योपरि तत्पिधानफलकां कृत्वोल्लसत्कीलकाम्।
वास्त्वाधारसमोन्नतां प्रथिततत्पाथोजकुम्भादिकां
विन्यस्येन्नवपुण्डरीकमुकुलाग्रामूर्ध्वतः स्तूविकाम्।।५०।।

विमर्शिनी

लुपानामुपरिगतावयवमाह - शाकादीति। एता लुपाः शाकाद्युत्तमदारुक्लृप्तफलकैः

www.shripuram.org
Shripuram Publications
www.shripuram.org

शाकादिभिरुत्तमवृक्षक्लृप्तफलकैः समन्तात्, शाको जातिवृक्षः, सर्वतः सञ्छाद्य। तदुपरिभागे तत्पिधानफलकाम् अवसानफलकाम्। उल्लसत्कीलकाम् ऊर्ध्वभागोद्गतकीलयुक्तां च कृत्वा। तदूर्ध्वतो वास्त्वाधारसमोन्नताम् अधिष्ठानसमोच्छ्रयाम्। प्रथितततपाथोजकुम्भादिकां प्रकाशितपद्मकुम्भादिकाम्। नवपुण्डरीकमुकुलाग्रां नवीनपद्ममुकुलवदग्रभागयुक्तां स्तूवितां विन्यस्येत्।।५०।।

विवरणम्

उल्लसत्कीलकामिति। स्तूपिकाग्रहणार्थोऽयं कीलकः। प्रथितततपाथोजकुम्भादिकामिति।।५०।।

वर्षातपादिवारणकल्यैः शुल्बादिकल्पितैः फलकैः।
सारेष्टकादिभिर्वा विमानशिखरं ततः सुपिदधातु।।५१।।

विमर्शिनी

ततो विमानशिखरं प्रासादोपरिप्रदेशम्। वर्षातपादिवारणकल्यैः वर्षातपहिमादिनिवारणक्षमैः। शुल्बादिकल्पितैः[१] ताम्रादिनिर्मितैः। फलकैः सारेष्टकादिभिर्वा सारैरिष्टकाविशेषैर्वा। पिदधातु[२] आच्छादयतु।।५१।।

विवरणम्

इदानीमुत्तमतले शिखरप्रक्रियामुपदिशति—वर्षेति*।।५१।।

अल्पे धामनि विस्तृतिद्विगुणितप्रायोच्छ्रयेऽष्टांशिते
मूलांशेन मसूरकोच्छ्रयमथ स्तम्भोच्छ्रयं द्व्यंशतः।
भूयः प्रस्तरमंशते गलमिलांशेन प्रक्लृप्तोच्छ्रयं
भागाभ्यां शिखरोच्छ्रयं विरचयेदेकांशतः स्तूविकाम्।।५२।।

विमर्शिनी

पक्षान्तरेण क्वचिदल्पप्रासादे नियममाह - अल्प इति। अल्पे धामनि विस्तृतिद्विगुणितप्रायोच्छ्रये विस्तारद्विगुणाद्युक्तोत्सेधे अष्टांशिते सति। मूलांशेन अधोगतांशेन। मसूरकोच्छ्रयम् अधिष्ठानोच्छ्रयम्, विरचयेत्। अथ तदुपरि व्यंशतः स्तम्भोच्छ्रयं, भूयोंऽशतः

१. 'तैः फ', २. 'तु छाद' क. पाठः
* इदं व्याख्या ६१ तमश्लोकानन्तरं दृश्यते।

Shripuram Publications
www.shripuram.org

प्रस्तरं वक्ष्यमाणप्रस्तरोच्छ्रयम्, इलांशेन एकांशेन प्रक्लृप्तोच्छ्रयं गलं, भागाभ्यां शिखरोच्छ्रयम्, एकांशतः स्तूविकां च विरचयेत्। तथा च गुरुदेवः–

"उच्छ्रयेऽथाष्टधा भक्ते स्यादधिष्ठानमंशतः।
स्तम्भोत्सेधस्तु भागाभ्यां प्रस्तरश्चैकभागतः।।
कण्ठश्चांशेन शिखरं द्वाभ्यां स्तूबी तथांशतः।
एवं धामैकतलकं द्वितलं च समूहयेत्।।"

इति।।५२।।

विवरणम्

क्वचिदुन्मानविभागे भेदमाह - अल्प इति।।४२।।

स्तम्भार्धादिसमुच्छ्रये प्रकृतिभक्ते प्रस्तरे वातिधृ-
त्यंशे चोत्तरवाजने त्रिशशिभिर्भूतालिरंशैस्त्रिभिः।
क्ष्माद्रीन्दुक्षितिभिः सवाजनकपोतालिङ्गपट्टयन्तरी-
स्त्र्येकांशैः प्रतिवाजने प्रतिकपोते क्ष्मांशहान्यावरे।।५३।।

विमर्शिनी

तत्र प्रस्तरस्य विभागमाह - स्तम्भार्धादीति। स्तम्भार्धादिसमुच्छ्रये स्तम्भार्धादिना प्रमाणेन कृतोत्सेधे प्रस्तरे। प्रकृतिभक्ते एकविंशतिधा कृते वा। अतिघृत्यंशे एकोनविंशतिधा[1] च वा कृते। त्रिशशिभिः त्र्यंशैरेकांशेन च। क्रमेण उत्तरवाजने मृन्मयोत्तरं तद्वनाचनं च[2]। विरचयेदिति पूर्वश्लोकादायाति। त्रिभिरंशैर्भूतालिं। क्ष्माद्रीन्दुक्षितिभिः[3] एकसप्तैकैकांशैः क्रमात् सवाजनकपोतालिङ्गपट्टयन्तरीः वाजनसहितं कपोतमालिङ्गपट्टिमन्तरिं च। त्र्येकांशैः त्र्यंशैरेकांशेन च। प्रतिवाजने प्रतिं वाजनं च विरचयेत्। अवरे अधमे एकोनविंशतिधा कृते पक्षे। प्रतिकपोते प्रतिं कपोतं च। क्ष्मांशहान्या एकैकांशोनेन विरचयेत्। तथाहुः–

"अथ वक्ष्ये विशेषेण प्रस्तरस्य तु लक्षणम्।
स्तम्भार्धमुच्चमानं वा आत्तोत्सेधांशमेव वा।।
तदुच्चमेकविंशांशं कृत्वा गुणांशमुत्तरम्।

१. 'धा वा' ख. पाठः, २. 'च स्यात्। त्रि', ३. 'भिः स' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

वाजनं त्वेकभागेन भूतमालोन्नता त्रिभिः।।
भूतमालोपरिष्टात् तु वाजनं त्वेकभागया।
सप्तांशं तु कपोतोच्चमालिङ्गं त्वेकभागया।।
अंशेनान्तरिकां कुर्यात् प्रत्युत्सेधं गुणांशकम्।
वाजनं त्वेकभागेन अथवान्यप्रकारतः।।
तुङ्गमेकोनविंशांशं कृत्वोत्तरं त्रिभागया।
भागेन वाजनं कुर्यादग्न्यांशैर्वलभी भवेत्।।
वाजनं त्वेकभागेन कपोतोच्चं रसांशकम्।
आलिङ्गमानमंशेन अन्तरिं तु प्रकल्पयेत्।।
प्रत्युत्सेधं द्विभागेन वाजनं त्वेकभागया।"

इति।।५३।।

इत्येकभूमौ चतुरश्ररूपे
सुरालयेऽल्पे विधिरभ्यधायि।
अथाभिधास्ये द्वितलादिजाति-
च्छन्दादिवृत्तादिगतं विशेषम्।।५४।।

विमर्शिनी

इति उक्तप्रकारेण। एकभूमौ एकतले। चतुरश्ररूपे अल्पे सुरालये विधिः विरचनाकर्म। अभ्यधायि उक्तः। अथ द्वितलादिजातिच्छन्दादिवृत्तादिगतं विशेषम् अभिधास्ये वक्ष्ये।।५४।।

त्र्याद्याशाकरपश्चिमं शशितलं बाणादिमार्ताण्डदोः-
पर्यन्तं द्वितलं हयादिनृपहस्तान्तं त्रिभूम्यन्वितम्।
कुर्याद् धाम निजोचितोच्छ्रययुतं प्रोक्तोच्छ्रयेष्वेष्वतो
युक्त्या पाददलत्रिपादकरसंयोगक्षयौ च क्वचित्।।५५।।

विमर्शिनी

तत्रैकतलद्वितलत्रितलानां नियममाह - त्र्यादीति। त्र्याद्याशाकरपश्चिमं त्रिकरादिदश-

Shripuram Publications
www.shripuram.org

करान्तं धाम। शशितलं एकतलम्। बाणादिमार्ताण्डदोः- पर्यन्तं पञ्चादिद्वादशकरान्तं द्वितलम्। हयादिनृपहस्तान्तं सप्तादिषोडशकरान्तं त्रिभूम्यन्वितं त्रितलयुक्तम्। निजोचितोच्छ्रययुतं पूर्वप्रोक्तोच्छ्रयसंयुक्तं धाम कुर्यात्। एषु प्रोक्तोच्छ्रयेषु उक्तोत्सेधेषु प्रासादेषु। युक्त्या औचित्येन। पाददलत्रिपादकरसंयोगक्षयौ करं वा त्रिपादं वा अर्धं वा पादं वा क्वचित् पक्षे संयोगं क्वचित् क्षयं वा कुर्यात्। तथाहुः–

"भूमिलम्भमिति प्रोक्तं त्रिचतुर्हस्तमानतः।
द्विद्विहस्तविवृध्यैकभूमेर्मानं चतुष्टयम्।।
पञ्चषड्ढस्तमारभ्य द्विद्विहस्तविवर्धनात्।
द्वितले तु चतुर्मानं रुद्रभानुकरान्तकम्।।
सप्ताष्टहस्तमारभ्य द्विद्विहस्तविवर्धनात्।
पञ्चदशविकारान्तं त्रितले पञ्चमानकम्।।"

इति। ग्रन्थान्तरे च–

"प्रत्युन्नतायतकरेषु च हस्तमाना-
द्धीनं त्रिपादकरमर्धमथापि पादम्।
तत्रैव वास्तुनि यथोचितमाचरेद्वै
हानं च वर्धनमनिन्द्यमनेकशास्त्रे।।"

इति।।५५।।

विवरणम्

इदानीमुन्मानविभागप्रदिदर्शयिषया तलसङ्ख्यामाह - त्र्यादीति। पञ्चकरादिषु सामर्थ्याद्विकल्प उक्तो द्रष्टव्यः। युक्त्येति। यत्र तादृशमुन्मानमीषदूनमीषदधिकं वा स्यात् तत्र तदुपपत्त्यनुसारेणेत्यर्थः।।५५।।

आरूढभित्तिमुपचित्य लुपाग्रधानीं
युक्त्या तलान्तरविधौ प्रविधाय तस्याम्।
बाह्योत्तराहितलुपा विनिवेश्य कृत्वा
तत्पट्टिकां च[1] तलितेऽथ गलं विदध्यात्।।५६।।

---

१. सुतलित इति विवरणरीत्या पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

तलान्तरविधिप्रकारमाह - आरूढेति। तलान्तरविधौ आरूढभित्तिम् अन्तर्भित्तिम्। उपचित्य वर्धयित्वा। तत्र युक्त्या औचित्येन। लुपाग्रधानीं लुपाग्राणां धारणीं फलकां प्रविधाय। तस्यां बाह्योत्तराहितलुपाः बाह्योत्तरेषु स्थापिता लुपा विनिवेश्य। तत्पट्टिकां तदुपरिपट्टिकां च कृत्वा। तलिते तलीकृते अथ गलं विदध्यात्।।५६।।

विवरणम्

एवमेकतलविषयमुक्तम्। अथानेकतलविषयं वदन् पूर्वतलावसानप्रकारं दर्शयति - आरूढेति। तलान्तरविधाविति। कर्तव्ये सतीति शेषः। यदा स्वमुन्मानमधिष्ठानस्तम्भशि-रोमात्रेण प्रायः परिसमाप्तं स्यात्, तदा तलान्तरे नापेक्षायदा तु न परिसमाप्यते भूयः शिष्येते तु तदावशेषपरिसमीप्सया तलान्तरं निर्मित्सितव्यं भवति। युक्त्या प्रविधायेति। यावान्नाडीगृहविस्तारस्तावत्युत्तरसमानभागादारूढभित्तिस्थादुपरिभागे इतीयं युक्तिः सुतलिते सम्यक्तले क्लृप्ते*।।५६।।

स्तम्भे प्राथमिकेऽनलादिशिवनिष्ठैरंशितेंऽशैः क्रमा-
न्नेत्राग्नित्रिगुणेषु शैलशरनागाङ्कोन्मितैः सम्मिता।
ग्रीवोक्ता नवधा ततोऽपि तलक्लृप्तौ पूर्वपूर्वाङ्घ्रितः
प्रोन्नेया च तदुन्नतिः प्रतितलं स्यात् प्रस्तरप्रक्रिया।।५७।।

विमर्शिनी

ग्रीवालक्षणमाह - स्तम्भ इति। प्राथमिके स्तम्भे[१] प्रथमस्तम्भे। अनलादिशिवनिष्ठैः त्र्याद्येकादशान्तैरंशैरांशिते। क्रमाद् नेत्राग्नित्रिगुणेषुशैलशरनागाङ्कोन्मितैः द्वित्रित्रिपञ्च-सप्तपञ्चाष्टनवभिरंशैः सम्मिता इति नवधा ग्रीवोक्ता। ततोऽपि तलक्लृप्तौ पूर्वपूर्वाङ्घ्रितः पूर्वस्मात् पूर्वस्मात् स्तम्भात्। तदुन्नतिः तस्यास्तस्या ग्रीवाया उन्नतिः। प्रोन्नेया ज्ञेया। प्रतितलं तले तले च। प्रस्तरप्रक्रिया प्रस्तररचना च स्यात्। तथाहुः–

"त्रिचतुष्पञ्चषट्सप्तभागेऽष्टांशे नवांशके।
दशैकादशभागे च दारुस्तम्भे यथाक्रमम्।।

१. 'म्भे अ' क. पाठः
* इत उत्तरं ५५ तमश्लोकव्याख्या दृश्यते।

Shripuram Publications
www.shripuram.org

द्वाभ्यां त्रिभिस्त्रिभिर्भागैस्त्रिभिर्वै पञ्चसप्तभिः।
पञ्चाष्टनवभिश्चैव नवग्रीवा विमानना।।

इति। तथाच मुरारिः–

"त्रिकाद्येकादशान्तांशा दारुस्तम्भे द्वयादिभिः।
कल्पयेन्नवधा ग्रीवा विमानानां विधानतः।।

इति।।५७।।

विवरणम्

*गळं जनयति स्तम्भायाममिति। ततोऽपि तलक्लृप्ताविति। तृतीयादितलकल्पने कार्ये सति। प्रतितलं स्यात् प्रस्तरप्रक्रियेति प्रागुक्ताभिप्रेयते।।५७।।

ग्रीवायामुपरि त्रिदण्डपरिशिष्टांशे चतुर्भाजिते
मूलांशं च तृतीयकं च दशधा तुर्यं च कृत्वांशकम्।
आलिङ्गाह्वयपट्टिकां त्रिभिरुभाभ्यामन्तरिं पञ्चभिः
स्वद्व्यंशाहितवाजनां प्रतिमधः पङ्क्त्यंशके कल्पयेत्।।५८।।

विमर्शिनी

ग्रीवायां प्रस्तरकल्पनामाह[1] द्वाभ्यां श्लोकाभ्याम्। ग्रीवायां ग्रीवाप्रदेशे उपरि। त्रिदण्डपरिशिष्टांशे त्रीन् दण्डान् विहाय शेषांशे। चतुर्भाजिते चतुर्धा कृते। मूलांशं तृतीयकमंशं[2] तुर्यं चतुर्थमंशं च दशधा कृत्वा। अधः पङ्क्त्यंशके अधोगतदशांशे। त्रिभिरंशैरालिङ्गाह्वयपट्टिकाम्, उभाभ्यामन्तरिं पञ्चभिः स्वद्व्यंशहितवाजनां स्वस्य व्यंशेन कृतवाजनां प्रतिं च क्रमात् कल्पयेत्।।५८।।

विवरणम्

ग्रीवोन्मानमात्रमुक्तं तत्रापि विभागमाह - ग्रीवायामुपरीति। तुर्यं च दशधा कृत्वेत्युपरि योज्यम्। आलिङ्गाह्वयपट्टिकां त्रिभिरित्यादि प्रथमभागविभागः।।५८।।

शालाकूटगवाक्षकादिरुचिरां भित्तिं द्वितीये तृती-
येंऽशे पञ्चभिरुत्तरं च वलभिं भूतद्विपाद्युज्ज्वलाम्।

---

* अस्या व्याख्याया आधारभूतं मूलं च दृश्यते।
१. 'ह ग्रीवायामिति द्वा' घ. पाठः, २. 'शकं तु' ख. पाठः

तुर्येऽशे दशभिर्द्विक्लृप्तमुखपट्ट्याढ्यं कपोतं ततः
सखाङ्घ्रिं गृहपिण्डिमूर्ध्वनिहितैर्दण्डैस्त्रिभिः कल्पयेत्।।५९।।

विमर्शिनी

द्वितीयेंऽशे शालाकूटगवाक्षकादिरुचिरां शालभिः कूटैर्गवाक्षादिभिश्च सुन्दरां भित्तिं कल्पयेत्। तृतीयेंऽशे पञ्चभिरुत्तरं, पुनः पञ्चभिः भूतद्विपाद्युज्ज्वलां वलभिं कल्पयेत्। पुनः तुर्येऽशे दशभिरंशैर्द्विक्लृप्तमुखपट्ट्याढ्यं व्यंशेन क्लृप्तया मुखपट्ट्या युक्तं कपोतं कल्पयेत्। ततः ऊर्ध्वनिहितैः[1] ऊर्ध्वभागे प्राक् त्यक्तैः त्रिभिर्दण्डैः। सस्वाङ्घ्रिं स्वपादैर्युक्तां गृहपिण्डिं च कल्पयेत्। तथाच प्रयोगमञ्जरीव्याख्याने प्रद्योते 'त्रिंशद्भाग-विभक्तमि'त्यादिना ग्रीवालङ्कारमाह - "भित्तेरुपरि त्रिदण्डं विहायाधश्चतुर्धा विभज्याधोंऽशं दशधा विभजेत्। द्वितीयभागं भित्तिसंज्ञं विधाय तदूर्ध्वद्वयं प्रत्येकं दशधा विभजेत्। अयं त्रिंशद्भागप्रकारः। प्रस्तरसंज्ञे तृतीयभागे भित्त्युपरि पञ्चभागेनोत्तरं विदध्यात्। पञ्चानां त्रिभागान्यन्तः स्थितानि अन्तःप्रविष्टानि घनसंज्ञयोक्तानि। तदुपरि[2] संश्लिष्टद्विभागं वाजनं, तदुपरि पञ्चभागा वलभिरुपरिनिम्ना, तदुपरि चतुर्थे कपोतं दशभिर्बहिर्निम्नं, द्वाभ्यां मुखपट्टिर्दशभ्य एव, अधोदशकस्य त्रयेणालिङ्गपट्टिका, द्वाभ्याम् अन्तरिः, पञ्चभिः प्रतिर्भवेत्। प्रतेर्भाग एव द्वाभ्यां वाजनम्" इति।।५९।।

विवरणम्

द्वितीये अकृतविभागे पूर्वमन्तरिते भागे। चकारः पञ्चभिरित्यनुकर्षार्थः। सस्वाङ्घ्रि-मिति दिग्विदिगादिषु पादाः।।५९।।

तले द्वितीये विदिशासु कूटान्
दिशासु शालाश्च तदन्तरेषु।
नासीर्द्विशो वा रचयेद् दिशासु
मूर्तीरजाद्याः शिखरे च नासीः।।६०।।

विमर्शिनी

द्वितीये तले विशेषेण भूषणान्याह - तले द्वितीय इति।। द्वितीये तले विदिशासु कूटान्, दिशासु शालाश्च, तदन्तरेषु शालाकूटयोर्मध्येषु द्विशो नासीर्वा रचयेत्।

१. 'वि', २. 'रि प' ख. पाठः

Shripuram Publications
www.shripuram.org

पुनर्दिशास्वजाद्या ब्रह्माद्या मूर्तीश्च, तदूर्ध्वगतशिखरे महानासीश्च रचयेत्। तथाच निबन्धने–

"ऊर्ध्वं कूटचतुष्कं च दिक्षु शालाचतुष्टयम्।
नास्यः षोडश कर्तव्याः"

इति। तथाच–

'द्वितीयभूमौ संस्थाप्या दिक्षु दिङ्मूर्तयोऽथवा।
ब्रह्मा वोमापतिः प्राच्यामाचक्षाणस्तु दक्षिणे।।
प्रतीच्यां नरसिंहस्तु कृष्णः स्कन्दोऽथवोत्तरे।'

इत्यादि।।६०।।

विवरणम्

शालाकूटगवाक्षकादिरुचिरां वेदिं द्वितीय इति यत् सामान्येनोक्तं तद् विवृणोति - तले द्वितीय इति।।६०।।

बाह्योत्तरेण रहिते विगतोर्ध्वकूटे
ग्रीवान्तरे निजगजांशकृशाग्रकुड्ये।
न्यस्योत्तरं न्यसतु तत्र लुपास्तुलास्थ-
पादेषु लग्नशिरसश्चरणार्थलम्बाः।।६१।।

विमर्शिनी

मध्यमशिखराणां क्लृप्तिमाह - बाह्योत्तरेणेति। बाह्योत्तरेण रहिते बाह्योत्तरेण हीने। विगतोर्ध्वकूटे ग्रीवान्तरे निजगजांशकृशाग्रकुड्ये स्वाष्टांशकृशे भित्त्यग्रे। उत्तरं न्यस्य तत्र तुलास्थपादेषु अन्तः स्थितासु तुलासु स्तम्भान् न्यस्य तेषु। लग्नशिरसः लग्नशिरांसि लुपाग्राणि च कृत्वा। चरणार्धलम्बाः उत्तरात् स्तम्भार्धमाननीचा लुपाश्च न्यसतु।।६१।।

विवरणम्

द्वितीयादितलानाम् उत्तरतलैः सह सन्धिं दर्शयति - बाह्योत्तरेणेति। बाह्योत्तरं

www.shripuram.org
Shripuram Publications
www.shripuram.org

नाडीगृहोत्तरम्। ऊर्ध्वं कूटं च एतत् प्रथमोत्तमतलयोरेव भवति। तुलास्थपादेष्विति। पूर्वतलतुलासूपरितलपादान् निमिनुयात्, तेषु पादेषु लुपा निवेशयेत्।।६१।।*

प्रासादास्त्रितलादिभानुतळनिष्ठाः जातयः स्थाणुसू-
र्याद्यैरोजसमैः करैः परिमिताश्चासप्ततेर्वर्धितैः।
षोढा वह्नितलादयो द्व्यधममध्यश्रेष्ठक्लृप्त्या पृथग्
व्यासाद्द्व्यंशगुणांशकाधिकसमुत्सेधाश्च ते प्रायशः।।६२।।

विमर्शिनी

जात्यादिमहाप्रासादानां क्लृप्तिमाह - प्रासादा इति। त्रितलादिभानुतलनिष्ठाः त्रिभूम्यादिद्वादशभूम्यन्ताः प्रासादाः जातय इति प्रसिद्धाः। ते च स्थाणुसूर्याद्यैः एकादशाद्यै-र्द्वादशाद्यैश्च। करैरोजसमैः एकादशाद्योजकरैर्द्वादशादीभिर्युग्मकरैश्च। आ सप्ततेः सप्ततिकरपर्यन्तं वर्धितैः करैः परिमिताश्च। वह्नितलादयः त्रितलादयः। पृथग् द्व्यधममध्यश्रेष्ठक्लृप्त्या प्रत्येकमोजयुग्मभेदादधममध्यमोत्तमभेदाच्च षोढा भवन्ति। ते पुनः प्रायशो व्यासाद्द्व्यंशगुणांशकाधिकसमुत्सेधाः व्यासस्य विस्तारस्य अद्व्यंशे सप्तांशे गुणांशाधिकेन [1]त्र्यंशाधिकेनोत्सेधेन युक्ताश्च। सप्ततिकरे प्रासादे शतकर उत्सेध इत्यादिक्रमेणावगन्तव्या इत्यर्थः। तथा पितामह आह -

"हस्तसप्ततिविस्तारं शतहस्तोच्छ्रितं भवेत्।
उत्तमं द्वादशतलं विमानं जातिरुच्यते।।
भवेन्नवतिषष्टिभ्यां त्र्युत्तराभ्यां यथाक्रमम्।
उच्चविस्तारयोः श्रेष्ठमेकादशतलं गृहम्।।
उन्नतं चतुरशीत्या सप्तपञ्चाशदायतम्।
श्रेष्ठं दशतलं धाम विज्ञेयं जातिसंज्ञितम्।।
उच्छ्रितं पञ्चसप्तत्या चैकपञ्चाशदायतम्।
नवभौमं विमानं तु विज्ञेयमतिशोभनम्।।
षट्षष्ट्युच्चं तथा पञ्चचत्वारिंशत्समायतम्।
हस्तानां कीर्तितं धाम जातिरष्टतलं शुभम्।।

१. 'त्रिं' क. पाठः
* इत उत्तरं ५१ तमश्लोकव्याख्या दृश्यते।

Shripuram Publications
www.shripuram.org

सप्तपञ्चाशदुत्तुङ्गं नवत्रिंशत्करायतम्।
सप्तभौमं विमानं तु जात्यं सर्वफलप्रदम्।।
त्रयस्त्रिंशत्करव्यासं चत्वारिंशद्भिरुत्तरैः।
नवभिश्चोच्छ्रितं धाम षट्तलं परिकीर्तितम्।।
नवत्रिंशत्करोत्तुङ्गं सप्तविंशत्करायतम्।
पञ्चभौमं गृहं प्रोक्तं जातिभेदसमुद्भवम्।।
त्रिंशता चैकविंशत्या तुङ्गव्यासं चतुस्तलम्।
एकविंशत्करोत्तुङ्गं दशपञ्चकविस्तृतम्।।
त्रिभौमं भवनं प्रोक्तं मुख्यं जातिसमुद्भवम्।
एवं त्रितलमारभ्य यावद्द्वादशभूमिकम्।।
उक्तमानात् प्रतितलं ह्रासयेद् द्विकरं क्रमात्।
मध्यमानि विमानानि भवन्तीह दश क्रमात्।।
मध्येभ्यो द्विकरह्रासात् कनिष्ठानि पृथक् क्रमात्।
संभवन्ति विमानानि तिमिरारितलादिह।।
अथवा युग्महस्तैस्तु षोडशादिक्रमेण तु।
सप्तत्यन्तविमानानि त्रितलादीनि वै दश।।"

इत्यादि।।६२।।

विश्वेन्द्राद्येषुषट्षष्ट्यसमसमकरैरब्धिभौमादयः स्यु-
श्छन्दा हस्तैर्नवाशादिभिरिषुरसपञ्चाशदन्तैर्विकल्पाः।
पञ्चक्ष्माद्याश्च सर्वे प्रतितलमृतुभिन्ना विवस्वत्तलान्ता
रुद्राद्येकोनतानावधिभिरुदधिभूम्याद्यथाभाससंज्ञाः।।६३।।

विमर्शिनी

छन्दप्रासादानां नियममाह - विश्वेति। विश्वेन्द्राद्येषुषट्षष्ट्यसमसमकरैः विश्वेन्द्राद्यैरिषुषट्षष्ट्यन्तैरसमसमकरैः त्रयोदशहस्तादिपञ्चषष्ट्यन्तैरोजकरैः चतुर्दशहस्तादिषट्षष्टिकरान्तैर्युग्मकरैर्युक्ताः अब्धिभौमादयः चतुस्तलादयः छन्दाः स्युः। विकल्पप्रासा-

Shripuram Publications
www.shripuram.org

दानां नियममाह - हस्तैरित्यादिना। नवाशादिभिः नवदशादिभिः। इषुरसपञ्चाशदन्तैः नवादिपञ्चपञ्चाशदन्तैरोजसङ्ख्यैः दशादिपट्पञ्चाशदन्तैर्युग्मसङ्ख्यैः हस्तैर्युक्ताः। पञ्चक्ष्माद्याः पञ्चतलादयो विकल्पाः स्युः। तेषां छन्दानां विकल्पानां च साधारणनियममाह- सर्वं इत्यादिना। ते सर्वे प्रतितलम् ऋतुभिन्नाः षोढा भिन्नाः। विवस्वत्तलान्ताः द्वादशतला-न्ताश्च स्युः। अथ आभासप्रासादानां नियममाह - रुद्राद्येकोनेत्यादिना। रुद्राद्येकोनताना-वधिभिः रुद्राद्यैरेकोनतानान्तैः तत्रैकादशहस्तादिसप्तचत्वारिंशद्धस्तान्तैरसमकरैः द्वादशहस्ताद्यष्टचत्वारिंशदन्तैः समकरैश्च युक्ताः। उदधिभूम्यादि चतुस्तलादिद्वादशतलान्तं यथा भवन्ति तथा आभाससंज्ञाश्च स्युः।।६३।।

आभासेऽत्र चतुस्तलादिशिवभूम्यन्तं पृथग् वेदभे-
दाढ्यं द्वादशमन्तिमं द्व्यधममध्यादिक्रमात् षड्भिदम्।
षष्टिर्जातिगृहे भिदाः करवशाच्छन्दे षडूनास्ततः
षट्कोनाश्च विकल्पधामनि तथाभासे दशोनास्ततः।।६४।।

विमर्शिनी

आभासप्रसादेषु प्रतितलं प्रासादानां भेदमाह - आभासेऽत्रेति। आभासे प्रासादे। चतुस्तलादिशिवभूम्यन्तं चतुस्तलाद्येकादशतलान्तम्। पृथक् प्रतितलम्। वेदभेदाढ्यं चतुश्चतुर्भेदयुक्तम्। अन्तिमं द्वादशतलं द्व्यधममध्यादिक्रमाद् द्व्यधममध्यमोत्तमक्रमेण। षड्भिदं षड्भिर्भेदैर्युक्तम्। पुनर्जात्यादीनां करवशाद् भेदा गण्यन्ते षष्टिरित्यादिना श्लोकशेषेण। जातिगृहे जातिप्रासादे। करवशात् षष्टिर्भिदाः भेदाः। छन्दे छन्दप्रासादे। ततः षडूनाश्चतुष्पञ्चाशत्। विकल्पधामनि विकल्पप्रासादे। ततः षट्कोनाः अष्टचत्वा-रिंशत्। आभासे ततो दशोनाः अष्टत्रिंशद्भेदाः स्युः। तथाच काश्यपीये–

"छन्दमानमथो शृणु।
त्रिचतुर्दशहस्तादिद्विद्विहस्तविवर्धनात्।।
पञ्चषट्षष्टिहस्तान्तं व्यासं वै सप्तविंशतिः।
वेदभूमिं समारभ्य भानुभूमावसानकम्।।
अधमं मध्यमोत्कृष्टं मानानि स्युस्तलं प्रेति।

Shripuram Publications
www.shripuram.org

सप्ताष्टादशहस्तादि त्रित्रिहस्तविवर्धनात्॥
पञ्चषण्णवतिर्यावदुच्चं प्रागिव सङ्ख्यया।
छन्दमेवं समाख्यातम्"

इति। तथा विकल्पप्रासादमधिकृत्य काश्यपः–

"विकल्पमधुना शृणु।
नवपङ्क्तिकरात् पञ्चषट्पञ्चाशत्करान्तकम्॥
द्विद्विहस्तविवृद्ध्या तु चतुर्विंशतिसङ्ख्यया।
पञ्चभूमिं समारभ्य यावदर्कतलान्तकम्॥
अधमं मध्यमोत्कृष्टं त्रयो भेदास्तलं प्रति।
सप्ताष्टादिकपङ्क्त्यादि त्रित्रिहस्तविवर्धनात्॥
षट्सप्ताधिकाशीत्यन्तमुच्चं प्रागिव सङ्ख्यया।"

इति। आभासप्रासादमधिकृत्य पितामहः–

"एकादशकरा[१]सप्तचत्वारिंशत्करातते[२]।
द्विहस्तवर्धनात् प्राग्वदूनविंशतिसङ्ख्यया॥
चतुर्भौमादार्कभौममाभासाख्यानि तानि वै"॥६४॥

स्वाभीष्टमाने दशयुक्तसप्तशतांशिवे विश्वलसच्छतांशः।
यस्तेन मानेन परिभ्रमय्य वृत्तात्मकं वेश्म समातनोतु॥६५॥

विमर्शिनी

अथ वृत्तादिप्रासादानां क्लृप्तिमाह - स्वाभीष्टमान इति। स्वाभीष्टमाने स्वाभीष्टस्य प्रासादस्य माने। विस्तारायामराशौ दशयुक्तसप्तशतांशिते दशयुतेन सप्तशतसङ्ख्येनांशिते भेदिते सति। तेषु विश्वलसच्छतांशः त्रयोदशयुतशतांशो यः तेन मानेन परिभ्रमय्य वृत्तीकृत्य वृत्तात्मकं वृत्तस्वरूपं वेश्म प्रासादं समातनोतु॥६५॥

विवरणम्

*उपसंहरति - इति समचतुरश्रेति। प्रकृतिसत इति। प्रकृतिस्सदिति विग्रहः।

---

१. 'रा न्' ङ. पाठः, २. 'तेः' ङ. पाठः
* अस्याः व्याख्याया आधारभूतं मूलं न दृश्यते।

www.shripuram.org
Shripuram Publications
www.shripuram.org

वृत्तादीनां प्रकृतिरूपेणास्माभिरङ्गीकृतस्येत्यर्थः। तत्र तावत् समवृत्तप्रक्रियामाह - आकृतिद्वितयेति। परिधिमानं च चतुश्चत्वारिंशता विभज्य यावानंशो लभ्यते तावद्भिः सप्तभिः परिमितं सूत्रं गृहीत्वा तेन मध्यलग्नमूलेन परितो मण्डलमालिखेत्। तत् समवृत्तसीमा भवति। शेषं चतुरश्राद[1]धिगन्तव्यम्।।

नाहार्धमानप्रचये हरिद्भिर्भक्तेऽर्णवांशैर्वितर्तिं तनोतु।
आयाममंशैर्ऋतुसम्मितैश्च तुर्यश्रदीर्घस्य सुरालयस्य।।६६।।

विमर्शिनी

चतुरश्रदीर्घस्य प्रासादस्य क्लृप्तिमाह - नाहार्धेति। तुर्यश्रदीर्घस्य दीर्घचतुरश्रस्य। सुरालयस्य प्रासादस्य। नाहार्धमानप्रचये स्वपरिधेरर्धं हरिद्भिर्दशभिर्भक्ते। अर्णवांशैः चतुरंशैर्वितर्तिं तनोतु। ऋतुसम्मितैः षडंशैरायामं च।।६६।।

विवरणम्

* दीर्घचतुरश्रलक्षणमाह - नाहार्धेति।।६६।।

स्वाभीष्टे परिणाहमाननिचये धाम्नश्चतुःषष्टिभा-
गोनेऽष्टादशधा कृतेऽर्णवमितैरंशैः पृथक् कल्पयेत्।
पार्श्वद्वन्द्वसमायती मुखततिं च द्व्यंशसूत्रभ्रमात्
प्रायः साङ्घ्रिरसांशानाहमपि पृ[2]ष्ठं हस्तिपृष्ठात्मनः।।६७।।

विमर्शिनी

हस्तिपृष्ठात्मप्रासादस्य क्लृप्तिमाह - स्वाभीष्ट इति। हस्तिपृष्ठात्मनो धाम्नः हस्तिपृष्ठप्रासादस्य। स्वाभीष्टे परिणाहमाननिचये स्वाभीष्टप्रासादस्य परिधौ। चतुष्षष्टि-भागोने परिवृ[3]त्तस्य चतुष्षष्टिभागं त्यक्त्वा। शिष्टे अष्टादशधा तु कृते। अर्णवमितैः चतुर्भिरंशैः पृथक् पार्श्वद्वन्द्वसमायती मुखततिं च पार्श्वद्वयदैर्घ्यं मुखविस्तारं च कल्पयेत्। पुनः पृष्ठे द्व्यंशसूत्रभ्रमात् प्रायः साङ्घ्रिरसांशनाह सपादषडंशपरिधियुक्तं पृष्ठं च कल्पयेत्।।६७।।

१. 'दागमयितव्यम्' घ. पाठः, २. 'ष' इति मूलकोशपाठः, ३. 'त' घ. ङ. पाठः
* इयं व्याख्या ६७ श्लोकानन्तरं दृश्यते।

Shripuram Publications
www.shripuram.org

विवरणम्

अर्धवृत्तलक्षणामाह - स्वाभीष्ट इति। परिधिमानं चतुष्षष्ट्या विभज्य एकमंशं परिधिमानादपनयेत्। शेषमष्टांदशधा विभजेत्। तत्र चतुर्भिरंशैर्दक्षिणं पार्श्वं चतुर्भिरंशैरुत्तरं पार्श्वं च कल्पयेत्। चतुर्भिरेव मुखविस्तारं च। अथ पार्श्वद्वयान्तेऽपि चतुर्भागसम्मितं सूत्रं तिर्यग्विधाय तन्मध्याद् द्व्यंशमितसूत्रेण पृष्ठगतमुभयपार्श्वान्तस्पृगर्धवृत्तमालिखेत्। तद्वृत्तं षडंशपरिमितं सम्पद्यते, हस्तिपृष्ठमित्यस्य नामधेयम्।।६७।।

भागद्वये द्विरदपृष्ठसमुक्तनीत्या वृत्तीकृते तदुभयान्तरभागदैर्घ्यम्।
स्वेध्मांशतो विरहितेन गुणांशकेन वृत्तायते वितनुयात् सुरवर्यधिष्ण्ये।।

विमर्शिनी

वृत्तायतप्रासादक्लृप्तिमाह - भागद्वय इति। वृत्तायते सुरवर्यधिष्ण्ये प्रासादे। भागद्वये द्विरदपृष्ठसमुक्तनीत्या हस्तिपृष्ठोक्तप्रकारेण वृत्तीकृते। तदुभयान्तरभागदैर्घ्यं वृत्तद्वयस्य मध्यगतं दैर्घ्यम्। स्वेध्मांशतो विरहितेन स्वस्य नाहस्यैकविंशत्यंशतो रहितेन। गुणांशकेन त्रिभागेन वितनुयात्।।६८।।

विवरणम्

दीर्घवृत्तस्याह - भागद्वय इति। पूर्वं त्रिभिरंशैः स्वकीयैकविंशतिभागवर्जितैः पृथगुभे पार्श्वे कुर्यात्। अथ प्राग्वद् द्व्यंशसम्मितसूत्रेण मुखे पृष्ठे चार्धवृत्ते द्विपार्श्वान्तस्पृशी विरचयेदित्यर्थः। कुक्कुटाण्डमित्येतदुच्यते।।६८।।

षोढा विभज्य निजवाञ्छितमानराशि-
मंशायतानि परिकल्प्य षडश्रकाणि।
कुर्याद् गृहं रसपुटं द्विगुणांशमानो
व्यासोंऽशितेऽत्र तिथिभिर्नयनांशहीनः।।६९।।

विमर्शिनी

षट्कोणप्रासादमाह - षोढा विभज्येति। निजवाञ्छितमानराशिं निजेष्टप्रासादपरिणाहं षोढा विभज्य। अंशायतानि एकैकांशदीर्घाणि। षडश्राणि परिकल्प्य रसपुटं षट्पुटात्मकं

---

१. 'त' घ. ङ. पाठः

Shripuram Publications
www.shripuram.org

गृहं कुर्यात्। अत्र षट्कोणप्रासादे। तिथिभिः पञ्चदशभिः। अंशिते नाहे नयनांशहीनो द्व्यंशहीनः। द्विगुणांशमानो व्यासः दण्ड इत्यर्थः।।६९।।

विवरणम्

अथ षट्कोटिप्रासादस्य लक्षणं दर्शयति - षोढेति। षष्ठमंशं द्विगुणयित्वा स्वकीयपञ्चमांशं स्वस्माज्जह्यात्। स तदीयो विस्तारो भवति। विस्तारकथनमुन्मानस्तम्भादि-जननार्थम्।।६९।।

स्वाभीष्टनाहे दशधा विभक्ते व्यासस्त्रिभागैर्द्विषडंशितेऽस्मिन्।
व्यासे शरांशैर्विहितायतांस्तदश्रीश्च कुर्याद् वसुकोणधाम्नः।।७०।।

विमर्शिनी

अष्टाश्रप्रासादक्लृप्तिमाह - स्वाभीष्टेति। वसुकोणधाम्नः अष्टाश्रप्रासादस्य। स्वाभीष्टनाहे स्वस्य परिधौ। दशधा विभक्ते त्रिभागैर्व्यासो दण्डः। अस्मिन् व्यासे। द्विषडंशिते द्वादशधा कृते। शरांशैः पञ्चांशैः। विहितायतान् कृतदीर्घास्तदश्रीश्च कुर्यात्।।७०।।

विवरणम्

अष्टाश्रलक्षणमाह - स्वाभीष्टनाह इति। परिधिमानं दशधा भङ्क्त्या त्रिभिर्भागैर्वि-स्तारं कल्पयेत्। अथ विस्तारं षडंशं कृत्वा पञ्चांशसम्मितानेकैकानश्रीन् विदध्यादि-त्यर्थः।।७०।।

मूलाद्याशिखरं युगाश्ररचितं गेहं स्मृतं नागरं
ग्रीवाद्याशिखरक्रियं षडुरगाश्रोद्भेदितं द्राविडम्।
मूलाद्वा गलतोऽथवा परिलसद्वृत्तात्मकं वेसरं
तेष्वेकं पृथगात्तलक्ष्मसु विदध्यादात्मनः सम्मतम्।।७१।।

विमर्शिनी

चतुरश्रादिप्रासादानां नामानि कथयति - मूलादीति। मूलाद्याशिखरम् अधिष्ठानादि-शिखरावसानम्। युगाश्ररचितं चतुरश्ररूपेण कृतं गेहं नागरं स्मृतम्। ग्रीवाद्याशिखरक्रियं

www.shripuram.org
Shripuram Publications
www.shripuram.org

ग्रीवादिशिखरपर्यन्तम्। षडुरगाश्रोद्भेदितं षडश्रभेदितमष्टाश्रभेदितं च द्राविडं स्मृतम्। अथ मूलाद्वा गलतो वा परिलसद्वृत्तात्मकं वेसरं स्मृतम्। तेषु पृथगात्तलक्ष्मसु पृथक् पृथगुक्तलक्षणेषु मध्ये। आत्मनः स्वस्य सम्मतं विदध्यात्।।७१।।

विवरणम्

इदानीं वृत्तादिषु उपरितलसंस्थानं दर्शयति - मूलादीति। देशगुणकामादीक्षयेति। हिमवद्विन्ध्यान्तराले नागरं विन्ध्यागस्त्यान्तराले वेसरः। तत आ कुमारीभ्यो द्राविडमिति देशतो विशेषः।।७१।।

नेत्रेषुसप्तदशभानुभिरादिधाम्न-
स्तारं विभज्य विधुलोकयुगाङ्गभूतैः।
विस्तारमत्र रचयेन्मुखमण्डपस्य
पादोनमर्धमथवा सममस्य दैर्घ्यम्।।७२।।

विमर्शिनी

मुखमण्डपलक्षणमाह - नेत्रेति। आदिधाम्नो मूलप्रासादस्य तारं विस्तारं नेत्रेषुसप्तदशभानुभिः द्विधा पञ्चधा सप्तधा दशधा द्वादशधा वा विभज्य। अत्र क्रमेण विधुलोकयुगाङ्गभूतैः एकत्रिचतुःषट्पञ्चांशै। मुखमण्डपस्य विस्तारं रचयेत्। अस्य मुखमण्डपस्य विस्तारस्य। तत्पादोनं तदर्धं तत्समं वा दैर्घ्यं च रचयेत्।।७२।।

विवरणम्

यदा प्रासादावकाशो न पर्याप्तः तदा मुखमण्डपं कार्यम्। अतस्तत्प्रमाणमाह - नेत्रेति। पादोनमिति। स्वविस्तारादिति द्रष्टव्यम्।।७२।।

दण्डेऽर्धेऽन्तर्गतं मण्डलमवनिमितेऽर्धान्विते वान्तहारा
दोःसङ्ख्ये मध्यहारा जलधिपरिमिते बाह्यहाराद्रिसङ्ख्ये।
मर्यादा मूलधाम्नः प्रथमचरमवर्जं मुखायामयुक्ताः
प्राकाराः पञ्च कार्याः स्युरिह चरमसीमैकविंशेऽपि वा स्यात्।।७३।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

पञ्चप्राकाराणां विभागमाह - दण्डेऽर्ध इति। मूलधाम्नो मूलप्रासादाद् अर्धे दण्डे गते सति। अन्तर्गतं मण्डलमष्टमूर्तीनां स्थानं स्यात्। अवनिमिते एकदण्डे। अर्धान्विते सार्धैकदण्डे वा अन्तहारा स्यात्। दोस्सङ्ख्ये द्विदण्डे मध्यहारा। जलधिपरिमिते चतुर्दण्डे बाह्यहारा। अद्रिसङ्ख्ये सप्तदण्डे मर्यादा च। इह चरमसीमा महामर्यादा। सापि एकविंशे दण्डे वा स्यात्। एते पञ्च प्राकाराः प्रथमचरमवर्जं प्रथममन्तर्गतमण्डलं चरमं महामर्यादां च वर्जयित्वा मुखायामयुक्ताः कार्याः स्युः। तथाच विष्णुसंहितायाम्-

"अन्तर्मण्डलदण्डार्धे दण्डे स्यादन्तहारका।
मध्यहारा द्विदण्डा च चतुर्मर्यादभित्तिका।।
सप्तदण्डायता कार्या मर्यादा महती तथा।"

इति। पाशुपते च–

"सप्तसीमासमायुक्तं स्थानं सर्वदिवौकसाम्।
अन्तर्मण्डलमाद्यं स्याद् दण्डार्धे जगतीस्थलात्।।
तस्मादप्येकदण्डान्ते चान्तहारा गृहाद् बहिः।
मूलस्थानाद् द्विदण्डान्ते दीपशाला सुशोभना।।
नीचहारां ततः कुर्याद् दण्डार्धे भित्तिरुज्ज्वला।
मध्यहारा चतुर्दण्डे मर्यादा सप्तसम्मिते।।
एकविंशतिदण्डान्ते महन्मर्यादभित्तिका।"

इति।।७३।।

विवरणम्

अन्तर्मण्डलं लोकपालस्थानम्। दण्डशब्दः सर्वत्र विशेष्यत्वेन अनुयाति। अन्तहारा। दोस्सङ्ख्ये द्विदण्डे मध्यहारा। बाह्यहारा। मूलधाम्न इति सर्वत्र दण्डारम्भावधिरुक्तः।।७३।।

प्रासादस्योत्तरसमवधेर्जागतान्तस्य वा स्याद्
व्यासौ दण्डस्त्रिविध उदितः पादुकान्तस्य वात्र।

www.shripuram.org
Shripuram Publications
www.shripuram.org

नेयश्चापं निजनिजपदात् सैकदण्डः सपादः
सार्धः साङ्घ्रित्रय इति मुखायाममानं समुक्तम्॥७४॥

विमर्शिनी

दण्डलक्षणमाह - प्रासादस्येति। प्रासादस्योत्तरसमवधेः उत्तरावधेर्न्यासो दण्डः स्यात्। जागतान्तस्य वा जगतीपर्यन्तस्य व्यासो वा। पादुकान्तस्य पादुकपर्यन्तस्य व्यासो वा इति अत्र त्रिविधो दण्ड उदितः स्यात्। त्रिविधोऽप्ययं दण्डः निजनिजपदात् स्वस्वस्थानाद् नेयो गमयितव्यश्च। मुखायामनिममाह - सैकदण्ड इति। सैकदण्डः एकदण्डयुक्तः। सपादः पाददण्डयुक्तः। सार्धः अर्धदण्डयुक्तः। साङ्घ्रित्रयः त्रिपाददण्डयुक्त इति मुखायाममानं समुक्तम्। तथाहि विष्णुसंहितायां -

"मुखायामस्त्रिपादेन पादेनार्धेन वा स्मृतः।

इति। पाशुपते च-

"अर्धेन पादहीनेन समस्तेनोत्तरेण तु।

इति॥७४॥

विवरणम्

इदानीं दण्डप्रमाणं मुखायामप्रमाणं चाह - प्रासादस्येति। वास्तोर्विस्तारः। उत्तरसमवधेः प्रासादस्येति सामानाधिकरण्यमवगन्तव्यम्। नेयश्चायं निजनिजपदादिति। यदि तावदुत्तरजनितो दण्डः स मुखगतोत्तरसमानतलदेशादारब्धव्यः। एवमन्ययोरपि योज्यम्॥७४॥

भक्तायामग्रभूमाविषुभिरिह बहिर्द्व्यंशकं त्र्यंशमन्तः
कृत्वान्तर्मण्डले दिक्परिवृढबलिपीठेषु तद्दण्डसीमा।
प्राच्यावाच्याः स्वसूत्रेष्वितरदिगधिपाश्चालिताः किञ्चनातः
प्रादक्षिण्यान्मिथस्ते द्वितय इह महादिङ्मुखाः सम्मुखाश्च॥७५॥

विमर्शिनी

प्राकारान् प्रति दण्डविधिमाह - भक्तायामिति। अन्तर्मण्डले दिक्परिवृढबलिवीठेषु दिङ्नायकबलिपीठेषु। अग्रभूमौ अग्रस्थल्याम्। इषुभिः पञ्चभिर्भक्तायां बहिर्द्व्यंशकम्

Shripuram Publications
www.shripuram.org

अन्तस्त्र्यंशकं कृत्वा तस्मिन् सूत्रे तद्दण्डसीमा तत्रस्थस्य दण्डस्यावसानं स्यात्। प्राच्यावाच्याः प्राग्भवा दक्षिणभवाश्च दिगधिपाः स्वसूत्रेषु। इतरदिगधिपाः पश्चिमभवाः उत्तरभवाश्च। अतः[1] स्वसूत्रात् प्रादक्षिण्यात् किञ्चन चालिताः गमिताः स्युः। ते द्वितयेऽपि महादिङ्मुखाः, न कोणाभिमुखाः, सम्मुखाः अन्योन्याभिमुखाश्च। तथा विष्णुसंहितायां -

"पूर्वास्त्वप्रतिचाल्याः स्युरितरास्त्वस्थिराः शुभाः।
अन्योन्यं दक्षिणाक्षिभ्यामीक्षणं शस्यते बुधैः।।

इति। तथा[2] मञ्जर्यां च–

"अन्तर्मण्डलसीमान्ते लोकेशानां हि पीठिका।
विरिञ्चस्येशपूर्वेण नैर्ऋत्यां पश्चिमोत्तरे।।
अनन्तस्योत्तरे सोमात् कुबेरस्य"

इत्यादि।।७५।।

विवरणम्

मुखायामश्चतुर्विध उक्तः। अथान्तर्मण्डलगतं कृत्यविशेषमाह - भक्तायामिति। अन्तर्मण्डले तद्दण्डसीमा दिक्परिवृढबलिपीठेष्वित्यन्वयः। चतुरश्रं शिलापिण्डं पट्टपद्मरूपेण बलिशिलां विधाय तदुपरिप्रदेशं समं पञ्चधा विभजेत्। तत्र अर्वाचीनभाग-द्वन्द्वावसानमन्तर्मण्डलसीमायां कार्यमित्यर्थः। प्राच्यावाच्याः स्वसूत्रेष्विति। दिक्परिवृढा इत्याक्रष्टव्यम्। पूर्वे दक्षिणे च सम्भूय पञ्च लोकपालाः स्वसीमसूत्र एव तिष्ठेयुः। उत्तरदिक्पालाश्चत्वारस्तु तस्मिन् सूत्र एव किञ्चित् प्रादक्षिण्येन प्रतिमाङ्गुलादिमानेन गमयितव्याः। ते द्वितय इह मिथस्सम्मुखा महादिङ्मुखाश्चेत्यन्वयः। पूर्वे त्रयः पश्चिमास्त्रयश्च परस्परमभिमुखाः। अत एव महादिगभिमुखाश्च। महादिगभिमुखा इति वचनं अग्निवाय्वोरीशनिर्ऋत्योश्च परस्परसम्मुखत्वमागृह्येतेत्येतदर्थम्। दक्षिणोत्तरौ परस्पर-सम्मुखौ स्यातामिति चार्थः।।७५।।

अन्तर्मण्डलतो व्यतीत्य करमात्रं प्रार्चनामण्डपं
तुर्यश्रं समसूरकं निजमुखायामस्य वा मध्यतः।
वेदस्तम्भभृतैकभारमथवा कुर्याच्चतुर्द्वादश-
स्तम्भद्वयुत्तरसंयुतं स्वमकुटाद्यालङ्क्रियालङ्कृतम्।।७६।।

---

१. 'तः सु' ख. पाठः, २. 'था च म' ख. घ. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

पूजामण्डपं विधत्ते - अन्तर्मण्डलत इति। अन्तर्मण्डलतः करमात्रं व्यतीत्य वा निजमुखायामस्य निजमुखदैर्घ्यस्य मध्यतो वा प्रार्चनामण्डपं कुर्यात्। तुर्यश्रं चतुरश्रं च। समसूरकं साधिष्ठानं च। वेदस्तम्भभृतैकभारं चतुर्भिः स्तम्भैर्धृतैकोत्तरं च। अथवा चतुर्द्वादशस्तम्भद्व्युत्तरसंयुतम् अन्तश्चतुर्भिर्बहिर्द्वादशभिः स्तम्भैः तथा द्व्युत्तरेण च संयुतं च। तथाहुः–

"समं त्रिपादमर्धं वा प्रासादस्य तु मण्डपम्।
पुरस्तादुक्तमानानां तन्त्रिद्व्येकतलं तु वा।।
प्रासादतुल्यालङ्कारं तत्समाङ्गं च मण्डयेत्।"

इति।।७६।।

विवरणम्

नमस्कारमण्डपं लक्षयति - अन्तर्मण्डलत इति। अन्तर्मण्डलदण्डसीमामिहिता।।७६।।

दण्डं स्वं समतीत्य भित्तिरुदिता बाह्यान्तहाराश्रिता
दण्डान्तो द्विविधस्तदुत्तरविभिन्नोऽग्रे सभाभेदतः।
ज्वालासीमनि दीपधामनि तथान्तस्थोत्तरेऽन्तर्गते
प्राकारेऽथ बहिष्ठितोत्तरबहिः साले महीयस्यपि।।७७।।

विमर्शिनी

अन्तहारादिषु दण्डावसानस्य नियममाह - दण्डं स्वमिति। अन्तहाराश्रिता बाह्या भित्तिः स्वं दण्डं समतीत्योदिता। अग्रे सभाभेदतः सभाया भेदेन हेतुना। तदुत्तरविभिन्नः सभाया उत्तरभेदवशात्। दण्डान्तो दण्डसीमा द्विविध उदितः। दीपधामनि दीपशालायाम्। ज्वालासीमनि दीपज्वालाग्रे दण्डान्तः। तथान्तर्गते प्राकारे अन्तस्थोत्तरे प्राकारस्यान्तस्थितोत्तरे दण्डान्तः। अथ महीयसि साले महामर्यादायाम्। बहिष्ठितोत्तरविधिः बहिष्ठितस्योत्तरस्य बहिर्भागे दण्डान्तः।।७७।।

Shripuram Publications
www.shripuram.org

विवरणम्

उत्तरेषां प्राकाराणां दण्डसीमा(मा)न(प्रा?प्र)कारविशेषान् दर्शयन्नाह - दण्डं स्वमिति। बाह्यान्तहाराश्रिता अन्तहारायां श्रिता भित्तिः तथा बाह्यहारायां श्रिता भित्तिश्च। अग्रे दण्डान्तः सभाभेदतो बहुधा विभिन्न इत्यन्वयः। तदुत्तरविभिन्न इति विभोः प्रदेश उक्तः। दीपधामनीति। मध्यमहारायामित्यर्थः। अन्तर्गते प्राकारे अन्तस्थोत्तरे महीयसि साले महामर्यादलक्षणे प्राकारे।।७७।।

पृष्ठे *सपार्श्वद्वितये स्वमूलयोन्यन्वितं मण्डपमाकलय्य।
तुर्यश्रमातत्य §ततोऽन्तराले तन्वीत संयोज्ये मिथोऽन्तहाराम्।।७८।।

विमर्शिनी

अन्तहाराक्लृप्तिमाह – पृष्ठ इति। सपार्श्वद्वितये पृष्ठे स्वमूलयोन्यन्वितं स्वस्वदिग्भवयोन्युपक्लृप्तं तुर्यश्रं मण्डपमाकलय्य कल्पयित्वा। आतत्य दीर्घीकृत्य अन्तराले मिथोऽन्योन्यं संयोज्यान्तहारां तन्वीत।।७८।।

विवरणम्

तत्रान्तहारायां परिमण्डपं सूचितं लक्षयति - पृष्ठे चेति। स्वमूलयोन्यन्वितं स्वयोन्यन्वितं मूलयोन्यन्वितं वेत्यर्थः। स्वयोनिर्दिग्योनिः। तुर्यश्रं मण्डपमाकलय्य तदन्तराल आतेत्य मिथस्संयोज्येत्यन्वयः। मण्डपत्रयमुभयतो वर्धयन् कोणत्रये परस्परमेलनं कुर्यात्। एवं दिक्त्रये मण्डपसिद्धिः।।७८।।

कृत्वा वंशं मुखायत्युपचितनिजदण्डस्थितं पार्श्वहारा-
भारासक्ताग्रमूलं प्रथितगुणविभागादिक्लृप्त्या विभज्य।
कृत्वा तद्भागतस्तद्वितितिमुचितयोन्याढ्यमन्योत्तराणि
न्यस्यारूढोत्तरादीन्यपि रचयतु तद्युक्तितोऽग्रे सभायाम्।।७९।।

विमर्शिनी

सभालक्षणमाह - कृत्वा वंशमिति। अग्रे अग्रभागे सभायाम्। मुखायत्युपचितनिज-दण्डस्थितं मुखायामयुक्ताया अन्तहारायाः कल्पिते दण्डे स्थितम्। पार्श्वहाराभारासक्ताग्रमूलं पार्श्वहाराया भारे उत्तरे आसक्तयोर्मूलाग्रभागयोर्युक्तम्। वंशं उत्तरं कृत्वा संस्थाप्य।

* 'च' इति. § 'तदन्ताराले' इति च विवरणरीत्या पाठः।

Shripuram Publications
www.shripuram.org

उचितयोन्याढ्यं स्वदिग्भवयोनियुक्तं च कल्पयित्वा। प्रथितगुणविभागादिक्लृप्त्या प्रसिद्धेन गुणविभागादिना विभज्य। तद्भागतस्तदंशेन। तद्वितति तद्विस्तारं च कृत्वा। तथा तत्सादृश्यान्योत्तराणि त्रीणि च न्यस्य पुनस्तद्युक्तितः आरूढोत्तरादीन्यपि रचयतु।।७९।।

विवरणम्

मुखदिशि तु सभालक्षणमेव मण्डपम्, तत्प्रकारमेवाह - कृत्वेति। सभा हि गोपुरविशेषः। तथाचानन्तप्राकारात्मकत्वाद् बहिः कुट्टिमेन भवितव्यम्। ततो मुखायामसमन्वितेऽन्तहारादण्डेऽग्रदेशे स्थितं सभाया अर्वाचीनमळिन्दोत्तरं यथा तदन्तस्सीमायां दण्डसीमा स्यात् तथा कल्पयेत्। अथ तस्योत्तरस्य दक्षिणोत्तरसीमानौ पार्श्वपरिमण्डपबाह्योत्तरसीम्नोः कल्पयेत्। अथ तमायामं गुणैः पञ्चभिर्वा विभज्य एकेन भागेन सभाया वितानं विदध्यात्। उचितयोन्याढ्यमिति क्रियाविशेषणम्। पश्चिमवंशसमान एव प्राग्वंशोऽपि भवति। तथाच यावत् परिधिमानमुपसम्पद्यते (तावद्) ध्वजवृषयोनिजनिपरिधिमानं समं सङ्कल्प्य शेषं विदध्यात्। प्रथितगुणविभागैरिति गुणकुट्टिमसभाया विभाग उक्तः। पादपङ्क्तिसभालक्षणमेतत्।।

*अथ पादसूत्रसभालक्षणं दर्शयति - तादृग्दण्ड इति। अनाधेगतालिन्दकमिति। पूर्ववदलिन्दोत्तरमिदानीं न ग्राह्यं, किन्तु प्रमाणे परिनिष्ठिते पश्चादेवोपजनयितव्यम्। आरूढोत्तरमेवाधुनाभिप्रेयत इत्यर्थः। गर्भसूत्रं कृत्वेति। मध्ये प्रसारितमृजु कृत्स्नावगाहि गर्भसूत्रम् तत्र च दण्डसीमावसीयते। ¶ मूलाग्र

स्वाभीष्टे सममर्धिते गृहपरिणाहे स्ववंशप्रथा-
द्वन्द्वोने चतुरादियुग्मपरिसङ्ख्याभिर्विभक्ते समम्।
एकांशेन ततिं तनोतु परिशिष्टैराततिं चांशकै-
रूनांशं परितः प्रपूरयतु चैवं पादसूत्रे[1] क्रमः।।८०।।

विमर्शिनी

पादसूत्राख्यायाः सभाया विशेषमाह - स्वाभीष्टमाह इति। स्वाभीष्टे गृहपरीणाहे स्वयोनियुक्तस्य गृहस्य परिधौ। समं यथा तथा अर्धिते सति तत्र स्ववंशप्रथाद्वन्द्वोने स्वोत्तरविस्तारद्विगुणं विहाय। चतुरादियुग्मपरिसङ्ख्याभिः समं विभक्ते तदेकांशेन ततिं तनोतु। परिशिष्टैरंशैराततिं च तनोतु। ऊनांशं प्राक् त्यक्तमुत्तर[2]विस्तारद्वयं च

१. 'त्र' मूलपाठः, २. 'रद्ध' क. पाठः, * अस्या व्याख्याया आधारभूतं पद्यं न दृश्यते।, ¶ इत उत्तरं विवरणव्याख्याने पटलपरिसमाप्तिपर्यन्तो भागो मातृकासु न दृश्यते।

Shripuram Publications www.shripuram.org

परितः प्रपूरयतु। एवं पादसूत्रे पादसूत्राख्यसभाविशेषे क्रमः स्यात्।।८०।।

प्रासादमध्याद् बहिरग्रतो गते
तदुत्तरोत्थे सदलद्विसङ्ख्यके।
दण्डे त्रिसार्धत्रिशराङ्गसप्तके
स्वधाम्नि कुर्याद् बलिपीठिकां तथा।।८१।।

विमर्शिनी

बलिपीठक्लृप्तिमाह - प्रासादमध्यादिति। प्रासादमध्यदेशादारभ्याग्रतो गते बहिर्भागे सदलद्विसंख्यके अर्धसहितद्विदण्डे वा त्रिसार्धत्रिशराङ्गसप्तके त्रिदण्डे वा अर्धसहितत्रिदण्डे वा पञ्चदण्डे वा षड्दण्डे वा सप्तदण्डे वा तदुत्तरोत्थे प्रासादोत्तरकल्पिते दण्डे बलिपीठिकां स्वधाम्नि स्वोचितक्लृप्त्या कल्पिते गृहे कुर्यात्। तथा पाशुपते–

"पञ्चषट्सप्तदण्डाग्रे कल्पयेद् बलिपीठिकाम्"

इति। मञ्जर्यां च – "पीठं प्रासादमध्यादथ बलिविधये पञ्चषट्सप्तदण्डं मुक्त्वा[१]" इति।।८१।।

पूजापीठसमं षडंशरहितं गर्भप्रतिप्रोन्मितं
प्रासादप्रतिसम्मितं च बलिपीठेऽब्जान्तिमाभ्युच्छ्रयम्।
उत्सेधे दशधांशिते सति निजेष्टे पीठिकाविस्तृतिं
सप्तांशैर्विदधीत मूलनिलयौचित्यात् तदङ्गक्रियाम्।।८२।।

बलिपीठलक्षणमाह - पूजापीठेति। बलिपीठे अब्जान्तिमाभ्युच्छ्रयं पद्मपर्यन्तमुच्चं पूजापीठसमं देवस्य पीठपर्यन्तं वा तस्मात् षडंशरहितं[२] वा गर्भप्रतिप्रोन्मितं गर्भगृहस्य प्रतिपर्यन्तं वा प्रासादप्रतिसम्मितं वा विदधीत। चकारो विकल्पार्थः। निजेष्टे उत्सेधे दशधांशिते सति सप्तांशैः पीठिकाविस्तृतिं पीठिकाया उत्तरगतविस्तृतिं, मूलनिलयौचित्यात् तदङ्गक्रियां तदवयवविभागं च विदधीत। तथाहि विष्णुसंहितायां–

"बलिपीठसमुत्सेधो गर्भागारप्रतेः समः।
पूजापीठसमो वापि षड्नो वा प्रकीर्तितः।।
उत्सेधं दशधा कृत्वा सप्तांशस्तस्य विस्तरः।"

---

१. 'क्ता', २. 'तं ग' क. पाठः

Shripuram Publications
www.shripuram.org

इति।।८२।।

पृथ्व्या पादुकमंशतो जगतिकां वेदैर्गुणैः कैरवं
तत्पट्टीगलकम्बुनिद्रवमपि क्ष्मापङ्क्तिभूमीन्दुभिः।
कुर्वीत ज्वलनैः कपोतमिलयाग्रे पट्टिकां पङ्कजं
नेत्राभ्यामपि सप्तविंशतिविभक्ते पीठिकाभ्युच्छ्रये।।८३।।

विमर्शिनी

तद्विभागक्लृप्तिमाह - पृथ्व्येति। पीठिकाभ्युच्छ्रये सप्तविंशतिविभक्ते सति पृथ्व्या अंशतः एकांशेन पादुकं, वेदैश्चतुर्भिरंशतो जगतिकां, गुणैस्त्रिभिः कैरवं कुमुदं, तत्पट्टीगलकम्बुनिद्रवमपि तत्पट्टीं कुमुदपट्टिकां गलं कण्ठं कम्बुनिद्रवं च इति स्थानचतुष्कं क्रमेण क्ष्मापङ्क्तिभूमीन्दुभिः एकेन दशभिरेकैकेन चांशतः, ज्वलनैः त्रिभिः कपोतम्, इलया एकेन अग्रे पट्टिकाम्[१] अग्रपट्टिकां नेत्राभ्यां द्व्यंशतः पङ्कजं च कुर्वीत। तथा च विष्णुसंहितायां–

"सप्तविंशतिधा कृत्वा सममेव तदुच्छ्रयम्।
एकांशं[२] पादुकं कुर्याच्चतुर्भिर्जगतीं पुनः।।
त्रिभागं कुमुदं चैव तथैकांशेन पट्टिकाम्।
दशांशं कण्ठमित्याहुरंशाभ्यां कम्बुनिद्रवौ।।
त्रिभिः कपोतमित्याहुरेकांशेनाग्रपट्टिकाम्।
द्व्यंशकं पद्ममग्रे स्यादेतत् पीठस्य लक्षणम्"।।८३।।

पीठोच्चे रदभेदिते सदलभूसार्धेषुबाणेन्दुभू-
दस्त्राः पादुकजागते कुमुदतत्पट्ट्यन्तरीषु प्रतौ।
अंशा वेदयुगानि वेदिगलयोः सार्धौ वलभ्युत्तरे
दस्रो चेति कपोतके शशिकराः स्युः पट्टिकापद्मयोः।।८४।।

विमर्शिनी

पक्षान्तरेण बलिपीठलक्षणमाह - पीठोच्च इति। पीठोच्चे रदभेदिते द्वात्रिंशद्धा

---

१. 'कां ने' क. पाठः, २. 'शे'

Shripuram Publications
www.shripuram.org

कृते सति सदलभूसार्धेषुबाणेन्दुभूदस्राः सदलभूरर्धसहितमेकं सार्धेषुरर्धसहितं पञ्चकं बाणाः पञ्च इन्दुरेकः भूरेका दस्रौ द्वौ, एतत्क्रमेण पादुकजागते पादुके जगत्यां च कुमुदतत्पट्ट्यन्तरीषु कुमुदे कुमुदपट्ट्यामन्तर्यां च प्रतौ च एतत्स्थानषट्के उक्ता अंशाः स्युः। वेदिगलयोः वेद्यां गले च वेदयुगानि चत्वारश्चत्वारोंऽशाः वलभ्युत्तरे वलभिसहितोत्तरे सार्धौ दस्रौ अर्धसहितद्व्यंशौ। कपोतके च इति अर्धसहितद्व्यंशौ। पट्टिकापद्मयोः पट्टिकायां पद्मे च क्रमात् शशिकराः एकांशो द्व्यंशकौ च स्युः। पञ्चप्राकाराणामुक्तत्वात्[१] केचन तद्विशेषाः संवादग्रन्थैरुदाह्नियन्ते-

"प्रासादभवनादीनां रक्षालङ्कारसिद्धये।
वप्राणि क्रमशः कुर्यात् पञ्चत्रिद्व्येकसंख्यया।।"

अत्र मय आह–

"क्षुद्राणामल्पहर्म्याणां स्वव्यासार्धप्रमाणतः।
अन्तर्मण्डलकं कुर्यात् सत्रिहस्तं तु तत्समम्।।
द्वितीयं[२] च तृतीयं च तस्मात् पञ्चकराधिकम्।
तस्मात् स सप्तहस्तं तु तत्समं स्याच्चतुर्थकम्।।
नवहस्तसमायुक्तं तत्समं पञ्चमं भवेत्।
मध्यमानां[३] तु मूलार्धमन्तर्मण्डलकं भवेत्।
ततः शरर्षिजगतीरुद्रहस्तं यथाक्रमम्।।
वप्रान्तरालविस्तारः प्रोक्तः प्राकारपञ्चके।
अथोत्तमानां मूलार्धं प्रथमं त्वथ चर्षिभिः[४]।।
नन्दरुद्रातिजगतीहस्तैर्हारा भवन्ति हि।
अन्तर्मण्डलभित्तेः स्याद् विष्कम्भः सार्धहस्तवान्।।
तस्मात् त्रित्र्यङ्गुलाधिक्यात् क्रमात् साला भवन्ति हि।
तत्तद्विष्कम्भमानात् तु त्रिगुणं वा चतुर्गुणम्।।
प्राकारतुङ्गता ज्ञेया स्वोच्चाष्टांशं शिरोघनम्।
उत्तरान्तोच्छ्रिता वा स्यात् कुम्भमण्ड्यन्तकोऽपि वा।।

१. 'प्र' घ. पाठः, २. 'यस्य तृ', ३. 'नं', ४. 'पङ्क्तिभिः' घ. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

मसूरकादिवर्गाढ्या खण्डहर्म्यादिमण्डिता।
बुद्बुदार्धेन्दुशीर्षा वा ऋजुर्वा भित्तिरिष्यते।।"

इति। तथा च–

"क्षुद्राल्पभित्तिविस्तारो हस्तादारभ्य पूर्ववत्।
क्रमात् त्रित्र्यङ्गुलाधिक्याद् वर्धयेत् सार्धहस्ततः।।
सोत्तरा वाजनच्छत्रशीर्षवत्यश्च भित्तयः।

इत्यादि।

"गोपुराणामथो लक्ष्म यथावदपि कल्प्यते।
प्रतिवप्रं तु कर्तव्यं द्वारे द्वारे तु गोपुरम्।।"

अत्र मयश्च–

"क्षुद्राल्पमध्यमुख्यानां वप्राणां स्वप्रमाणतः।
मूलप्रासादविस्तारे सप्ताष्टनवभागिके[१]।।
दशैकादशभागे च तत्तदेकांशहानितः।।
द्वारशोभादिविस्तारं गोपुरान्तं भवेत् क्रमात्।
क्षुद्राल्पकानां धाम्नां स्यान्मानमेवं यथोदितम्।।
मध्यानां मूलधाम्नस्तु व्यासे वेदेषुभागिके।
षट्सप्ताष्टांशके[२] वा स्याद् भागोनं गोपुरं पृथक्।।
त्रिभागैकांशमर्धं च द्विभागं स्यात् त्रिभागिके।
चतुर्भागे त्रिभागं च पञ्चांशे चतुरंशकम्।।
द्वारशोभादिविस्तारं श्रेष्ठानां गोपुरं मतम्।
तुङ्गं तु गोपुराणां स्यात् सप्तांशे रुद्रभागिकम्।।
चतुरंशे षडंशोच्चं पञ्चांशे सप्तभागिकम्।
सप्तांशं तु चतुर्भागे नवभागे तु पञ्चके।।
द्विगुणं वा यथासंख्यं द्वारायतनतुङ्गता।"

इत्यादि।।८४।।

---

१. 'ते' क. पाठः, २. 'ते' ख. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

द्वारोत्सेधसमं तदङ्घ्रिरहितं[1] द्वारेऽखिले चोनिते
नन्दांशेन गजांशकेन च समं भक्ते त्रिधा द्व्यंशकैः।
क्लृप्तानीत्युदितानि पञ्च मनुबिम्बान्यत्र गर्भालये
भक्ते लोकशरेक्षणैर्द्विगुणभूम्यंशग्रहात् त्रीणि च।।

विमर्शिनी

एवं प्रासादमण्डपप्राकारादीनां लक्षणमभिधाय प्रतिमापीठादीनां लक्षणं वदन् प्रथमं मन्त्रबिम्बस्य दैर्घ्यक्लृप्तिमाह - द्वारोत्सेधसममिति। द्वारस्योत्सेधेन समं तदङ्घ्रिरहितं द्वारोत्सेधाच्चतुर्थांशहीनमिति द्वे बिम्बे। अखिले द्वारे द्वारोत्सेधे नन्दांशेन नवांशेनोनिते द्वारे च गजांशकेन अष्टांशेनोनिते द्वारे च तेषु त्रिष्वपि त्रिधा समं भक्ते द्व्यंशकैः द्विद्विभागैरिति त्रीणि क्लृप्तानि इति अत्र द्वारवशात् पञ्च मनुबिम्बान्युदितानि। पुनर्गर्भालये गर्भगृहे लोकशरेक्षणैः त्रिभिः पञ्चभिर्द्वाभ्यां च भक्ते क्रमाद् द्विगुणभूम्यंशग्रहाद् द्वित्र्येकांशपरिग्रहात् त्रीणि चोदितानि स्युः। तथाहि विष्णुसंहितायां–

"द्वारेच्चेऽष्टांशहीने स्यात् त्रिभक्तेऽर्चा[2] द्विभागिका।
नवांशोन समस्ते वा पादोना वापि तत्समा।।"

इति। ब्रह्मरात्रे च–

"अत्र तु प्रतिमायामः पञ्चधा परिकीर्तितः।
प्रासादगर्भागार्धमायाममधमं भवेत्।।
पञ्चभागीकृते त्वत्र त्रिभागैर्मध्यमं भवेत्।
त्रिभागीकृतगर्भे तु द्विभागं चोत्तमं भवेत्।।
पादायामश्च कर्तव्यो द्वारायामस्तथैव च।"

इति।।८५।।

स्वाभीष्टं दशधोत्तमे विभजतां मानं समं मध्यमे
कर्तव्ये नवधाष्टधा च चरमे बिम्बे तदेकांशकम्।
तालं तन्मिहिरांशमङ्गुलमदोद्वन्द्वं कलां गोलकं
चाहुर्मध्यममन्त्रबिम्बरचनात्रोदीर्यते सङ्ग्रहात्।।८६।।

---

१. 'त' मूलपाठः, २. 'च' ख. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

कल्पितदैर्घ्यस्य मन्त्रबिम्बस्य प्रस्तारे विभागक्लृप्तिमाह - स्वाभीष्टमिति। उत्तमे बिम्बे कर्तव्ये स्वाभीष्टं मानं समं दशधा विभजताम् अंशीकुर्यात्, मध्यमे कर्तव्ये नवधा च, चरमे अधमे अष्टधा च। तदेकांशकं दशांशिते नवांशिते अष्टांशिते च तेष्वेकमंशं तालमाहुः। आचार्या इति शेषः। तन्मिहिरांशं तस्य तालस्य द्वादशांशमङ्गुलमाहुः। अदोद्वन्द्वम् अङ्गुलद्वयं कलां गोलकं चाहुः। तत्राङ्गुलस्याष्टांशं यवं [1]चेति सिद्धं भवति। अत्र एषु त्रिष्वपि मध्ये मध्यम(मन्त्र)बिम्बरचना नवतालबिम्बरचनाप्रकारः संग्रहात् संक्षेपेणोदीर्यते। तथा च–

"उत्तमा दशतालार्चा नवताला तु मध्यमा।
अष्टतालाधमा ज्ञेया देव्यः स्युश्चाष्टतालिकाः।।
उत्तमं पार्थिवे मानं दारवे मध्यमं भवेत्।
मणिजे चाधमं ज्ञेयमिच्छयान्यत्र कल्पयेत्।।
दशधा नवधा चेष्टं मानं कृत्वैकमंशकम्।
भङ्क्त्वा द्वादशधा ज्ञेयं स्वाङ्गुलं येन मीयते।।

तथा च सात्त्वते–

"अष्टोत्तरशतांशो यः स्वोन्नतेरङ्गुलं तु तत्।
तद्द्वेऽङ्गुले कला नेत्रं गोलकं भाग एव च।।
अङ्गुलाष्टमभागो यः स यवः परिकीर्तितः।"

इति।।८६।।

प्रायः स्ववाञ्छितमितिद्विगुणायतेष्ट-
पादोनविस्तृततदर्धघनां शिलां ताम्।
तुर्याश्रतां समतले निपुणं निधाय
प्रस्तारमत्र तनुयादथ मन्त्रमूर्तेः।।८७।।

विमर्शिनी

बिम्बप्रस्तारे इति कर्तव्यतां दर्शयति – प्राय इति। प्रायः स्ववाञ्छितमितिगुणायतेष्ट-

---

१. 'च यतिसि' क. पाठः

Shripuram Publications
www.shripuram.org

पादोनविस्तृततदर्धघनां प्रायेण स्ववाञ्छिताया मितेः द्विगुणप्रमाणेनायतेन युक्ताम्, इष्टस्य स्वाभीष्टदैर्घ्यस्य पादोनेन प्रमाणेन विस्तृतां तदर्धेन विस्तारार्धेन घनेन तीव्रेण च युक्तां तां प्रस्तुतां शिलां तुर्याश्रतां चतुरश्रीकृतां कृत्वा समतले प्रदेशे निपुणमचञ्चलं[1] निधाय अथात्र मन्त्रमूर्तेः प्रस्तारं तनुयात्। तथाच निबन्धने–

"चतुरश्रायतां कृत्वा शिलां पूर्वप्रमाणिताम्।"

इति। सात्वते च–

"भूभागे तु समे श्लक्ष्णे मानमुत्कीर्य तेन वै।
निरूप्यावयवानां च लक्ष्म विस्तृतिपूर्वकम्।।"

इति।।८७।।

शीर्षाग्राद्यलिकान्तिमं त्रिभिरतो भास्वन्मितैरङ्गुलै-
रुन्मेयं चिबुकान्तिमं गुणमितैः कण्ठो हृदन्तं ततः
नाभ्यन्तं च शिवान्तिमं च दिनकृत्सङ्ख्यैस्त्रिभिर्जानुनी
गुल्फाद्यङ्घ्रियुगं च सङ्कृतिमितैर्जङ्घाद्वयोरुद्वये।।८८।।

विमर्शिनी

नवतालकल्पनीयस्याष्टोत्तरशताङ्गुलस्य बिम्बस्य विभागक्लृप्तिमाह - शीर्षाग्रादीति। शीर्षाग्राद्यलिकान्तिमं मूर्धादिललाटपर्यन्तं त्रिभिरङ्गुलैः उन्मेयं स्यात्। अतो ललाटात् चिबुकान्तिमं भास्वन्मितैर्द्वादशभिरङ्गुलैरुन्मेयम्। गुणमितैस्त्रिभिः कण्ठ उन्मेयः। ततः कण्ठात् हृदन्तं ततो नाभ्यन्तं ततः सिवान्तिमं लिङ्गान्तं च, एतानि त्रीणि स्थानानि दिनकृत्संख्यैर्द्वादशभिर्द्वादशभिः। त्रिभिर्जानुनी जानुद्वयम्। गुल्फाद्यङ्घ्रियुगं गुल्फाद्यधोगतपादद्वयं च त्रिभिः। जङ्घाद्वयोरुद्वये जङ्घाद्वयमूरुद्वयं च संकृतिमितैश्चतुर्विंशत्यङ्गुलैः। तथा विष्णुसंहितायां–

"ग्रीवाहृन्नाभिमेढ्रान्तं मुखमानेन कल्पयेत्।
तद्भङ्क्त्वा मूर्धकण्ठाङ्घ्रिजानुदेशे समं न्यसेत्।।
जङ्घोरू द्विगुणौ ज्ञेयौ बाहू चाजानुलम्बिनौ।
किरीटमधिकं कुर्यात् पद्मनालं च मानतः।।"

---

१. 'चलं' ख. पाठः

Shripuram Publications
www.shripuram.org

इति।।८८।।

सीमास्वासु सपद्मनालमुकुटान्तासूरुजङ्घाद्वयी
मध्याढ्यासु करोतु षोडश तिरश्चीनानि सूत्राण्यथ।
मध्ये कर्णकरास्त्रसीमसु तथा सप्तोर्ध्वगान्यप्यथो
वक्त्रं द्वादशवर्गकोष्ठसुविचित्रं कल्पयेत् सूत्रकैः।।८९।।

विमर्शिनी

एवं विभक्तासु सन्धिषु सूत्राण्यास्फालयेदित्याह - सीमास्विति। सपद्मनालमुकुटान्तासु पद्मनालस्य मुकुटस्य चावसानयुक्तासु ऊरुजङ्घाद्वयीमध्याढ्यासु ऊरुद्वयस्य जङ्घाद्वयस्य च मध्यभागयुक्तास्वासु सीमासु सम्भूय षोडश तिरश्चीनानि सूत्राणि करोतु, अथ तथा मध्ये कर्णकरास्त्रसीमसु कर्णसीम्नोः करसीम्नोरायुधसीम्नोश्च सप्तोर्ध्वगान्यपि सूत्राणि च। अथो वक्त्रं वक्त्रप्रदेशं द्वादश(वर्ग)कोष्ठसुविचित्रम् आयामतो विस्तारतश्च द्वादशपदयुक्तं सूत्रकैरास्फाल्य कल्पयेत्। तथाच वैष्णवे–

"तिर्यक् षोडश सूत्राणि सप्तोर्ध्वानि च कल्पयेत्।"

सनन्दप्रश्ने च–

"पादे सूत्रद्वयं तिर्यग्जङ्घामध्ये तृतीयकम्।
पादेन जानु विज्ञेयमूरुमध्ये तथापरम्।।
मेढ्रान्ते सप्तमं ज्ञेयं नाभ्यां च हृदये द्वयम्।
कण्ठे द्वयं ललाटेऽन्यत् सूत्रमेकं शिरस्यथ।।
मकुटान्ते च विज्ञेयं सूत्राण्येवं चतुर्दश।
पद्मान्ते चैकमेकं च नालान्ते चेति षोडश।।
सुषिन्माकर्णयुग्बाह्वायुधे सप्तोर्ध्वगानि च।"

पुनर्वैष्णवे–

"तिर्यगूर्ध्वगतैः सूत्रैर्मुखे द्वादशधा कृते।"

इति।।८९।।

Shripuram Publications
www.shripuram.org

अष्टाङ्गुलायतमतोऽर्धततं ललाट-[1]
मर्धेन्दुसुन्दरमधोऽब्धिपदायता स्यात्।[2]
नासा पदद्वयतताङ्गुलनिम्नमूला[3]
व्यासोच्छ्रिताग्ररुचिरा तिलपुष्पकल्पा॥९०॥

विमर्शिनी

मुखविभागमाह - अष्टाङ्गुलेति। अष्टाङ्गुलायतम् अष्टांङ्गुलदैर्घ्ययुक्तम्, अतो दैर्घ्याद्, अर्धततं चतुरङ्गुलविस्तृतम्, अर्धेन्दुसुन्दरम् अर्धेन्दुवत् सुन्दरं, ललाटं स्यात्। अस्याधोगता, अब्धिपदायता पदानामङ्गुलप्रमाणत्वाच्चतुरङ्गुलदीर्घा, पदद्वयतता अङ्गुलद्वयविस्तृता, अङ्गुलनिम्नमूला एकाङ्गुलनिम्नेन मूलेन युक्ता, व्यासोच्छ्रिताग्ररुचिरा अङ्गुलद्वयोच्छ्रितेनाग्रभागेन सुन्दरा, तिलपुष्पकल्पा तिलपुष्पसदृशी च नासा स्यात्। तथा निबन्धने –

"चतुष्केण चतुष्केण ललाटं नासिका मुखम्।"

सात्वते च –

"आस्यनासाललाटार्थं वदनांशं भजेत् त्रिधा।
तत्राग्रतः कलामानं घ्राणं स्यात् तिलपुष्पवत्॥"

वैष्णवे च –

"ललाटकण्ठविस्तारो नासिकाद्विगुणो मतः।
नेत्रवन्नासिकाग्रोच्चं निम्नमूलं तदर्धतः॥"

इति॥९०॥

तन्मूलपार्श्वयुजि पञ्चमसूत्रसंस्थे
कोष्ठद्वयाततिमती पदविस्तृते च।
मध्यत्रिभागकृततारकतत्रिभाग-
क्लृप्तार्चिषी विरचयेन्नयनाम्बुजे द्वे॥९१॥

विमर्शिनी

नेत्रलक्षणमाह - तन्मूलेति। तन्मूलपार्श्वयुजि नासाया मूलस्य पार्श्वद्वये, पञ्चमसूत्र-

---

१. 'त', २. 'तो', ३. 'लि' मूलपाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

संस्थे वदनोर्ध्वगतसूत्रादारभ्य गणनात् पञ्चमसूत्रस्थिते, कोष्ठद्वयाततिमती अङ्गुलद्वयदीर्घ-युक्ते, पदविस्तृते एकाङ्गुलविस्तारयुक्ते च, मध्यत्रिभागकृततारकतन्त्रिभागक्लृप्तार्चिषी नेत्रस्य मध्ये नेत्रत्रिभागेन कृताभ्यां द्वाभ्यां तारकाभ्यां तन्त्रिभागेन कृताभ्यामर्चिर्भ्यां च युक्ते, द्वे नयनाम्बुजे अम्बुजान्तर्दलसमाने नयने विरचयेत्। तथा सनन्दप्रश्ने–

"तन्मध्ये नासिका कार्या तस्य मध्यगतस्य तु।
उभयोः पार्श्वयोः सूत्रे तत्र सूत्रान्तरस्थिते॥
ऊर्ध्वाङ्गुलादधस्तात्तु अङ्गुले पञ्चमे स्थिते।
अधोऽङ्गुलै[१]रूर्ध्वतस्तु अङ्गुले चाष्टमे स्थिते॥
तयोस्तु सूत्रयोर्मध्ये कुर्याज्ज्योतिर्द्वयं समम्।

इति। सात्वते च–

"आद्यस्य नासिकांशस्य मध्यभागसमाश्रिते।
कुर्यान्नेत्रश्रुतिच्छिद्रे तत्र नेत्रे कलान्तरे॥

इति। विष्णुसंहितायां च–

"तारके तन्त्रि[२]भागस्थे ज्योतिषी तन्त्रि[३]भागतः।

इति॥९१॥

फालेक्षणान्तर[४]गते द्विकलायते च
चिल्ल्यौ कलाव्यवहिते द्वियवप्रताने।
नेत्रैकवीथिविसरत्तुटुकान्तरन्ध्रौ
कर्णौ करार्णवप[५]दंप्रततातततौ च॥९२॥

विमर्शिनी

[६]चिल्लीलक्षणमाह - फालेति। फालेक्षणान्तरगते ललाटनेत्रयोर्मध्यगते, द्विकलायते चतुरङ्गुलदीर्घे, द्वियवप्रताने द्वियवविस्तारे कलाव्यवहिते मध्ये द्व्यङ्गुलविच्छिन्ने च, चिल्ल्यौ चिल्लीद्वयं, विरचयेत्। कर्णलक्षणमाह - नेत्रेति। नेत्रैकवीथिविसरत्तुटुकान्तरन्ध्रौ नेत्रैकवीथ्यां प्रसरतः कर्णशङ्कुनाम्नस्तुट्टुकस्यान्ते रन्ध्रेण युक्तौ, करार्णवपदप्रततातततौ द्व्यङ्गुलविस्तारौ चतुरङ्गुलदीर्घौ च, कर्णौ विरचयेत्। तथा सात्वते –

१. 'ले' ख. पाठः, २, ३. 'त्र भा क.' पाठः, ४. 'कृ', ५. 'दं' मूलकोशपाठः, ६. 'व' ख. पाठः

Shripuram Publications
www.shripuram.org

"भ्रूलते द्विकले स्मृते।
मध्यतो द्वियवे बालचन्द्रतुल्ये क्रमक्षते।।

इति।। तथाच विष्णुसंहितायां –

"भ्रूमध्यं नेत्रमध्यवत्।
कर्णायामस्तु नासावद् विस्तारं च तदग्रवत्।।
तुट्टुकौ नेत्रसूत्रस्थौ तद्विस्तारेण सम्मितौ।

इति।।९२।।

द्व्येकाङ्गुलायततदर्धतताधरोत्त-
रोष्ठान्ततोऽङ्गुलविनिस्सृतसृक्वयुग्मम्।
कम्बीरकादिरुचिरं प्रकरोतु गोजिं
घोणाग्रसामिपिहिताष्टयवावतीर्णाम्[१]।।९३।।

विमर्शिनी

ओष्ठादीनां लक्षणमाह - द्व्येकाङ्गुलेति। द्व्येकाङ्गुलायततदर्धतताधरोत्तरोष्ठान्ततः क्रमेण द्वाभ्यामङ्गुलाभ्यां एकेनाङ्गुलेनायतं तदर्धेन ततं विस्तृतम् अधरोष्ठमुत्तरोष्ठं च तयोरन्ततोऽवसाने, अङ्गुलविनिःसृतसृक्वयुग्मम् एकाङ्गुलेन विनिस्सृतं व्यवहितं सृक्वयुग्मं च, कम्बीरकादिरुचिरं कम्बीरकादिना रुचिरं सुन्दरं च, प्रकरोतु। कम्बीरो हनुः। घोणाग्रसामिपिहिताष्टयवावतीर्णां घोणाग्रेण नासाग्रेण सामि अर्धं पिहितां छन्नाम् एकाङ्गुलाधोगतां गोजिं[२] नासाया अधोगतकुल्यां[३] च प्रकरोतु। तथा विष्णुसंहितायां-

"पुटौ निष्पावबीजाभौ भ्रूमध्यं नेत्रमध्यवत्।
अधरस्तत्समोऽन्योष्ठौ गोजिकामानमर्धतः।।

सात्वते च –

"अर्धाङ्गुलं चोत्तरोष्ठमधरोष्ठं तु चाङ्गुलम्।
गोलकं[४] चिबुकं विद्धि सृक्विण्योश्चतुरङ्गुलम्।।
नासाग्रग्राहनिर्मुक्तगोजीमानं चतुर्यवम्।
तच्चतुर्यवमानेन घ्राणाग्रेणान्तरीकृतम्।।

---

१. 'की' मूलकोशपाठः, २. 'चिं' क. पाठः, ३. 'ङ्यां' ख. पाठः, ४. 'लं' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

इति ।।९३ ।।

शब्दग्रहादिचिबुकावधि मानमिष्ट-
मष्टाङ्गुलैश्चिबुकमानमथाङ्गुलाभ्याम् ।
ग्रीवा गजाङ्गुलततार्ककलोपपन्नं
कक्षान्तरं स्तनयुगान्तरमेकतालम् ।।९४ ।।

विमर्शिनी

कण्ठचिबुकादीनामान्तारालिकं मानमाह - शब्दग्रहेति । शब्दग्रहादिचिबुकावधि कर्णादिचिबुकपर्यन्तं, मानमष्टाङ्गुलैरिष्टम् । अथाङ्गुलाभ्यां द्वाभ्यां चिबुकमानम् । गजाङ्गुलतता अष्टाङ्गुलविस्तृता ग्रीवा स्यात् । अर्ककलोपपन्नं चतुर्विंशत्यङ्गुलमितं कक्षान्तरं कक्षयोर्मध्यविस्तारं च, एकतालं द्वादशाङ्गुलं स्तनयुगान्तं स्तनयोर्मध्यविस्तारं च । तथाहि विष्णुसंहितायां –

चिबुकाकर्णयोर्मध्यकण्ठांसा नेत्रसम्मिताः ।
ललाटकण्ठविस्तारो नासिकाद्विगुणो मतः ।।
स्तनान्तरं मुखं विद्याद् द्विगुणं चैव कक्षयोः ।

इति ।।९४ ।।

नाभिस्थली प्रवितता नृपतिप्रमाणैः
स्यादङ्गुलैः कटितटी धृतिसम्मितैश्च ।
कक्षस्तनान्तरमृतुप्रमिताङ्गुलाढ्यं
कक्षांसमध्यमपि मांसलमंसयुग्मम् ।।९५ ।।

विमर्शिनी

नृपतिप्रमाणैः षोडशसंङ्ख्यैरङ्गुलैः प्रवितता विस्तीर्णा नाभिस्थली स्यात् । धृतिसम्मितैरष्टादशाङ्गुलैः कटितटी च । ऋतुप्रमिताङ्गुलाढ्यं षडङ्गुलयुक्तं कक्षस्तनान्तरं कक्षस्तनयोरन्तरालम् । कक्षांसमध्यमपि कक्षांसयोर्मध्यमपि तथा षडङ्गुलयुक्तम् । मांसलं घनं चांसयुग्मं स्यात् । तथाच विष्णुसंहितायां–

---

१. 'लं चिबु' मूलकोशपाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

"कण्ठद्विगुण एवेष्टो नाभिदेशे तु विस्तरः।
कटौ नेत्राधिकस्त्र्यंशं स्तनकक्षान्तरं विदुः।।
तावत्कक्षांसमध्यं च कारयेत् स्कन्धमुन्नतम्।

इति।।९५।।

कक्षादिसन्ध्यवधिकायतिरङ्कसङ्ख्यैः
स्याद् गोलकैः शिवमितैर्मणिबन्धनिष्ठा।
दिक्संख्यकैरुपभुजेऽथ ततिश्[1]चतुर्भि-
र्मूले प्रकोर्परयुगे भुजयोस्त्रिभिश्च।।९६।।

विमर्शिनी

अङ्कसङ्ख्यैर्नवभिर्गोलकैरष्टादशाङ्गुलैः कक्षादिसन्ध्यवधिकायतिः कक्षादिकोर्परान्तदैर्घ्यं स्यात्। शिवमितैरेकादशसङ्ख्यैर्गोलकैर्द्वाविंशत्यङ्गुलैः सन्ध्यादिमणिबन्धनिष्ठा आयतिः स्यात्। उपभुजे ऊर्ध्वभुजे सति तत्र दिक्संख्यकैर्गोलकैर्विंशत्यङ्गुलैः सन्ध्यादिमणिबन्धनिष्ठायतिः स्यात्। अथ भुजमूले चतुर्भिर्गोलकैरष्टाङ्गुलैः ततिः विस्तारः स्यात्। प्रकोर्परयुगे त्रिभिर्गोलकैः षडङ्गुलैस्ततिश्च। तथाच संहितायां–

"कटिवत् सन्धिकक्षान्तं प्रकोष्ठं नासिकाधिकम्।"

मुरारौ च–

"उपबाह्वोस्तु विज्ञेया शलाका दशगोलका।
मणिबन्धस्तु नासावत्[2] ततोऽङ्गुष्ठान्तरं तथा।।
द्विगुणो बाहुविस्तारो नेत्रोनश्चैव कोर्परे।"

इति।।९६।।

अष्टाङ्गुलैः करतलाततिरश्विहीनै-
स्तद्विस्तृतिर्भवति मध्यमिकायतिश्च।
मध्याद्[3] दशांशरहिते निजपार्श्वजे तत्-
पङ्क्त्यंशमात्ररहिते प्रथमान्त्यशाखे।।९७।।

---

१. 'त', २. 'र्ततो' मूलकोशपाठः, ३. 'ध्या द' मूलकोशपाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

करतलाततिः करतलगतदैर्घ्यम्, अष्टाङ्गुलैर्भवति। तद्विस्तृतिः करतलविस्तारः अश्वि[1]हीनैरष्टाङ्गुलैः षडङ्गुलैर्भवतीत्यर्थः। मध्यमिकायतिश्च मध्यमाया दैर्घ्यं च तथा षडङ्गुलैः। मध्यान्मध्यमादैर्घ्याद् दशांशरहिते दशांशहीने निज पार्श्वजे[2] मध्यपार्श्वजे तर्जन्यनामिके। तत्पङ्क्त्यंशमात्ररहिते तर्जन्यनामिकाभ्यां दशांशमात्ररहिते प्रथमान्त्यशाखे अङ्गुष्ठ(तर्जन्यौ ? कनिष्ठिके) भवतः। तथाच संहितायां–

"तत्र मध्यमयोर्मानं नासिकाधरयोगतः।
तले नेत्राधिकायामे मध्यमायामविस्तरे।।
कल्पयेदर्धपर्वोने तथा तर्जन्यनामिके।
तयोरप्यर्धपर्वोने तथाङ्गुष्ठकनिष्ठिके।।"

इति।।९७।।

अङ्गुष्ठके विततिरर्कयवैः परासु
त्र्यंशोनितैः प्रतिपरुं लघिमा यवेन।
मध्योद्भवाप्रथमपर्वयुगं समान-
दैर्घ्यं तदर्धपरिमाणमथाग्र्यपर्व[3]।।९८।।

विमर्शिनी

अङ्गुष्ठके अर्कयवैर्द्वादशयवैर्विस्तृतिः। परास्वङ्गुलिषु त्र्यंशोनितैरष्टयवैर्विततिः। प्रतिपरुं प्रतिपर्व लघिमा लघुत्वं यवेन एकयवेन। मध्योद्भवाप्रथमपर्वयुगं मध्यमायाः अधोगतपर्वद्वयं समानदैर्घ्यम्। अथाग्र्यपर्व मध्यमायाअन्त्यपर्व तदर्धपरिमाणं तदर्धदैर्घ्य-युक्तम्। तथा काश्यपः –

अङ्गुष्ठमूलविस्तारं [4]सपादांशमुदाहृतम्"

इति। सात्वते च–

"द्विपर्वातु स्मृतोऽङ्गुष्ठः सर्वाश्चाङ्गुलविस्तृताः।
सर्वासां मूलमध्यान्ताद् ग्रासयेच्च यवं यवम्।।
मध्यमापर्वणी पूर्वे समे शेषं तदर्धकम्।"

---

१. 'क्षि', २. 'जे त' ख. पाठः, ३. 'र्वम्'।।, ४. 'सं' ख. पाठः

Shripuram Publications
www.shripuram.org

इति।।९८।।

देशिन्युपावरजयोरमुतो द्विपांश-
हीनानि पादरहितानि कनिष्ठिकायाः।
पर्वाणि पर्वयुगलं क्रमशोऽथ तर्जा-
मध्याद्यपर्वसुसमं प्रथमोद्भवायाः।।९९।।

विमर्शिनी

देशिन्युपावरजयोः तर्जन्यनामिकयोः अमुतो मध्यमाया द्विपांशहीनानि अष्टांशहीनानि पर्वाणि। कनिष्ठिकाया अमुतः पादरहितानि पर्वाणि। अथ प्रथमोद्भवाया अङ्गुष्ठस्य पर्वयुगलं क्रमशस्तर्जामध्याद्यपर्वसुसमं तर्जनीमध्यमयोराद्यपर्वभ्यां सुसमं भवति। तथाहुः-

"अष्टांशोनानि पर्वाणि ततो देशिन्यनामयोः।
पादोनानि कनीयस्या योक्तव्यान्यनुरूपतः।।
तर्जनीमध्यमापर्वसमे चाङ्गुष्ठपर्वणी।"

इति।।९९।।

स्वस्वाग्रपर्वदलतो रचिता नखाः स्यु-
र्नाहोऽङ्गुलैः श्रुतिमितैः प्रथमप्रसूतेः।
मध्याद्विपार्श्वजनितावरजास्वतोऽतो
नाहोऽष्टमांशरहितो विहितः क्रमेण।।१००।।

विमर्शिनी

स्वस्वाग्रपर्वदलतः स्वस्वाग्रपर्वार्धेन रचिता नखाः स्युः। प्रथमप्रसूतेः अङ्गुष्ठस्य नाहः श्रुतिमितैः चतुर्भिरङ्गुलैः स्यात्। मध्याद्विपार्श्वजनितावरजासु मध्यमायां तर्जन्यनामिकयोः कनिष्ठिकायां च क्रमेण अतोऽतः अस्मादस्माद् अष्टमांशरहितो नाहो विहितः। तथाच संहितायां–

'सर्वाङ्गुलीषु कार्याः स्युरग्रपर्वार्धतो नखाः।
नाहोऽङ्गुष्ठस्य नासावदष्टांशोनं ततोऽन्ययोः।।
ततश्चैवं कनिष्ठाया वृत्ते भुजसमे स्फिजौ।

Shripuram Publications
www.shripuram.org

इति।।१००।।

**अङ्गुष्ठतर्जनिकयोर्नयनाङ्गुलाढ्य-
मभ्यन्तरं प्रथमजामणिबन्धमध्यम्।
अब्ध्यङ्गुलैः परिमितं मणिबन्धकेऽपि
तैर्विस्तृतिः करभदैर्घ्यमथार्धतालम्।।१०१।।**

विमर्शिनी

अङ्गुष्ठतर्जनिकयोः अ(भ्य)न्तरं मध्यं नयनाङ्गुलाढ्यं द्व्यङ्गुलयुक्तम्। प्रथमजामणिबन्धमध्यम् अङ्गुष्ठमणिबन्धयोरन्तरम् अब्ध्यङ्गुलैश्चतुरङ्गुलैः परिमितम्। मणिबन्धकेऽपि तैश्चतुरङ्गुलैः विस्तृतिः स्यात्। (മണിബന്ധം = കണങ്കൈയ്യ്) करभदैर्घ्यं करभस्य दैर्घ्यम् अर्धतालं षडङ्गुलं स्यात्। (കരഭം = ചെറുവിരൽക്കുകീഴിടം) तथाहु–

"तत्राङ्गुष्ठप्रदेशिन्योर्नेत्रसम्मितमन्तरम्।
मणिबन्धस्तु नासावत् ततोऽङ्गुष्ठान्तरं तथा।।
अन्तरं मध्यमातुल्यं कनिष्ठामणिबन्धयोः।"

इति।।१०१।।

**लिङ्गं युगाङ्गुलमितं वृषणद्वयं स्याद्
द्विद्व्यङ्गुलं द्विरदकुम्भनिभे स्फिजौ द्वे।
वृत्ते षडङ्गुलतते द्वयमध्यसंस्था
कौपीनराज्यपि कलावितता कृशाग्रा।।१०२।।**

विमर्शिनी

लिङ्गं यूगाङ्गुलमितं मेढ्रं चतुरङ्गुलदीर्घम्। वृषणद्वयं द्विद्व्यङ्गुलम्। स्फिजौ षडङ्गुलतते षडङ्गुलविस्तृते वृत्ते वृत्ताकारे च द्विरदकुम्भनिभे द्विपकुम्भप्रख्ये च। द्वयमध्यसंस्था कौपीनराजी कौपीनवीथी कलावितता द्व्यङ्गुलविस्तारा कृशाग्रा च क्रमेण कार्श्ययुक्ताग्रभागापि स्यात्। तथा सात्वते–

Shripuram Publications
www.shripuram.org

“द्व्यङ्गुलौ वृषणौ दैर्घ्यान्मूलान्तसमविस्तृतौ।”

इति। मुरारौ च–

“द्व्यङ्गुलौ वृषणौ मेढ्रं चतुरङ्गुलमायतम्।”

इति। निबन्धने च - “स्फिजौ षडङ्गुले वृत्ते” इति। सात्वते–

“तथा कौपीनराजी च द्व्यङ्गुला मूलतः स्मृता।”

इति।।१०२।।

मूलान्तराग्रविततिः क्रमशोऽङ्गुलैः स्या-
दूरुद्वये सुषिरभानुशरप्रमाणैः।
जङ्घाद्वयेऽङ्गगिरिसत्रियवत्रिसङ्ख्यैः
कुर्यात् ककुप्परिमितैरपि जानुयुग्मे।।१०३।।

विमर्शिनी

ऊरुद्वये मूलान्तराग्रविततिः मूलमध्यान्तेषु विस्तृतिः सुषिरभानुशरप्रमाणैः क्रमशो नवद्वादशपञ्चसङ्ख्यैरङ्गुलैः स्यात्। जङ्घाद्वये मूलान्तराग्रविततिः अङ्गगिरिसत्रियवत्रिसङ्ख्यैः क्रमेण षड्भिः सप्तभिः त्रियवयुक्तैस्त्रिभिरङ्गुलैश्च स्यात्। जानुयुग्मके ककुप्परिमितैः दशाङ्गुलैर्विततिरपि स्यात्। तथा विष्णुसंहितायाम्–

“ऊरू मुखवदक्ष्यूनं जानू जङ्घा मुखार्धतः।

इति।।१०३।।

मूलादिवेदशरसाङ्घ्रिरसाङ्गसङ्ख्यै-
र्व्यासोऽङ्गुलैः पदतलेऽर्कमितैश्च दैर्घ्यम्।
अङ्गुष्ठसीम्नि कलयोन्नतिरर्धतोऽन्य-
पार्श्वेऽङ्गुलैः प्रपददैर्घ्यमृतुप्रमाणैः।।१०४।।

विमर्शिनी

पदतले मूलादिप्रदेशेषु वेदशरसाङ्घ्रिरसाङ्गसङ्ख्यैः चतुर्भिः पञ्चभिः सपादैः षड्भिः षड्भिश्चाङ्गुलैः क्रमशो व्यासः स्यात्। अर्कमितैर्द्वादशाङ्गुलैर्दैर्घ्यं च। अङ्गुष्ठ-

Shripuram Publications
www.shripuram.org

सीम्नि अङ्गुष्ठवति पार्श्वे कलया द्व्यङ्गुलेनोन्नतिश्च। अन्यपार्श्वे कनिष्ठावति पार्श्वे अर्धतः एकाङ्गुलेनोन्नतिः। प्रपददैर्घ्यम् ऋतुप्रमाणैः षडङ्गुलैश्च। तथा सात्त्वते–

"पार्ष्णी द्विगोलकतते तन्मध्ये साङ्गुले कले"

इति। तथाच संहितायां–

"मुखायततलौ पादौ पुरस्ताज्जङ्घया समौ।
कूर्मोन्नतौ क्रमोनोच्चौ तत्राङ्गुष्ठौ तदर्धकौ।।"

इति।।१०४।।

अङ्गुष्ठतत्सहभुवोर्जगदङ्गुलाढ्यं
दैर्घ्यं नखान्नखमितिर्ह[1]सितास्ततोऽन्याः।
पर्वत्रयाहितरुचोऽङ्गुलयो द्विपर्वा-
ङ्गुष्ठोऽर्धपर्वशशिखण्डनिभा नखाः स्युः।।१०५।।

विमर्शिनी

अङ्गुष्ठतत्सहभुवोः पादाङ्गुष्ठतर्जन्योः। जगदङ्गुलाढ्यं त्र्यङ्गुलविशिष्टं दैर्घ्यम्। ततोऽन्याः तिस्रोऽङ्गुलयः। नखान्नखमितिह्रसिताः क्रमान्नखान्नखमानेन ह्रस्वाः। पर्वत्रयाहित-रुचः पर्वत्रयेण शोभावत्यश्च। अङ्गुष्ठो द्विपर्वा च। तासां नखाः अर्धपर्वशशिखण्डनिभाः अर्धार्धपर्वणा शशिखण्डसदृशाश्च स्युः। तथा वैष्णवे–

"तत्राङ्गुष्ठौ तदर्धकौ।
प्रदेशिन्यौ च तत्तुल्ये हीनाः शेषा नखान्नखम्।।
अनङ्गुष्ठास्त्रिपर्वाणो नखा रक्तार्धचन्द्रवत्।"

इति।।१०५।।

अङ्गुष्ठके रसमितैः परिधिः परस्यां
स्यादङ्गुलैस्त्रिभिरतो[2]ऽष्टमभागहीनैः।
कार्यः क्रमात् तदितरास्वखिलेषु तत्त-
द्व्यासेन लोकगु[3]णितेन करोतु नाहम्।।१०६।।

---

१. 'प्र', २. 'ता', ३. 'ग' मूलपाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

अङ्गुष्ठके रसमितैः षडङ्गुलैः परिधिर्नाहः। परस्यां तर्जन्यां त्रिभिरङ्गुलैश्च। तदितरासु तिसृषु अतोऽष्टमभागहीनैः परिधिः कार्यः। अथाखिलेष्ववयवेषु लोकगुणितेन तत्तद्व्यासेन नाहं करोतु। तथाच संहितायां–

"नाहोऽङ्गुष्ठस्य मध्यावत् तर्जन्यङ्गुष्ठदैर्घ्यवत्।
अष्टांशोनाः क्रमादन्याः कारयेदनुरूपतः।।"

इति।।१०६।।

तालैस्त्रिभिः शिरसि साष्टियवेषुसङ्ख्यैः
कक्षान्तरे रहितविश्वयवैश्चतुर्भिः।
कुक्षौ त्रिभिर्भवति नाभितलेऽर्धयुक्तै-
र्नाहस्तथा[1] कटितटेऽर्धयुताब्धिसङ्ख्यैः।।१०७।।

विमर्शिनी

त्रिभिस्तालैः शिरसि नाहः स्यात्। कक्षान्तरे कक्षप्रदेशे साष्टियवेषु संख्यैः द्व्यङ्गुलसहितपञ्चतालैः कुक्षौ रहितविश्वयवैः त्रयोदशयवरहितैश्चतुस्तालैः नाभितले अर्धयुक्तैरर्धतालयुक्तैस्त्रिभिस्तालैः, तथा कटितटे अर्धयुताब्धिसंख्यैः अर्धतालयुक्तचतुस्तालैर्नाहो भवति। तथा सात्वते–

"शिरसः परिणाहं तु विद्धि षड्त्रिंशदङ्गुलम्।
कक्षान्तर्वेष्टनं विद्धि पञ्चतालं सलोचनम्।।
विनाङ्गुलद्वयेनैव द्वे ताले द्विगुणीकृते।
यवत्रयसमायुक्तं विद्धि तत्कुक्षिवेष्टनम्।।
परिधिर्नाभिमध्ये तु त्रिता(लः?लं) सत्रिलोचनम्।
स षड्गोलकतन्मानं परिध्यर्थं कटेः स्मृतम्।।"

इति।।१०७।।

जङ्घोरुबाहुयुगमध्यकराङ्गुलीषु
कार्या करीन्द्रकरवत् परिवृत्ततात्र।

---

१. 'ता' मूलपाठः

Shripuram Publications
www.shripuram.org

कूर्माभता प्रपदयोर्जलजाभता च
कण्ठे कपोलतळयोर्मुकुराभता च।।१०८।।

विमर्शिनी

जङ्घोरुबाहुयुगमध्यकराङ्गुलीषु जङ्घयोरूर्वोः बाहुद्वये मध्यप्रदेशे कराङ्गुलीषु च करीन्द्रकरवद् गजनासावत् परिवृत्तता वृत्ताकारता कार्या। प्रपदयोः कूर्माभता कूर्मसदृशता, कण्ठे जलजाभता शङ्खाकारता, कपोलयोर्मुकुराभता च कार्या।।१०८।।

अत्रैकाङ्गुलसम्मितेन परिवेष्ट्योष्णीषपट्टेन के
कोटीरं मुकुटोज्ज्वलं विरचयेदष्टाङ्गुलैः सर्वतः।
द्व्यष्टाभिर्धृतिसम्मितैर्दिनकरद्वन्द्वप्रमैर्वाङ्गुलै-
रुष्णीषोपरिभासमानमुकुटोपेतं किरीटं हरौ।।१०९।।

विमर्शिनी

मुकुटलक्षणमाह - अत्रेति। अत्र के मूर्धनि एकाङ्गुलसम्मितेन उष्णीषपट्टेन परिवेष्ट्य सर्वतः सर्वदेवेषु अष्टाङ्गुलैः सम्मितं मुकुटोज्ज्वलं मुकुटेनोज्ज्वलं कोटीरं जटाबन्धं विरचयेत्। हरौ तु द्व्यष्टाभिः षोडशभिर्वा धृतिसम्मितैः अष्टादशभिर्वा दिनकरद्वन्द्वप्रमैः चतुर्विंशत्यङ्गुलैर्वा उष्णीषोपरिभासमानमुकुटोपेतम् उष्णीषपट्टस्योपरिभागे शोभमानेन मुकुटेनोपेतं किरीटं विरचयेत्। तथा ब्रह्मरात्रे - "उष्णीषमङ्गुलं प्रोक्तम्" इति। निबन्धने[1]–

"जटाबन्धोऽधिकः कार्यः सोऽप्यष्टाङ्गुलसम्मितः।"

इति। पद्धतौ–

"षोडशाङ्गुलमायामं सौवर्णमणिदीपितम्।"

मुरारौ–

मुखद्विगुणमध्यर्धं किरीटं कैश्चिदिष्यते।
षोडशाङ्गुलमित्याहुस्तस्मादधममेव तत्।।"

इति।।१०९।।

---

१. 'किरीटस्तु ज' क. पाठः

Shripuram Publications
www.shripuram.org

कुर्यात् किरीटं शिखरैः समेतं
त्रिपञ्चसप्तप्रमितैर्यथार्हम्।
अण्डोपमं वा कमलोपमं वा
छत्रोपमं वा कमठोपमं वा।।११०।।

विमर्शिनी

किरीटं तु त्रिपञ्चसप्तप्रमितैः त्रिभिः पञ्चभिः सप्तभिर्वा शिखरैः समेतं कुर्यात्। तद् अण्डोपमं वृत्ताकारं वा कमलोपमं वा छत्रोपमं वा कमठोपमं वा यथार्हं[1] यथायोग्यं कुर्यात्। तथा सात्त्वते-

"त्रिपञ्चसप्तशिखरो मौलिरष्टकलोन्नतः।
निर्जटानां ललाटोर्ध्वं मकुटं वा सुशोभनम्।।"

ब्रह्मरात्रे च–

"चतुर्विधं किरीटान्तमस्मिंस्तन्त्रे मया श्रुतम्।
छत्राण्डपद्मकूर्माणां कुर्यादाकारमन्ततः।।"

इति।।११०।।

ग्रीवाद्यङ्घ्र्यवसानसूत्रितदशस्थानानि संवर्धिता-
न्येकैकाङ्गुलतो यवैरथ वसूर्म्याम्नायसङ्ख्यैः क्रमात्।
उष्णीषाद्यलकाक्षिनोग्रचरमं तद्द्वन्द्वहीना हनु-
र्दुर्गायामिति पङ्क्तितालपरिभिन्नायां समुक्तोन्मितिः।।

विमर्शिनी

अथ दुर्गामुद्दिश्य दशतालविधानाय नवतालबिम्बाद् विशेषकल्पनास्थितमाह - ग्रीवाद्यङ्घ्र्यवसानेति। ग्रीवाद्यङ्घ्र्यवसानसूत्रितदशस्थानानि ग्रीवामारभ्य पादपर्यन्तं नवतालबिम्बोक्तक्रमेण सूत्रैः कल्पितानि दशस्थानानि। तत्र ग्रीवा प्रथमं स्थानं, ततो हृदन्तं द्वितीयं, ततो नाभ्यन्तं तृतीयं, ततो लिङ्गान्तं चतुर्थं, तत ऊरुमध्यसूत्रान्तं पञ्चमं, तत ऊर्वोरधस्सूत्रपर्यन्तं षष्ठं, ततो जान्वधस्सूत्रान्तं सप्तमं, ततो जङ्घामध्यसूत्रा-

१. 'थायो' ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

न्तमष्टमं, ततो जङ्घाया अधोगतसूत्रान्तं नवमं, ततः पादाग्रपर्यन्तं दशममित्युक्तानि दश स्थानानि एकैकाङ्गुलतः संवर्धितानि पूर्वकल्पितादेकैकाङ्गुलाधिकानि स्युरिति दशमस्य तालस्य दशसङ्ख्या अङ्गुलयो योजिताः। पुनर्द्वे एव शिष्टे। अथ वसूर्म्याम्नाय-सङ्ख्यैः अष्टाभिः षड्भिश्चतुर्भिश्च यवैः क्रमेण उष्णीषाद्यलकाक्षिनोग्रचरमम् उष्णीषाद्यलकान्तं, तदादिनेत्रान्तं, तदादिनासाग्रान्तं, त्रीणि स्थानानि योजनीयानि स्युरित्यष्टादशयवयोगाद् द्व्यङ्गुलतो द्वियवाधिक्ये प्राप्ते तद्द्वन्द्वहीना द्वियवरहिता हनुः कपोलस्थली स्यादिति पङ्क्तितालपरिभिन्नायां दशतालविभक्तायां दुर्गायामुन्मितिः समुक्ता। तथाहुः-

"मध्येन दशतालेन गौरीलक्ष्मीगिरां मतम्।
दुर्गायाश्चापि मातॄणां मध्येनैव प्रकल्पयेत्॥
मध्येन दशतालेन स्त्रीमानं कथ्यतेऽधुना।
भागः कचान्त उष्णी(षस्त?षात् त)स्मात् भागः सषड्यवः॥
नेत्रान्तः स्यात् ततो नासापुटान्तः सचतुर्यवः।
भागः स्यादथ हन्वन्तो रामांशैस्तु सषड्यवैः॥
हनोर्भागस्तु कर्णान्तस्ततो हृन्नाभियोनयः।
पृथक् त्रयोदशांशैः स्युरूरू षड्विंशदङ्गुलैः॥
भागेन जानुस्तस्माच्च जङ्घे षड्विंशदङ्गुलैः।
भागेन पादौ च तलौ भागायामौ प्रकल्पयेत्॥"

इति। तथाच काश्यपः-

"सविंशच्छतभागेन स्त्रीमाने तु विभाजिते।
एकांशमङ्गुलं ख्यातं तदष्टांशं यवं भवेत्॥
उष्णीषोदयमेकांशं केशान्तं तु गुणाङ्गुलम्।
केशान्तादक्षिसूत्रान्तं सत्रिभागं गुणांशकम्॥
अक्षिसूत्रात् पुटान्तं तु सार्धवेदांशमिष्यते।
नासापुटात्तु हन्वन्तं सत्रिपादगुणांशकम्॥
तस्याधः कण्ठमानं तु चतुर्भागमुदाहृतम्।
(हिकादाहृतदा?एतस्माद्धृद)यान्तं च हृदयान्नाभिसीमकम्॥

Shripuram Publications
www.shripuram.org

नाभ्या आयोनिपर्यन्तं समं त्रयोदशाङ्गुलम्।
ऊरुदीर्घं तु षड्विंशदङ्गुलं जानु युगांशकम्।।
ऊरुदीर्घसमं जङ्घादीर्घं पादतलं युगम्।।”

इति।।१११।।

विस्तारः शिवशैलकैर्मुखगलेऽत्यष्ट्या द्विकक्षान्तरे
वक्षोजे नवभिः पृथक् च तदधो विश्वैः शिवैर्मध्यतः।
कृत्या श्रोणितले कटौ रवियुगेनोर्वोः सजानुद्वये
जङ्घायुङ्नलकेऽर्कशैलरसवेदैश्चाङ्गुलैः सम्मितैः।।११२।।

विमर्शिनी

दशतालबिम्बस्य विस्तारमाह - विस्तार इति। मुखगले मुखे गले च क्रमात् शिवशैलकैः एकादशभिः सप्तभिश्चाङ्गुलैः विस्तारः स्यात्। द्विकक्षान्तरे कक्षयोर्मध्यप्रदेशे अत्यष्ट्या सप्तदशाङ्गुलैर्विस्तारः। वक्षोजे स्तने नवभिरङ्गुलैः, तदधः वक्षोजाधोभागे विश्वैः त्रयोदशाङ्गुलैः, मध्यतो मध्यप्रदेशे शिवैरेकादशाङ्गुलैः, श्रोणितले जघनप्रदेशे कृत्या विंशत्यङ्गुलैः कटौ रवियुगेन चतुर्विंशत्यङ्गुलैः, ऊर्वोः सजानुद्वये जङ्घायुङ्नलके ऊर्वादिचतुर्षु[१] स्थानेषु क्रमाद् अर्कशैलरसवेदैः द्वादशभिः सप्तभिः षड्भिश्चतुर्भिरङ्गुलैर्विस्तारः। तथाच काश्यपः–

“ग्रीवा सप्ताङ्गुलव्यासा रुद्रांशैर्मुखविस्तृतिः।
कक्षयोरन्तरव्यासौ भवेत् सप्तदशाङ्गुलैः।।
तदधोऽतिजगत्यंशैर्नन्दांशैः स्यात् प्रतिस्तनम्।
षड्यवव्यासनिम्ना स्यान्नाभिर्मध्यं ततस्तनु।।
रुद्रमात्रैस्तु विस्तारं रोमराज्या च शोभितम्।
कटिर्द्वितालविस्तारा श्रोणी कृत्यङ्गुलैस्ततः।।
जानुव्यासः सप्तमात्रैरूर्वोर्व्यासस्तु तालतः।
नलकाततिर्वेदांशा जङ्घामध्यं रसाङ्गुलम्।।”

इति।।११२।।

---

१. ‘तुः स्था’ ख. पाठः

Shripuram Publications
www.shripuram.org

उत्कृत्याधिभुजं प्रकोर्परमनु द्वाभ्यां प्रकोष्ठे तले
धृत्या सप्तभिराततिर्युगशराङ्गेष्वर्णवैरङ्गुलैः।
अङ्गुष्ठादिषु तत्ततिर्नवनगाह्यद्ग्रङ्गसङ्ख्यैर्यवै-
स्त्रीष्वश्वैर्मणिबन्धकोर्परभुजामूलेऽङ्गुलैर्विस्तृतिः।।

विमर्शिनी

उत्कृत्या षड्विंशत्यङ्गुलैः अधिभुजं भुजयोः आततिः दैर्घ्यं स्यात्। प्रकोर्परमनु प्रकोर्परयोः द्वाभ्यां द्व्यङ्गुलाभ्यां, प्रकोष्ठे धृत्या अष्टादशाङ्गुलैः तले पाणितलयोः सप्तभिरङ्गुलैराततिः स्यात्। अङ्गुष्ठादिष्वङ्गुलीषु क्रमाद् युगशराङ्गेष्वर्णवैः चतुर्भिः पञ्चभिः षड्भिः पञ्चभिः चतुर्भिश्चाङ्गुलैराततिः स्यात्। तत्ततिः तासामङ्गुलीनां ततिः नवनगाह्यद्ग्रङ्गसंख्यैः क्रमेण नवभिः सप्तभिरष्टभिः सप्तभिः षड्भिश्च यवैः स्यात्। मणिबन्धकोर्परभुजामूले क्रमात् त्रीष्वश्वैः त्रिभिः पञ्चभिः सप्तभिश्चाङ्गुलैर्विस्तृतिः स्यात्। तथाचाहुः–

“उत्कृत्यंशैर्भुजायामः कोर्परः स्यात् कलासमः।
धृत्यंशैस्तु प्रकोष्ठः स्यात् तलं सप्ताङ्गुलायतम्।।
वेदेष्वृतुशराम्नायैरायताङ्गुलयः क्रमात्।
नवर्षिवस्वृषिरसयवैरङ्गुलयस्तताः।।
रामेषुषट्सप्तमात्रैर्मणिबन्धश्च कोर्परः।
बाहुमध्यं च मूलं च विस्तीर्णं स्यात् क्रमेण तु।।”

इति।।११३।।

तर्जन्यग्रिमयोर्युगैर्युगयवन्यूनैः पराङ्घ्र्यङ्गुलि-
ष्वायामोऽङ्गुलकैर्नृपाष्टसदलाद्ग्रद्ग्रङ्गसंख्यैर्यवैः।
व्यासः सार्धयुगाङ्गुलैः स्तनसमुत्सेधस्त्रिभिश्चूचुके
व्यासोऽक्षे श्रुतिभिर्यवैर्ऋतुमितैर्नाभौ दृशाक्षोन्नतिः।।

विमर्शिनी

तर्जन्यग्रिमयोः पादतर्जन्यङ्गुष्ठयोः युगैः चतुर्भिरङ्गुलकैरायामः स्यात्।

www.shripuram.org
Shripuram Publications
www.shripuram.org

पराङ्घ्यङ्गुलिषु[1] पादस्य परासु मध्यमानामिकाकनिष्ठासु क्रमाद् युगयवन्यूनैः चतुश्चतुर्यवहीनैः चतुरङ्गुलादर्धार्धाङ्गुलहीनैरायामः स्यात्। ज्येष्ठादीनां क्रमाद् नृपाष्टसदलाद्ग्रद्ग्रङ्गसंख्यैः षोडशभिरष्टभिरर्धान्वितसप्तभिः सप्तभिः षड्भिश्च यवैर्व्यासः स्यात्। सार्धयुगाङ्गुलैः अर्धाङ्गुलसहितचतुरङ्गुलैः स्तनसमुत्सेधः स्तनयोरुन्नतिः स्यात्। चूचुके त्रिभिरङ्गुलैर्व्यासः। अक्षे स्तनाग्रभागे श्रुतिभिः चतुर्भिर्यवैर्व्यासः। नाभौ ऋतुमितैः षड्यवैर्व्यासः। दृशा द्वाभ्यां यवाभ्यामक्षोन्नतिः स्यात्। तथाचाहुः–

"तर्जन्यग्रिमयोर्दीर्घं चतुर्भागमुदाहृतम्।
सार्धत्रिभागं मध्या स्यात् त्रिभागं तदनामिका।।
सार्धद्विभागमानं तु कनिष्ठाङ्गुलदीर्घकम्।
द्विरष्टाष्टसार्धसप्तपातालैर्ऋतुभिर्यवैः।।
अङ्गुष्ठादिकनिष्ठान्तं चरणाङ्गुलविस्तृतम्।
रामांशैश्चूचुकव्यासः सार्धभागोन्नतौ स्तनौ।।
स्तना(क्षमात्रं?क्षं) श्रुतिमानं स्याद् द्वियवः स्यात् तदुन्नतिः।।"

इति।।११४।।

विघ्नेशं शरतालकैर्विरचयेत् त्र्यक्षं महेभाननं
गूढाभुग्नगलं स्थितं समुपविष्टं वातिपीनाङ्गकम्।
उष्णीषान्मुखमेककेन सदलाभ्यां तालकाभ्यां ततः
कट्यन्तं चरणौ कराश्च करणीयाः सार्धतस्तालतः।।११५।।

विमर्शिनी

अथ गणपतिमुद्दिश्य पञ्चतालस्थितिमाह - विघ्नेशमिति। विघ्नेशं शरतालकैः पञ्चतालैः विरचयेत्। कीदृशं, त्र्यक्षम् अक्ष्णां त्रयेण युक्तं महेभाननं मत्तवारणेन्द्रसमानमुखं, गूढाभुग्नगलं गूढेन तिरोहितेन आभुग्नेन ईषद्वक्रितेन गलेन युक्तम्, अतिपीनाङ्गकम् अतिस्थूलकायं, स्थितं तिष्ठन्तं, वा समुपविष्टं सम्यगासीनं वा। उष्णीषाद् उष्णीषपट्टादारभ्य मुखं मुखमानम् एककेन तालेन, तत आरभ्य कट्यन्तमानं सदलाभ्यां तालाभ्याम् अर्धसहितेन तालद्वयेन चरणौ कराश्च सार्धतस्तालतः सार्धैकतालेन करणीयाः स्युः। तथाचाहुः–

1. 'ली' ख. पाठः

Shripuram Publications
www.shripuram.org

"विघ्नेशः पञ्चतालः स्यात् स्वासीनो वा स्थितो भवेत्।
उष्णीषाधोमुखं तालं सार्धतालायताः कराः।।
सार्धद्वितालं कण्ठाधोमानमाकटिसूत्रकम्।।
सार्धतालायतौ पादौ पीवरः सर्वतो भवेत्।।"

इति।।११५।।

श्रीमद्रत्नकिरीटकुण्डलयुगग्रैवेयहाराङ्गद-
श्रेणीकङ्कणसोपवीतरशनावासोङ्घ्रिभूषादिकम्।
तत्तन्मूर्त्यनुरूपतोऽत्र रचयेत् स्वस्वायुधाद्युज्ज्वलं
श्लक्ष्णं दृष्टिमनोहरं विरचनादाक्ष्याद् यथालक्षणम्।।

विमर्शिनी

तन्मूर्तीनामालङ्कारं विशेषेण रचनीयमित्याह - श्रीमदिति।। श्रीमद्रत्नकिरीटकुण्डलयुगग्रैवेयहाराङ्गदश्रेणीकङ्कणसोपवीतरशनावासोङ्घ्रिभूषदिकं श्रीमन्ति रत्नमयं किरीटं शिरोभूषणं तथा कुण्डलयुगं कर्णालङ्कारद्वयं तथा ग्रैवेयं ग्रीवाभूषणं तथा हारादिकमुरःस्थलभूषणं तथा अङ्गदश्रेणी भुजाभूषणावलिः कङ्कणं प्रकोष्ठभूषणं सोपवीतं ग्रीवागतोपवीतादिकं तथा रशनावस्त्रादिकं कटिभूषणं तथा मञ्जीराद्यङ्घ्रिभूषादिकं च तत्तन्मूर्त्यनुरूपतः स्वस्वायुधाद्युज्ज्वलं स्वस्वायुधैरप्यतिशयेनोज्ज्वलं श्लक्ष्णम् अपरुषं दृष्टिमनोहरं नेत्रमनसोः प्रसादकरं यथालक्षणं लक्षणादनपवृत्तं च विरचनादाक्ष्याद् निर्माणकौशलेन विरचयेत्।।११६।।

पद्मं तालसमुच्छ्रयं द्विगुणविस्तारं च षोढा कृते
मूले पट्टभिलांशतो द्वितयतोऽस्याधस्तनाष्टच्छदम्।
अङ्घ्र्यूनप्रथमब्जमध्यमुपरिष्टादष्टपत्रं त्रिभि-
र्भागैः पट्टयुतं करोतु कमलेनामात्र पीठोच्छ्रयः।।११७।।

विमर्शिनी

पदाधस्तनपद्मलक्षणमाह - पद्ममिति। पद्मं तालसमुच्छ्रयं द्वादशाङ्गुलोच्चं द्विगुणविस्तारं च करोतु। षोढा कृते उत्सेधे षोढा विभक्ते सति मूले अधोभागे

Shripuram Publications
www.shripuram.org

इलांशतः एकांशेन पट्टं वलयं करोतु। द्वितयो द्व्यंशे अस्य पद्मस्याधस्तनाष्टच्छदम् अधोगताष्टपत्रम्, अब्जमध्यं पद्मस्य मध्यप्रदेशम् अङ्घ्र्यूनप्रथं स्वविस्तारात् पादोनविस्तारयुक्तम्, उपरिष्टात् त्रिभिर्भागैः पट्टयुतमष्टपत्रं करोतु। अत्र पीठोच्छ्रयः कमलेनामा उक्तपद्मेन सहैव। पद्मोत्सेधपीठोत्सेधे योजनीय इत्यर्थः। तथा च भास्करः-

"अथ पद्मस्य तूत्सेधं मुखमानसमुच्छ्रयम्।
यावत्पद्मस्य तूत्सेधं षड्भागं च विधाय च।।
त्रिभागमूर्ध्वपद्मं स्यादधःपद्[1]मं द्वियंशकम्।
शेषांशं पद्मपट्टं स्यात् पीठमानसमाश्रितम्।।
पद्मस्य विस्तरो ज्ञेयो द्वितालस्त्रितालो वा (?)
पद्मविस्तारमेवं स्यात् त्रिभागो मध्यविस्तरः।।
अष्टपत्रैस्तु संयुक्तं वृत्तमेव विधीयते।"

इति।।११७।।

विंशत्या प्रतिमाङ्गुलैः प्रविततं वृन्ते तया सैकया
नालं सद्विक[2]यापिवाथ विततेरष्टाचलाङ्गांशकैः।
अन्ते हीनवितानमारचयतु ब्रह्मोपलान्तायतं
तुर्याश्रं सकलेषु वैधसमिदं वृत्तं क्वचिच्चैश्वरम्।।११८।।

विमर्शिनी

नाललक्षणमाह - विंशत्येति। वृन्ते पद्ममूले विंशत्या वा सैकया विंशत्या वा सद्विकया विंशत्या वा प्रतिमाङ्गुलैः प्रतिमायास्तालवशात् कल्पितैरङ्गुलैः प्रविततं विस्तृतं नालमारचयतु। अथान्ते नालाग्रे विततेः मूलविस्तृतेः अष्टाचलाङ्गांशकैः अष्टांशेन वा सप्तांशेन वा षडंशेन वा हीनवितानं रहितविस्तारं ब्रह्मोपलान्तायतं नपुंसकशिलापर्यन्त-दैर्घ्ययुक्तं रचयतु। इदं नालं सकलेषु देवेषु वैधसं ब्रह्मदेवत्यं तुर्याश्रं, तथाच क्वचिद् वृत्तं चैश्वरं रुद्रदेवत्यं च। तथाच भास्करः–

"पद्मानालस्य विस्तारं प्रतिमाङ्गुलेन चोच्यते।
द्वाविंशतिश्च अङ्गुल्य एकविंशाङ्गुलं भवेत्।

१. '....द्मस्यांश' ख. पाठः, २. 'त' मूलपाठः

Shripuram Publications
www.shripuram.org

विंशाङ्गुलं तथैव स्यात् त्रिविधं नालविस्तरम् ।।
नालमूलस्य तारेण[१] अग्रविस्तारहीनता ।
अष्टभागैकहीनं स्यात् सप्तभागैकहीनकम् ।।
षड्भागस्यैकहीनं स्यात् त्रिविधं त्वग्रहीनकम् ।"

इति । तथाच मुरारिः–

"तस्य नालं तु वृत्तं स्याच्चतुरश्रं तु वा भवेत् ।
वृत्तं शिवात्मकं ब्राह्मं तथा स्याच्चतुरश्रकम् ।।
रत्नन्यासस्पृगेव स्यान्नान्यथा नालमिष्यते ।"

इति ।।११८।।

लिङ्गानि सायककरादिपदोनिताश्वि-
हस्तान्तिमानि चरणांशविमुक्ति[२]क्लृप्त्या ।
स्युर्वर्णिनां मुखभुजोरुपदोद्भवानां
पञ्चाग्निपावकजगत्परिसङ्ख्यकानि ।।११९ ।।

विमर्शिनी

बिम्बलक्षणमुक्त्वा लिङ्गलक्षणमाह - लिङ्गानीति । मुखभुजोरुपदोद्भवानां ब्रह्मणे मुखादिभ्यः सम्भूतानां ब्राह्मणक्षत्त्रियवैश्यशूद्राणां वर्णि[३]नां क्रमेण चरणांशविमुक्तिक्लृप्त्या पादापादांशहीनक्रमेण सायककरादिपदोनिताश्विहस्तान्तिमानि पञ्चकरादिपादोनद्विहस्तावसानानि पञ्चाग्निपावकजगत्परिसङ्ख्यकानि पञ्चत्रित्रित्रिसङ्ख्यकानि लिङ्गानि स्युः । तत्र पञ्चकरपादोनपञ्चकरसार्धचतुष्करसपादचतुष्करचतुष्करमितानि पञ्च लिङ्गानि ब्राह्मणानां, पादोनचतुष्करसार्धत्रिकरसपादत्रिकरमितानि त्रीणि क्षत्त्रियाणां, त्रिकरपादोनत्रिकरसार्धद्विकरमितानि त्रीणि वैश्यानां, सपादद्विकरद्विकरपादोनद्विकरमितानि त्रीणि लिङ्गानि शूद्राणामिति विभागः । तथाच पाशुपते–

"पञ्चहस्तादि विप्राणां ह्रासादेकैकपादतः ।
लिङ्गं पञ्चविधं तद्वदन्येषां च त्रयं त्रयम् ।।"

इति ।।११९।।

---

१. 'त्राग्र' क. पाठः, २. 'युक्तक्लृ' मूलपाठः, ३. 'र्णा' क. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

अङ्घ्र्यंशकक्रमकृतह्रसनेन भूयो
द्वे चैकमप्यनुविलोमकुलोत्थयोः स्युः।
तान्युत्तरोत्तरकुलप्रभवेषु चानु-
लोम्यात् प्रकल्पयतु वैककरादिकानि।।१२०।।

विमर्शिनी

भूयः पादोनद्विकरादारभ्य अङ्घ्र्यंशकक्रमकृतह्रसनेन पादांशहीनक्लृप्त्या अनुविलोम-कुलोत्थयोः अनुलोमजातस्य प्रतिलोमजातस्य च क्रमेण द्वे चैकमपि लिङ्गानि स्युः। तत्र सार्धैककरसपादैककरमिते द्वे लिङ्गे अनुलोमजातानाम्, एककरमेकमेव लिङ्गं प्रतिलोमजातानाम्। तान्येककरादिकानि लिङ्गानि उत्तरोत्तरकुलप्रभवेष्वानुलोम्याद् अनुलोमक्रमेण प्रकल्पयतु वा। तत्र ब्राह्मणानां सर्वाणि लिङ्गानि ग्राह्याणि। क्षत्त्रियाणां स्वानि, वैश्यानां विहितानि चेत्यादिं च कल्पयतु। तथा निबन्धने–

"द्विकरान्तं च पञ्चादि विप्रादीनां क्रमात् स्मृतम्।
एकहस्तं तु यल्लिङ्गं प्रतिलोम(च?ज) मुच्यते।।"

इति।।१२०।।

गर्भव्यासे विभक्ते स्मरशरनवनेत्रैस्त्रिपञ्चैकभागै-
र्लिङ्गानि त्रीणि तेषु त्रिषु गुणदलितेष्वेकभागैर्द्विभागैः।
द्वे द्वे तानि स्युरेवं नव चरणयुतं तत्समं पादहीनं
द्वाराद् द्व्येकांशकाभ्यामपि गुणदलिते तत्र पञ्चेतराणि।।

विमर्शिनी

गर्भगृहप्रमाणेनापि लिङ्गान्याह - गर्भव्यास इति। स्मरशरनवनेत्रैः पञ्चभिर्नवभिर्द्वा-भ्यां च गर्भव्यासे गर्भगृहव्यासे विभक्ते सति क्रमात् त्रिपञ्चैकभागैश्च त्रीणि लिङ्गानि। तेषु त्रिषु लिङ्गेषु गुणदलितेषु त्रित्रिभक्तेषु[1] एकभागैर्द्विभागैश्च इति तत्र तत्र द्वे द्वे। एवं तानि लिङ्गानि नव स्युः। पुनर्द्वारवशादपि लिङ्गान्याह चरणयुतमित्यादिश्लोकशेषेण। तत्समं द्वारसमं चरणयुतं द्वारात् पादांशाधिकं पादहीनं द्वारात् पादांशहीनं, गुणदलिते

१. 'त्रिर्भक्ते'

Shripuram Publications
www.shripuram.org

त्रिभक्ते तत्र द्वारे द्व्येकांशकाभ्यामपि द्व्यंशेनैकांशेन च इतीतराण्यपि पञ्च लिङ्गानि स्युः। तथा[१]च पाशुपते–

"भूतरन्ध्राष्टभेदेन गर्भगेहे विभाजिते।
वह्निभूतचतुर्भिस्तु कल्पितं त्रिविधं विदुः।"

क्रियासारे च–

"त्रितयं विभजेत् त्रिधा।
एकस्य द्वितयं चैकमेकस्यैवं नवोदितम्।।"

पुनरपि पाशुपते–

"पादाधिकं समस्तं च पादोनं गुणभाजिते।
द्वाभ्यामेकेन निर्दिष्टं द्वारमानेन पञ्चधा।।"

इति।।१२१।।

लिङ्गं सर्वसमं समोन्मितिविभक्तांशत्रयं तत् पुनः
स्वायत्या समनाहकं यदि समांशं चाथ वृद्ध्युत्तरम्।
भक्ते भानुयुजोच्छ्रयेऽद्रिवसुनन्दांशैः(स्तु) मूलादिषू-
पेतं दिग्दलिते त्रिलोकयुगसङ्ख्याभिस्तथेशाधिकम्।।

विमर्शिनी

इति लिङ्गायाममुक्त्वा तेषां विभागक्लृप्तिमाह - लिङ्गमिति। समोन्मितिविभक्तांशत्रयं समेनोन्मानेन दैर्घ्येण विभक्तमंशत्रयं चतुरश्राष्टाश्रवृत्तस्वरूपं यद्यल्लिङ्गं तत् सर्वसममिति प्रसिद्धम्। तल्लिङ्गं पुनः स्वायत्या स्वस्वभागदैर्घ्येण समनाहकं यदि भवति, तर्हि तत् समांशमिति प्रसिद्धम्। अथ भानुयुजा चतुर्विंशतिधा उच्छ्रये भक्ते सति मूलादिषु चतुरश्रादिषु अद्रिवसुनन्दांशैरुपेतं लिङ्गं वृद्ध्युत्तरम्। तथा दिग्दलिते दशधा विभक्ते मूलादिषु त्रिलोकयुगसंख्याभिः त्रित्रिचतुर्भागैरुपेतमीशाधिकमिति प्रसिद्धम्। तथा निबन्धने–

"अग्रे मूले च मध्ये च प्रमाणं सर्वतः समम्।
तद्धि सर्वसमं नाम बहुधान्यधनावहम्।।

---

१. 'था पा' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

लिङ्गं त्रिधा विभक्तं स्यात् परिणाहसमायतम्।
समांशमिति विज्ञेयं नैतत् सूक्ष्मतरं भवेत्।।
उत्सेधमाने लिङ्गस्य चतुर्विंशतिभाजिते।
सप्ताष्टनवभागैस्तु क्रमेणोर्ध्व[१]विवर्धितम्।।
वर्धनामनमिति ज्ञेयं सर्वसम्पत्समृद्धिदम्।
उत्सेधं दशधा भङ्क्त्वा मूलमध्यं त्रिभिस्त्रिभिः।।
चतुर्भागयुतं चोर्ध्वं कुर्यादेवं शिवाधिकम्।।"

इति।।१२२।।

आयामे दलिते दिवाकरयुजाभीष्टेऽष्टभिर्विस्तृतिः
कार्यांशैरथ पञ्चपञ्चयवयुक्तैः सप्तभिः पञ्चभिः।
खायामार्कयुगांशत[२]द्द्विरसनांशः स्याद् यवः केवलैः
पञ्चांशैरपि गर्भगेहनवमांशेनापि सा[३] स्मर्यते।।१२३।।

विमर्शिनी

आयामस्य क्लृप्तिमुक्त्वा विस्तारक्लृप्तिमाह - आयाम इति। अभीष्टे आयामे दिवाकरयुजा चतुर्विंशतिधा दलिते विभक्ते अष्टभिः विस्तृतिः कार्या। अथात्रैव पञ्चपञ्चयवयुक्तैः इति। पञ्चयवयुक्तैः सप्तभिश्च पञ्चयवयुक्तैः पञ्चभिश्चांशैरिति द्विधा च विस्तृतिः कार्या। तन्मध्ये तत्रत्यं यवलक्षणमप्याह - स्वायामार्कयुगांशतद्द्विरसनांशः स्याद् यव इति। स्वायामस्य स्वदैर्घ्यस्यार्कयुगांशः चतुर्विंशत्यंशो यस्तस्य द्विरसनांशोऽष्टांशश्च यः स यवः स्यात्। पुनः पूर्वोक्तशेषत्वेन विस्तारान्तरमाह - केवलैरित्यादिना। आयामे चतुर्विंशतिधा कृते केवलैः पञ्चांशैरपि विस्तृतिः कार्या। अपिशब्देन ब्राह्मणादिवर्णिनामेव ते चत्वारो विस्तारा इति सूचितम्। गर्भगे[४]हनवमांशेनापि सा विस्तृतिः स्मर्यते क्रियत इत्यर्थः। तथाचाहुः–

"चतुर्विंशतिभक्तस्य विस्तारोऽष्टभिरंशकैः।
यवपञ्चकसंयुक्तैः सप्तभिः पञ्चभिस्तथा।।
केवलैः पञ्चभिश्चैवं विस्तारो ब्राह्मणादिषु।

---

१. 'र्ध्व' क. पाठः, २. 'कद्वि', ३. 'स स्मार्य' मूलपाठः, ४. 'हे' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

चतुर्विंशतिभागं तु पुनर्भङ्क्त्वाष्टधांशकैः ।।
यवस्थाने च संयुक्तैः कल्पयेद् द्विकरादिकम् ।”

इति ।

“गर्भात्रिभागं पीठं स्याल्लिङ्गं पीठत्रिभागकम् ।”

इति च ।।१२३ ।।

यथोचितातानवितानयुक्तां शिलां त्रिधोक्तक्रमतो विभज्य ।
मूलं युगाश्रं विदधीत मध्यमष्टाश्रकं वृत्तमयं परं च ।।१२४ ।।

विमर्शिनी

एवं कल्पितायाः शिलायाश्चतुरश्रादिरूपेण त्रैविध्यकल्पनमाह - यथोचितातानेति । यथोचितातानवितानयुक्तां यथोचिताभ्यामातानवितानाभ्यां युक्तां शिलामुक्तक्रमतस्त्रिधा विभज्य मूलं युगाश्रं[1] चतुरश्रं मध्यम् अष्टाश्रकं परं वृत्तमयं च विदधीत । तथा निबन्धने-

“आयामं तु द्विधा कृत्वा मूलमध्याग्रतः क्रमात् ।
तुर्याश्राष्टाश्रवृत्तानि भूपीठव्योमगानि तु ।।”

इति ।।१२४ ।।

तुर्याश्रे सुसमे प्रसार्य भुजसूत्रं कर्णसूत्राध्वना
तस्यान्ताहितलक्ष्मसु प्रतिदिशं द्वे द्वे भुजासूत्रके ।
कृत्वा तद्द्वयमध्यसंस्थितचतुष्कोणानि संशोध्य सा-
ध्वष्टाश्रं विदधीत वृत्तमपि तद्द्व्यष्टाश्रकादिक्रमात् ।।१२५ ।।

विमर्शिनी

तत्करणविधानमाह - तुर्याश्र इति । सुसमे तुर्याश्रे दीर्घचतुरश्रीकृते तत्र शिलाप्रकाण्डे भुजसूत्रं दिक्सूत्रं कर्णसूत्राध्वना कोणसूत्रमार्गेण प्रसार्य तस्य सूत्रस्य अन्ताहितलक्ष्मसु अवसाने सम्पादितलाञ्छनेषु प्रतिदिशं चतसृष्वपि दिक्षु द्वे द्वे भुजासूत्रे दुक्सूत्रे कृत्वा तद्द्वयमध्यसंस्थितचतुष्कोणानि तस्य भुजासूत्रद्वयस्य मध्यस्थितानि चत्वारि कोणानि संशोध्य त्यक्त्वा साधु यथावदष्टाश्रं विदधीत । तद्द्व्यष्टाश्रकादिक्रमात् । तत्पुनरष्टाश्रं

---

१. ‘श्रयुक्तं च’ ख. पाठः

Shripuram Publications
www.shripuram.org

तथैव प्रोक्तक्रमेण षोडशाश्रं तद्द्वात्रिंशदश्रमित्यादिक्रमेण वृत्तमपि विदधीत। तथाच मञ्जर्यां–

"निक्षिप्य कर्णेषु च बाहुसूत्रं तस्यावसाने विनिधाय सूत्रम्।
कोणेषु सर्वत्र च निम्नमेतदष्टाश्रकं वृत्तमथैवमेवम्।।"

इति।।१२५।।

विस्तारं शिवलिङ्गमूर्ध्नि वसुनन्दादित्यरुद्रांशकं
कृत्वात्र क्रमशो[1] विशोध्य परितो द्व्येकद्विलोकांशकान्।
कृत्वात्यष्टितिथिप्रकृत्यतिधृतिख्यातांशयुक्तं क्रमात्
पूजाभागमिहोक्तभागमुपरिष्टाच्छोधयेत् वर्णिषु।।१२६।।

विमर्शिनी

शिरोवर्तनविधिमाह - विस्तारमिति। अत्र शिवलिङ्गमूर्ध्नि वसुनन्दादित्यरुद्रांशकम् अष्टनवद्वादशैकादशभागं कृत्वा क्रमशो द्व्येकद्विलोकांशकान् द्व्येकद्वित्रिभागान् परितो विशोध्य पुनः पूजाभागं वृत्तभागमपि तथात्यष्टितिथिप्रकृत्यतिधृतिख्यातांशयुक्तं सप्तदश-पञ्चदशैकविंशत्येकोनविंशत्यंशयुक्तं कृत्वा क्रमादिहापि उक्तभागं द्व्येकद्वित्रिभागमुपरिष्टाद् वर्णिषु ब्राह्मणादिषु शोधयेत्। तथाच पाशुपते–

"वसुरन्ध्रऋतुद्वन्द्वरुद्रभेदे तु विस्तृते।
द्व्येकद्वित्रितयांशैस्तु वर्तयेल्लिङ्गमस्तकम्।।
सप्तपञ्चमहारुद्रनवयुक्तैर्दशांशकैः।
पूजाभागगते दैर्घ्ये[2] विभक्ते कल्पयेत् क्रमात्।।
अंशैः पूर्वोदितैरेव त्रपुषीफलमस्तकम्।
छत्राभं बालचन्द्राभं कुक्कुटाण्डनिभं क्रमात्।।"

इति।।१२६।।

तन्मस्तके नवविभागतया विभक्ते
भागं विशोध्य परितः शिवभागदैर्घ्यम्।

---

१. 'तो' मूलपाठः, २. 'र्घ्य' ख. पाठः

Shripuram Publications
www.shripuram.org

द्वात्रिंशदंशकतया परिकल्प्य भागा-
नेकैकशो द्विजमुखेषु विशोधयेद्वा ।।१२७।।

विमर्शिनी

पक्षान्तरमाश्रित्य शिरोवर्तनमाह - तन्मस्तक इति। तन्मस्तके तस्योर्ध्वभागविस्तारे नवविभागतया विभक्ते सति परितो भागमेकांशं विशोध्य शिवभागदैर्घ्यं पूजाभागायामं द्वात्रिंशदशतया परिकल्प्य द्विजमुखेषु ब्राह्मणादिषु भागानेकैकशः एकैकाधिक्येन शोधयेद्वा। तथाच क्रियासारे–

"विस्तारं नवधा भङ्क्त्वा बाह्यभागं विशोधयेत्।
आयामं शिवभागस्य समं भङ्क्त्वाष्टधान्तिमम्।।
वेदैर्विभज्य वर्णानामेकैकं तु विशोधयेत्।"

इति।।१२७।।

कुर्वीत त्रपुषीफलाग्रसदृशं छत्रोपमं मस्तकं
बालेन्द्वाकृति कुक्कुटाण्डसदृशं विप्रादिवर्णक्रमात्।
भेदाः सर्वसमांशकप्रभृतयो नाहप्रभेदान्विता-
स्तेऽप्येतत्क्रमतः स्युरेतदनुलोमाङ्गीकृतिश्चेष्यते।।१२८।।

विमर्शिनी

तत्र वर्णवशाद् भेदमाह - कुर्वीतेति। विप्रादिवर्णक्रमात् त्रपुषी फलाग्रसदृशं, त्रपुषीफलं तस्याग्राभं छत्रोपमं छत्राकारं बालेन्द्वाकृति बालेन्दुसदृशं कुक्कुटाण्डसदृशं च मस्तकं कुर्वीत। नाहप्रभेदान्विता नाहप्रभेदेन युक्ताः सर्वसमांशकप्रभृतयो भेदाश्च एतत्क्र(मात्?मतः) विप्रादिक्रमात् स्युः। एतदनुलोमाङ्गीकृतिश्च विप्रादीनामनुलोमाङ्गी-कारश्चेष्यते। तथाच मञ्जर्या-

"लिङ्गस्य त्रपुषीफलाग्रसदृशं विप्रस्य कुर्याच्छिर-
श्छत्राभं धरणीपतेः शशिकलाकारं विशः कल्पयेत्।
शूद्राणामपि कुक्कुटाण्डसदृशं सर्वं समस्तस्य वा
वर्णस्य प्रविधेयमेषु बहुधा भेदाः पृथक् संस्थिताः।।"

www.shripuram.org
Shripuram Publications
www.shripuram.org

इत्यादि ।।१२८।।

भङ्क्त्वा त्रेधा शिवांशायतिमुपरितनं भागमुत्क्षिप्य शिष्टं
कृत्वाष्टांशं समास्फाल्य च विषुवसिरासूत्रमत्राष्टमांशे।
लिङ्गाभं लक्ष्म साधारणमथ यवरूपं महेभेक्षणाभं
व्रीह्याकारं च बद्धाञ्जलिनिभमपि विप्रादिक्लृप्त्या लिखेद्वा।।१२९।।

विमर्शिनी

लक्ष(णाः णो)द्धारमाह - भङ्क्त्वेति। शिवांशायतिं पूजाभागदैर्घ्यं त्रेधा भङ्क्त्वा उपरितनम् ऊर्ध्वगतं भागमुत्क्षिप्य ऊर्ध्वं त्यक्त्वा शिष्टमष्टांशं कृत्वा विषुवसिरासूत्रं मध्यनाडीसूत्रं चास्फाल्य अत्राष्टामांशे लिङ्गाभं शिवलिङ्गाभं लक्ष्म वर्णिनां साधारणं लिखेत्। अथ विप्रादिक्लृप्त्या यवरूपं, यवाकारं महेभेक्षणाभं गजनयननिभं व्रीह्याकारं बद्धाञ्जलिनिभमपि लिखेद्वा। तथाचाहुः–

"पूजाभागं त्रिधा भङ्क्त्वा मुक्त्वा भागमथान्तिमम्।
कण्ठादिमौलिपर्यन्तं मुखं तस्मिन् व्यवस्थितम्।।
शेषाभ्यां लक्षणोद्धारं लिङ्गाकारं समं भवेत्।
तद्ब्रह्मसूत्रमुल्लिख्य विप्राणां तु यवाकृति।।
नृपतेरिभनेत्राभं व्रीह्याकारं स्मृतं विशः।
शूद्रस्याञ्जलिमुद्राभं सर्वेषां सर्वमेव वा।।"

इति।।१२९।।

रेखां लक्षणमूलतो मणिमयीं मूलांशयुग्मान्तिमं
रेखे लक्षणपार्श्वजे च परिलिख्येष्वंशमध्यावधि।
ऊर्ध्वाग्रैर्ऋतुसूत्रकैस्त्रिदशकोष्ठानि प्रकल्प्याथ ते
तत्कर्णक्रमतः परागवनिपङ्क्त्यन्ते मिथो योजयेत्।।१३०।।

विमर्शिनी

मणिरेखापार्श्वरेखयोर्लक्ष[1]णमाह - रेखामिति। लक्षणमूलतः लक्षणोद्धारादधोभागे मणिमयीं मणिसंज्ञां मध्यस्थां रेखां मूलांशयुग्मन्तिमं मूलांशयुग्मपर्यन्तं परिलिख्य लक्षणपार्श्वजे

१. 'क्ष्माह' ख. पाठः

Shripuram Publications
www.shripuram.org

लक्षणस्य पार्श्वगते च रेखे इष्वंशमध्यावधि पञ्चमांशमध्यपर्यन्तं परिलिख्य ऊर्ध्वाग्रैर्ऋतु-सूत्रकैः षट्सूत्रैः त्रिदशकोष्ठानि त्रिंशत्पदानि प्रकल्प्याथ (ते) तत्कर्णक्रमतः तत्कोणक्रमेण पराक् पृष्ठभागे अवनिपङ्क्त्यन्ते ए(व?क)पङ्क्त्यवसाने मिथोऽन्योन्यं योजयेत्। तथाच मञ्जर्याम्–

"भङ्क्त्वा तं च तथाष्टधा सममधस्त्यक्त्वा च भागद्वयं
रेखां तां मणिसंज्ञिकीं परिलिखेत् पार्श्वद्वये भ्रामयेत्।
रेखे पञ्चमभागमध्यनिहिते पृष्ठे तथा संगति-
श्चान्त्यांशोपरि मध्यमाश्च ललिता रेखा न निम्नोन्नताः।।"

इति।।१३०।।

विस्तारोऽधमलक्षणे द्वियवतस्तत्पादवृद्ध्योर्ध्वतो
रेखा तादलतो मिता मणिमयी तत्सामिक्लृप्ते परे।
रेखा दक्षिणवाममध्यरचिता ब्रह्माजितानङ्गजि-
दैवत्याश्चतुरश्रकादिशिवलिङ्गांशाश्च तद्दैवताः।।१३१।।

विमर्शिनी

तत्र अधमलक्षणे अधमलिङ्गस्य लक्षणे द्वियवतो विस्तारः स्यात्। ऊर्ध्वतो मध्यमोत्तमयोस्तत्पादवृद्ध्या विस्तारः। मणिमयी रेखा तद्दलतः तदर्धेन मिता। परे अन्ये पार्श्वरेखे तत्सामिक्लृप्ते तदर्धमिते च स्याताम्। दक्षिणवाममध्यरचिता रेखाः क्रमाद् ब्रह्माजितानङ्गजिद्दैवत्याः ब्रह्मविष्णुरुद्रदेवताः। चतुरश्रादिशिवलिङ्गांशाश्च चतुरश्राष्टाश्रवृत्तांशाश्च तद्दैवताः स्युः। तथाहुः–

"यवद्वयमथारभ्य वर्धयेल्लिङ्गमानतः।
लक्षणस्य तु विस्तारं पादेन द्विगुणान्ततः।।
विस्तारं मणिरेखायाः खारं चापि यवादितः।
ब्रह्मसूत्रस्य यत् खातं तदर्धं पक्षसूत्रयोः।।"

इति। तथाच–

Shripuram Publications
www.shripuram.org

"दक्षिणायां चतुर्मुखः।
वामाख्यायां महाविष्णुर्मध्यगा[1]यां महेश्वरः।।"

इति। मञ्जर्यां च–

"विष्णुस्थाणुपितामहाश्च विहिता भागत्रये देवताः"

इति।।१३१।।

बिम्बे बिम्बोच्छ्रयसमसमायामविस्तारयुक्तं
स्वव्यासार्धोच्छ्रयपरिगतं च प्रकुर्वीत पीठम्।।
लिङ्गव्यासत्रिगुणितवितत्यातताभ्यां समेतं
लिङ्गे स्वाष्टाश्रकसमसमुच्छ्रायि तुर्यश्ररूपम्।।१३२।।

विमर्शिनी

एवं बिम्बस्य लिङ्गस्य च लक्षणमुक्त्वा तयोः पीठलक्षणमाह - बिम्ब इति। बि(म्ब?म्बे) स्थाप्ये बिम्बोच्छ्रयसमसमायामविस्तारयुक्तं बिम्बोच्छ्रयसमेनायामेन विस्तारेण च युक्तं, स्वव्यासार्धोच्छ्रयपरिगतं स्वस्य व्यासस्यार्धमात्रेणोच्छ्रायेण युक्तं पीठं प्रकुर्वीत। लिङ्गे स्थाप्ये लिङ्गव्यासत्रिगुणितवितत्याततिभ्यां लिङ्गविस्तारत्रिगुणिताभ्यां विस्तारदीर्घाभ्यां समेतं, स्वाष्टाश्रकसमसमुच्छ्रायि लिङ्गस्याष्टाश्रेण समानोच्छ्रयं तुर्यश्ररूपं चतुरश्राकारं पीठं प्रकुर्वीत। तथाच संहितायां–

"बिम्बोच्चार्धं तु पीठोच्चमायामो बिम्बमानतः"।।

इति। "लोहजस्यैकयोनिजम्। शैलमन्यत्र विज्ञेयम्" इति च। तथाच पाशुपते

"लिङ्गत्रिगुणविस्तीर्णां विष्णुभागसमोच्छ्रयाम्।
लिङ्गायामप्रविस्तीर्णां कल्पयेद् वाथ पीठिकाम्।।

इति।।१३२।।

द्व्यष्टांशे शिवपीठके क्षितिशराब्धीन्द्वंशकैः पादुकं
प्रादध्याज्जगतीं तथा कुमुदकं तत्पट्टिकां च क्रमात्।
अंशाभ्यां गलमंशकेन गलपट्टिं जागतेऽब्ध्यशिनि
ग्रीवान्तेऽर्धयुतद्वयेन वलभिं शिष्टेन पट्टिं सदा।।१३३।।

---

१. 'मा' ख. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

तत्र शिवलिङ्गपीठस्य क्लृप्तिमाह - द्व्यष्टांश इति। शिवपीठके द्व्यंष्टांशे षोडशांशीकृते सति क्षितिशराब्धीन्द्वंशकैः एकपञ्चचतुरेकांशकैः[1] क्रमात् पादुकं जगतीं तथा कुमुदकं तत्पट्टिकां च प्रादध्यात्। अंशाभ्यामंशद्वयेन गलं च एकेनांशेन गलपट्टिं च। जागते अब्ध्यंशिनि चतुर्भिरंशैरेव जगतीमादध्या(द्यभि?त्)। ग्रीवान्ते अर्धयुतद्वयेन वलभिं सदापि पक्षद्वयेऽपि शिष्टेन पट्टिं च। तथाचाहुः–

"उत्सेधं विभजेत् तस्याः समं षोडशधा क्रमात्।
एकेन पादुकं कुर्यात् पञ्चभिर्जगतीमपि।।
कुमुदं कुमुदपट्टिं च वैदेरेकांशकेन तु।
द्वाभ्यामेकेन कर्तव्यं गलं च गलपट्टिकाम्।।
अंशद्वयेन सुदृढं कल्पयेन्मुखपट्टिकाम्।"

तथाच मञ्जर्याम्–

"उत्सेधं वसुयुग्मकेन विभजेत् पीठस्य चैकांशतः
कुर्यात् पादुकमंशकैश्च जगतीं वेदैश्चतुर्भिः क्रमात्।
एकांशेन विलोचनेन कुमुदं चालिङ्गपट्टिं गलं
सार्धांशद्वितयेन रम्यवलभिं शिष्टेन पट्टिं खनेत्।।"

इति।।१३३।।

पीठे मुक्त्वा प्रतिष्ठावटमुदधिविभागं विधायावशिष्टं
द्वाभ्यामाधाय पाथोवलयमुदकधात्रीं विधायांशकेन।
शिष्टेनाधाय तद्वेष्टनमथ तदुदक् त्र्यंशविस्तारदैर्घ्यं
कुर्यादष्टाश्रमानां ककृतजलकुल्यं कृशाग्रं प्रनालम्।।

विमर्शिनी

पीठस्योपरिगतविभागमाह - पीठ इति। पीठे प्रतिष्ठावटं मुक्त्वा अवशिष्टमुदधिविभागं चतुर्धा च विधाय द्वाभ्यामन्तर्गताभ्यामंशाभ्यां पाथोवलयं जलमार्गाकारं वलयमाधाय एकेनांशेनोदकधात्रीं शिष्टेन तद्वेष्टनं चाधायाथ तदुदग्भागे त्र्यंशविस्तारदैर्घ्यं पीठस्य

---

१. 'येनापि' ख. पाठः

Shripuram Publications
www.shripuram.org

त्रिभागेन विस्तारदैर्घ्ययुक्तमाशांशकृतजलकुल्यं दशांशेन कृतजलकुल्यमष्टाश्रं क्रमात् कृशाग्रं प्रनालं कुर्यात्। तथाचाहुः–

"लिङ्गावटं त्रियंशेन शिष्टं कृत्वाष्टधा क्रमात्।
वलयं वारिमार्गस्य वेदैः खातं तदर्थतः।।
खातस्य पार्श्वयोः कुर्याद् द्वाभ्यां द्वाभ्यां तु मेखलाम्।
प्रनालमुत्तरे कुर्याद् विस्तारायामतः[१] समम्।।
त्रिभागेन तु पीठस्य कृत्वाष्टाश्रं समन्ततः।
तद्दशांशेन खातं स्यात् किञ्चिदग्रे तनूकृतम्।।
तरङ्गमूलपार्श्वे तु जगत्यां चोर्ध्वतो[२]ऽर्पयेत्।
षोडशांशेन गमनं पीठमध्यादथैशगम्।।"

इति।।१३४।।

बिम्बे नपुंसकशिलां निजनालमूल-
विस्तारतोऽधिचरणांशदलांशतानाम्।
द्विघ्नप्रथां च विदधीत निजप्रथार्ध-
पादोनतत्समसमुच्छ्रयसम्प्रपन्नाम्।।१३५।।

विमर्शिनी

बिम्बविषये नपुंसकशिलालक्षणमाह - बिम्ब इति। बिम्बे बिम्बविषये निजनालमूलविस्तारतः निजबिम्बनालस्य मूलभागविस्ताराद् अधिचरणांशदलांशतानां पादाधिक्येन वार्धाधिक्येन वा विस्तारेण युक्तां, द्विघ्नप्रथां नालमूलविस्ताराद् द्विगुणित-विस्तारयुक्तां वा, तथा निजप्रथार्थपादोनतत्समसमुच्छ्रयसंप्रपन्नां निजविस्तारार्थेन वा पादोनेन वा तत्समेन वा समुच्छ्रयेण युक्तां नपुंसकशिलां विदधीत। तथाचाहुः–

"पादशैलप्रमाणतः।
पादाधिकमथाध्यर्धं द्विगुणं वा सविस्तरम्।।
विस्ताराधोच्छ्रयं कुर्यात् पादोनं वा विधीयते।
विस्तारतः समं वापि त्रिविधं च तदुच्छ्रयम्।।"

१. 'तत्सम', २. 'वर्धतो' क. पाठः

Shripuram Publications
www.shripuram.org

इति।।१३५।।

भङ्क्त्वा त्रिधाङ्घ्रिदृषदुच्छ्रयमेकमंशं
पीठे द्विभागमुपवेशयतूर्वरायाम्।
द्व्येकार्धिताङ्गुलिमितं खनतूत्तमादि
ब्रह्माश्ममूर्ध्न्युचितनालनिवेशनाय।।१३६।।

विमर्शिनी

पुनः अङ्घ्रिदृषदुच्छ्रयं नपुंसकशिलोत्सेधं त्रिधा भङ्क्त्वा एकमंशं पीठे द्विभागमुर्वरायां भूमौ च उपवेशयतु। ब्रह्माश्ममूर्ध्नि नपुंसकशिलोपरिभागे उत्तमादिक्रमेण द्व्येकार्धिताङ्गुलिमितं द्वाभ्यामेकेन अर्धाङ्गुलेन वा मितम् उचितनालनिवेशनाय तत्र योग्यसय नालस्य निवेशनाय खनतु च।।१३६।।

लिङ्गायामसमो नपुंसकशिलाव्यासो वरिष्ठोऽवरः
पूजांशद्विगुणस्तदन्तरमितावष्टांशितायां क्रमात्।
अंशद्ध्र्याधममध्यमादिकविधिर्व्यासार्धतोऽङ्घ्र्यन्तिम-
श्चोत्सेधश्च तथात्र लिङ्गविनिवेशार्हश्च कार्योऽवटः।।१३७।।

विमर्शिनी

अथ लिङ्गविषये नपुंसकशिलालक्षणमाह - लिङ्गायामेति। लिङ्गायामसमः लिङ्गस्य दैर्घ्येण समो नपुंसकशिलाव्यासः नपुंसकशिलाया विस्तारो वरिष्ठ उत्तमः, पूजांशद्विगुणः अवरः अधमः, तदन्तरमितौ तथोरन्तरगतायां मितौ अष्टांशितायां क्रमादंशद्ध्र्या अंशांशवर्धनेन अधममध्यमादिकविधिः अधमाधमाद्युत्तमोत्तमपर्यन्तस्य विधिः। तथाच (स?स्व) व्यासार्धतो व्यासार्धमारभ्य अङ्घ्र्यन्तिमः पादांशपर्यन्त उत्सेधश्च। तस्मिन्नपि तथाष्टांशिते तथा उत्तमोत्तमावधमाधमपर्यन्तविधिश्च। तथात्र लिङ्गविनिवेशार्हः लिङ्गविनिवेशनायां योग्योऽवटश्च कार्यः। तथाच गुरुदेवः–

"लिङ्गायामसमव्यासा श्रेष्ठा ब्रह्मशिला स्मृता।
पूजांशद्विगुणा नीचा तयोर्मध्येऽष्टभागिके।।

Shripuram Publications
www.shripuram.org

प्राग्वन्नव प्रकाराः स्युः शुभा ब्रह्मशिलाः स्मृताः।
स्वव्यासार्धेन ता मुख्या नीचा पादांशतो घना।।
तयोर्मध्येऽष्टधां भक्ते घनाद् ब्रह्मशिला नव।।"

इति।।१३७।।

सकले सति मूलबिम्बके निगमांशोन्मिति कर्मबिम्बकम्।
सकलाकृति निष्कलेऽपि वा स्थितमासीनमुत प्रकल्पयेत्।।१३८।।

विमर्शिनी

बिम्बविषये कौतुकलक्षणमाह - सकल इति। मूलबिम्बे सकले सावयवे सति निगमांशोन्मिति चतुर्थांशेनोन्मितं[1] मानं यथा भवति तथा कर्मणि बिम्बकौतुकं कल्पयेत्। निष्कले निरवयवे सकलाकृति सावयवत्वेनैव स्थितं स्थिते मूलबि(म्ब?म्बे)स्थितम् आसीनमुत आसीनं वा प्रकल्पयेत्। आसीने चोभयथा प्रकल्पयेत्। निगमांशोन्मितीत्येतदुपलक्षणम्। अन्यथा च ग्रन्थान्तरे विधानात्, तथा दर्शनाच्च। तथाहि–

"महति प्रतिमायामे तिथिभक्ते मधुद्विषः।
अग्न्याद्यद्ग्रन्तिमैरंशैर्बलिबिम्बं प्रकल्पयेत्।।
स्वायामपञ्चषड्भागैः कर्माचार्ष्टव्यंशितेऽथवा।
अब्ध्याशुगरसाद्ग्रंशैरल्पे महति वा भवेत्।।"

इति। तथाच–

"बिम्बदीर्घनृपभाजितेंऽशकैर्वेदभूतरसपर्वतैस्तथा।
अङ्गुलैश्च भवति स्वयोनिजैः कर्मबिम्बमितिरच्युतार्ययोः।।"

इति। रत्नावल्याम् - "अथ कर्मार्चाप्रमाणम्। यथा मूलार्चा, कर्मार्चापि तथैव कार्या। स्थाने स्थितमासीनं वा कारयेत्। अन्यकर्मार्चाः स्थिता एव कुर्यात्। महाबेरत्रिभागैकभागमुत्तमम्। कर्मार्चाप्रतिमोच्छ्रयं नवभागं कृत्वैकभागमपोह्य शेषं त्रिभागं कृत्वा एकभागं मध्यममि"त्यादि।।१३८।।

आयामेन शिवांशकस्य रचयेन्नाहेन वा सम्मितं
व्यासेनापि च मन्त्रलिङ्गविषये तत् कर्मबिम्बं शिवे।

---

१. 'न्मानं' ख. पाठः

Shripuram Publications
www.shripuram.org

भङ्क्त्वा षोडशधा पुनस्त्रयमिदं रुद्राङ्कशैलाशुगा-
ग्न्यंशैर्वाधिकमूनितं च कुहचित् कुर्यात् तदौचित्यतः ।।१३९ ।।

विमर्शिनी

लिङ्गविषये कर्मबिम्बमानमाह - आयामेनेति। मन्त्रलिङ्गविषये शिवांशकस्य वृत्तांशकस्यायामेन वा तस्य नाहेन वा तस्य व्यासेन वापि सम्मितं कर्मबिम्बं रचयेत्। कुहचित् पुनरिदं त्रयं षोडशधा भङ्क्त्वा रुद्राङ्कशैलाशुगाग्न्यंशैः एकादशनवसप्तपञ्च-त्र्यंशैरधिकं कुहचिदूनितं वा तदौचित्यतः कुर्यात् ।।१३९ ।।

शिखिविशिखसुषिरभक्ते मूलगृहे मूललिङ्गे च।
नेत्राग्निभूतभागैर्बालगृहं बाललिङ्गं च।।१४० ।।

विमर्शिनी

निष्क्रमणार्थमल्पगेहाल्पबिम्बयोः प्रमाणमाह - शिखीति। मूलप्रासादे मूललिङ्गे च त्रिभिः पञ्चभिर्नवभिर्वा भक्ते क्रमेण द्वाभ्यां त्रिभिः पञ्चभिर्वा बालालयमल्पबिम्बं च कुर्यात् ।।१४० ।।

इति तन्त्रसमुच्चये द्वितीयः
पटलो दर्शितदेवधिष्ण्यलक्ष्मा।
परिमण्डपबिम्बलिङ्गपीठा-
दिकक्लृप्त्युक्तिसमन्वितः समाप्तः।।१४१ ।।

विमर्शिनी

पटलमुपसंहरति - इति द्वितीयः पटलः समाप्तः। दर्शितदेवधिष्ण्यलक्ष्मा प्रतिपादितप्रासादलक्षणेन युक्तः। परिमण्डपबिम्बलिङ्गपीठादिकक्लृप्त्युक्तिसमन्वितः अन्तहारादिबिम्बलिङ्गादिक्लृप्तिवचनेन युक्तश्च।।१४१ ।।

इति तन्त्रसमुच्चयविमर्शिन्यां
द्वितीयः पटलः।।

www.shripuram.org
Shripuram Publications
www.shripuram.org